# Shri Shiva Mahapuranam 21 Rudra Samhita Srishtikhandah

# શ્રીશિવમહાપુરાણમ્ ૨૧ રુદ્રસંહિતાયાં સૃષ્ટિખણ્ડઃ

## Document Information

Text title : Shivapuranam 2.1 rudrasaMhitA sRiShTikhaNDaH

File name : shivapurANam2rudrasaMhitA1sRRiShTikhaNDaH.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૨૧ રુદ્રસંહિતાયાં સૃષ્ટિખણ્ડઃ

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥ દ્વિતીયાયાં રુદ્રસંહિતા

પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૧. પ્રથમોઽધ્યાયઃ । મુનિપ્રશ્નવર્ણનમ્ ।

વિશ્વોદ્ભવસ્થિતિલયાદિષુ હેતુમેકં
ગૌરીપતિં વિદિતતત્ત્વમનન્તકીર્તિમ્ ।
માયાશ્રયં વિગતમાયમચિન્ત્યરૂપં
બોધસ્વરૂપમમલં હિ શિવં નમામિ ॥ ૧॥

વન્દે શિવં તં પ્રકૃતેરનાદિં
પ્રશાન્તમેકં પુરુષોત્તમં હિ ।
સ્વમાયયા કૃત્સ્નમિદં હિ સૃષ્ટ્વા
નભોવદન્તર્બહિરાસ્થિતો યઃ ॥ ૨॥

વન્દેઽન્તરસ્થં નિજગૂઢરૂપં
શિવં સ્વતઃ સ્રષ્ટુમિદં વિચષ્ટે ।
જગન્તિ નિત્યં પરિતો ભ્રમન્તિ
યત્સન્નિધૌ ચુમ્બકલોહવત્તમ્ ॥ ૩॥

વ્યાસ ઉવાચ ।
જગતઃ પિતરં શમ્ભું જગતો માતરં શિવામ્ ।
તત્પુત્રશ્ચ ગણાધીશં નત્વૈતદ્વર્ણયામહે ॥ ૪॥

એકદા મુનયઃ સર્વે નૈમિષારણ્યવાસિનઃ ।
પપ્રચ્છુર્વરયા ભક્ત્યા સૂતં તે શૌનકાદયઃ ॥ ૫॥

ઋષય ઊચુઃ ।
વિદ્યેશ્વરસંહિતાયાઃ શ્રુતા સા સત્કથા શુભા ।
સાધ્યસાધનખણ્ડાખ્યા રમ્યાદ્યા ભક્તવત્સલા ॥ ૬॥

સૂત સૂત મહાભાગ ચિરઞ્જીવ સુખી ભવ ।
યચ્છ્રાવયસિ નસ્તાત શાङ્કરીં પરમાં કથામ્ ॥ ૭॥

પિબન્તસ્ત્વન્મુખામ્ભોજચ્યુતં જ્ઞાનામૃતં વયમ્ ।
અવિતૃપ્તાઃ પુનઃ કિઞ્ચિત્પ્રષ્ટુમિચ્છામહેઽનઘ ॥ ૮॥

વ્યાસપ્રસાદાત્સર્વજ્ઞો પ્રાપ્તોઽસિ કૃતકૃત્યતામ્ ।
નાજ્ઞાતં વિદ્યતે કિઞ્ચિદ્ભૂતં ભવ્યં ભવચ્ચ યત્ ॥ ૯॥

ગુરોર્વ્યાસસ્ય સદ્ભક્ત્યા સમાસાદ્ય કૃપાં પરામ્ ।
સર્વં જ્ઞાતં વિશેષેણ સર્વં સાર્થં કૃતં જનુઃ ॥ ૧૦॥

ઇદાનીં કથય પ્રાજ્ઞ શિવરૂપમનુત્તમમ્ ।
દિવ્યાનિ વૈ ચરિત્રાણિ શિવયોરપ્યશેષતઃ ॥ ૧૧॥

અગુણો ગુણતાં યાતિ કથં લોકે મહેશ્વરઃ ।
શિવતત્ત્વં વયં સર્વે ન જાનીમો વિચારતઃ ॥ ૧૨॥

સૃષ્ટેઃ પૂર્વં કથં શમ્ભુઃ સ્વરૂપેણાવતિષ્ઠતે ।
સૃષ્ટિમધ્યે સ હિ કથં ક્રીડન્સંવર્તતે પ્રભુઃ ॥ ૧૩॥

તદન્તે ચ કથં દેવઃ સ તિષ્ઠતિ મહેશ્વરઃ ।
કથં પ્રસન્નતાં યાતિ શङ્કરો લોકશङ્કરઃ ॥ ૧૪॥

સ પ્રસન્નો મહેશાનઃ કિં પ્રયચ્છતિ સત્ફલમ્ ।
સ્વભક્તેભ્યઃ પરેભ્યશ્ચ તત્સર્વં કથયસ્વ નઃ ॥ ૧૫॥

સદ્યઃ પ્રસન્નો ભગવાન્ભવતીત્યનુશુશ્રુમ ।
ભક્તપ્રયાસં સ મહાન્ન પશ્યતિ દયાપરઃ ॥ ૧૬॥

બ્રહ્મા વિષ્ણુર્મહેશશ્ચ ત્રયો દેવાઃ શિવાङ્ગજાઃ ।
મહેશસ્તત્ર પૂર્ણાંશઃ સ્વયમેવ શિવોઽપરઃ ॥ ૧૭॥

તસ્યાવિર્ભાવમાખ્યાહિ ચરિતાનિ વિશેષતઃ ।
ઉમાવિર્ભાવમાખ્યાહિ તદ્વિવાહં તથા પ્રભો ॥ ૧૮॥

તદ્ગાર્હસ્થ્યં વિશેષેણ તથા લીલાઃ પરા અપિ ।

એતત્સર્વં તદન્યચ્ચ કથનીયં ત્વયાનઘ ॥ ૧૯॥

વ્યાસ ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા તૈસ્તુ સૂતો હર્ષસમન્વિતઃ ।
સ્મૃત્વા શમ્ભુપદામ્ભોજં પ્રત્યુવાચ મુનીશ્વરાન્ ॥ ૨૦॥

સૂત ઉવાચ ।
સમ્યક્ પૃષ્ટં ભવદ્ભિશ્ચ ધન્યા યૂયં મુનીશ્વરાઃ ।
સદાશિવકથાયાં વો યજ્જાતા નૈષ્ઠિકી મતિઃ ॥ ૨૧॥

સદાશિવકથાપ્રશ્નઃ પુરુષાંસ્ત્રીન્પુનાતિ હિ ।
વક્તારં પૃચ્છકં શ્રોતૄઞ્જાહ્નવીસલિલં યથા ॥ ૨૨॥

શમ્ભોર્ગુણાનુવાદાત્કો વિરજ્યેત પુમાન્દ્વિજાઃ ।
વિના પશુઘ્નં ત્રિવિધજનાનન્દકરાત્સદા । ૨૩॥

ગીયમાનો વિતૃષ્ણૈશ્ચ ભવરોગૌષધોઽપિ હિ ।
મનઃશ્રોત્રાભિરામશ્ચ યતઃ સર્વાર્થદઃ સ વૈ ॥ ૨૪॥

કથયામિ યથાબુદ્ધિ ભવત્પ્રશ્નાનુસારતઃ ।
શિવલીલાં પ્રયત્નેન દ્વિજાસ્તાં શૃણુતાદરાત્ ॥ ૨૫॥

ભવદ્ભિઃ પૃચ્છ્યતે યદ્વત્તત્તથા નારદેન વૈ ।
પૃષ્ટં પિત્રે પ્રેરિતેન હરિણા શિવરૂપિણા ॥ ૨૬॥

બ્રહ્મા શ્રુત્વા સુતવચઃ શિવભક્તઃ પ્રસન્નધીઃ ।
જગૌ શિવયશઃ પ્રીત્યા હર્ષયન્મુનિસત્તમમ્ ॥ ૨૭॥

વ્યાસ ઉવાચ ।
સૂતોક્તમિતિ તદ્વાક્યમાકર્ણ્ય દ્વિજસત્તમાઃ ।
પપ્રચ્છુસ્તત્સુસંવાદં કુતૂહલસમન્વિતાઃ ॥ ૨૮॥

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ શૈવોત્તમ મહામતે ।
શ્રુત્વા તવ વચો રમ્યં ચેતો નઃ સકુતૂહલમ્ ॥ ૨૯॥

કદા બભૂવ સુખકૃદ્વિધિનારદયોર્મહાન્ ।
સંવાદો યત્ર ગિરિશસુલીલા ભવમોચની ॥ ૩૦॥

વિધિનારદસંવાદપૂર્વકં શાઙ્કરં યશઃ ।

બ્રૂહિ નસ્તાત તત્પ્રીત્યા તત્તત્પ્રશ્નાનુસારતઃ ॥ ૩૧॥

ઇત્યાકર્ણ્ય વચસ્તેષાં મુનીનાં ભાવિતાત્મનામ્ ।
સૂતઃ પ્રોવાચ સુપ્રીતસ્તત્સંવાદાનુસારતઃ ॥ ૩૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને મુનિપ્રશ્નવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૧.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૨. દ્વિતીયોઽધ્યાયઃ । નારદતપોવર્ણનમ્ ।

સૂત ઉવાચ ।
એકસ્મિન્સમયે વિપ્રા નારદો મુનિસત્તમઃ ।
બ્રહ્મપુત્રો વિનીતાત્મા તપોઽર્થં મન આદધે ॥ ૧॥

હિમશૈલગુહા કાચિદેકા પરમશોભના ।
યત્સમીપે સુરનદી સદા વહતિ વેગતઃ ॥ ૨॥

તત્રાશ્રમો મહાદિવ્યો નાનાશોભાસમન્વિતઃ ।
તપોઽર્થં સ યયૌ તત્ર નારદો દિવ્યદર્શનઃ ॥ ૩॥

તાં દૃષ્ટ્વા મુનિશાર્દૂલસ્તેપે સ સુચિરં તપઃ ।
બધ્વાસનં દૃઢં મૌની પ્રાણાનાયમ્ય શુદ્ધધીઃ ॥ ૪॥

ચક્રે મુનિઃ સમાધિં તમહમ્બ્રહ્મેતિ યત્ર હ ।
વિજ્ઞાનં ભવતિ બ્રહ્મસાક્ષાત્કારકરં દ્વિજાઃ ॥ ૫॥

ઇત્થં તપતિ તસ્મિન્વૈ નારદે મુનિસત્તમે ।
ચકમ્પેઽથ શુનાસીરો મનસ્સન્તાપવિહ્વલઃ ॥ ૬॥

મનસીતિ વિચિન્ત્યાસૌ મુનિર્મે રાજ્યમિચ્છતિ ।
તદ્વિઘ્નકરણાર્થં હિ હરિર્યત્નમિયેષ સઃ ॥ ૭॥

સસ્માર સ સ્મરં શક્રશ્ચેતસા દેવનાયકઃ ।
આજગામ દ્રુતં કામઃ સમધીર્મહિષીયુતઃ ॥ ૮॥

અથાગતં સ્મરં દૃષ્ટ્વા સમ્બોધ્ય સુરરાટ્ પ્રભુઃ ।
ઉવાચ તં પ્રપશ્યાશુ સ્વાર્થે કુટિલશેમુષિઃ ॥ ૯॥

ઇન્દ્ર ઉવાચ ।
મિત્રવર્ય મહાવીર સર્વદા હિતકારક ।
શ‍ૃણુ પ્રીત્યા વચો મે ત્વં કુરુ સાહાય્યમાત્મના ॥ ૧૦॥

ત્વદ્બલાન્મે બહૂનાઞ્ચ તપોગર્વો વિનાશિતઃ ।
મદ્રાજ્યસ્થિરતા મિત્ર ત્વદનુગ્રહતઃ સદા ॥ ૧૧॥

હિમશૈલગુહાયાં હિ મુનિસ્તપતિ નારદઃ ।
મનસોદ્દિશ્ય વિશ્વેશં મહાસંયમવાન્દૃઢઃ ॥ ૧૨॥

યાચેન્ન વિધિતો રાજ્યં સ મમેતિ વિશઙ્કિતઃ ।
અદ્યૈવ ગચ્છ તત્ર ત્વં તત્તપોવિઘ્નમાચર ॥ ૧૩॥

ઇત્યાજ્ઞપ્તો મહેન્દ્રેણ સ કામઃ સમધુપ્રિયઃ ।
જગામ તત્સ્થલં ગર્વાદુપાયં સ્વં ચકાર હ ॥ ૧૪॥

રચયામાસ તત્રાશુ સ્વકલાઃ સકલા અપિ ।
વસન્તોઽપિ સ્વપ્રભાવં ચકાર વિવિધં મદાત્ ॥ ૧૫॥

ન બભૂવ મુનેશ્ચેતો વિકૃતં મુનિસત્તમાઃ ।
ભ્રષ્ટો બભૂવ તદ્ગર્વો મહેશાનુગ્રહેણ હ ॥ ૧૬॥

શ‍ૃણુતાદરતસ્તત્ર કારણં શૌનકાદયઃ ।
ઈશ્વરાનુગ્રહેણાત્ર ન પ્રભાવઃ સ્મરસ્ય હિ ॥ ૧૭॥

અત્રૈવ શમ્ભુનાકારિ સુતપશ્ચ સ્મરારિણા ।
અત્રૈવ દગ્ધસ્તેનાશુ કામો મુનિતપોપહઃ ॥ ૧૮॥

કામજીવનહેતોર્હિ રત્યા સમ્પ્રાર્થિતૈઃ સુરૈઃ ।
સમ્પ્રાર્થિત ઉવાચેદં શઙ્કરો લોકશઙ્કરઃ ॥ ૧૯॥

કઞ્ચિત્સમયમાસાદ્ય જીવિષ્યતિ સુરાઃ સ્મરઃ ।
પરન્ત્વિહ સ્મરોપાયશ્ચલિષ્યતિ ન કશ્ચન ॥ ૨૦॥

ઇહ યાવદ્દૃષ્યતે ભૂર્જનૈઃ સ્થિત્વામરાઃ સદા ।
કામબાણપ્રભાવોઽત્ર ન ચલિષ્યત્યસંશયમ્ ॥ ૨૧॥

ઇતિ શમ્ભૂક્તિતઃ કામો મિથ્યાત્મગતિકસ્તદા ।

નારદે સ જગામાશુ દિવમિન્દ્રસમીપતઃ ॥ ૨૨॥

આચખ્યૌ સર્વવૃત્તાન્તં પ્રભાવં ચ મુનેઃ સ્મરઃ ।
તદાજ્ઞયા યયૌ સ્થાનં સ્વકીયં સમધુપ્રિયઃ ॥ ૨૩॥

વિસ્મિતોઽભૂત્સુરાધીશઃ પ્રશશંસાથ નારદમ્ ।
તદ્વૃત્તાન્તાનભિજ્ઞો હિ મોહિતઃ શિવમાયયા ॥ ૨૪॥

દુર્જ્ઞેયા શામ્ભવી માયા સર્વેષાં પ્રાણિનામિહ ।
ભક્તં વિનાર્પિતાત્માનં તયા સમ્મોહ્યતે જગત્ ॥ ૨૫॥

નારદોઽપિ ચિરં તસ્થૌ તત્રેશાનુગ્રહેણ હ ।
પૂર્ણં મત્વા તપસ્તત્સ્વં વિરરામ તતો મુનિઃ ॥ ૨૬॥

કામાજ્જયં નિજં મત્વા ગર્વિતોઽભૂન્મુનીશ્વરઃ ।
વૃથૈવ વિગતજ્ઞાનઃ શિવમાયાવિમોહિતઃ ॥ ૨૭॥

ધન્યા ધન્યા મહામાયા શામ્ભવી મુનિસત્તમાઃ ।
તદ્ગતિં ન હિ પશ્યન્તિ વિષ્ણુબ્રહ્માદયોઽપિ હિ ॥ ૨૮॥

તયા સમ્મોહિતોઽતીવ નારદો મુનિસત્તમઃ ।
કૈલાસં પ્રયયૌ શીઘ્રં સ્વવૃત્તં ગદિતું મદી ॥ ૨૯॥

રુદ્રં નત્વાબ્રવીત્સર્વં સ્વવૃત્તં ગર્વવાન્મુનિઃ ।
મત્ત્વાત્માનં મહાત્માનં સ્વપ્રભુઞ્ચ સ્મરઞ્જયમ્ ॥ ૩૦॥

તચ્છ્રુત્વા શઙ્કરઃ પ્રાહ નારદં ભક્તવત્સલઃ ।
સ્વમાયામોહિતં હેત્વનભિજ્ઞં ભ્રષ્ટચેતસમ્ ॥ ૩૧॥

રુદ્ર ઉવાચ ।
હે તાત નારદ પ્રાજ્ઞ ધન્યસ્ત્વં શ ૃણુ મદ્વચઃ ।
વાચ્યમેવં ન કુત્રાપિ હરેરગ્રે વિશેષતઃ ॥ ૩૨॥

પૃચ્છમાનોઽપિ ન બ્રૂયાઃ સ્વવૃત્તં મે યદુક્તવાન્ ।
ગોપ્યં ગોપ્યં સર્વથા હિ નૈવ વાચ્યં કદાચન ॥ ૩૩॥

શાસ્મ્યહં ત્વાં વિશેષેણ મમ પ્રિયતમો ભવાન્ ।
વિષ્ણુભક્તો યતસ્ત્વં હિ તદ્ભક્તોઽતીવ મેઽનુગઃ ॥ ૩૪॥

શાસ્તિ સ્મેત્થઞ્ચ બહુશો રુદ્રઃ સૂતિકરઃ પ્રભુઃ ।
નારદો ન હિતં મેને શિવમાયાવિમોહિતઃ । ૩૫॥

પ્રબલા ભાવિની કર્મગતિર્જ્ઞેયા વિચક્ષણૈઃ ।
ન નિવાર્યા જનૈઃ કૈશ્ચિદપીચ્છા સૈવ શાઙ્કરી ॥ ૩૬॥

તતઃ સ મુનિવર્યો હિ બ્રહ્મલોકં જગામ હ ।
વિધિં નત્વાબ્રવીત્કામજયં સ્વસ્ય તપોબલાત્ ॥ ૩૭॥

તદાકર્ણ્ય વિધિઃ સોઽથ સ્મૃત્વા શમ્ભુપદામ્બુજમ્ ।
વિજ્ઞાય કારણં સર્વં નિષિષેધ સુતં તદા ॥ ૩૮॥

મેને હિતં ન વિધ્યુક્તં નારદો જ્ઞાનિસત્તમઃ ।
શિવમાયામોહિતશ્ચ રૂઢચિત્તમદાઙ્કુરઃ ॥ ૩૯॥

શિવેચ્છા યાદૃશી લોકે ભવત્યેવ હિ સા તદા ।
તદધીનં જગત્સર્વં વચસ્તન્ત્યાં સ્થિતં યતઃ ॥ ૪૦॥

નારદોઽથ યયૌ શીઘ્રં વિષ્ણુલોકં વિનષ્ટધીઃ ।
મદાઙ્કુરમના વૃત્તં ગદિતું સ્વં તદગ્રતઃ ॥ ૪૧॥

આગચ્છન્તં મુનિં દૃષ્ટ્વા નારદં વિષ્ણુરાદરાત્ ।
ઉત્થિત્વાગ્રે ગતોઽરં તં શિશ્લેષ જ્ઞાતહેતુકઃ ॥ ૪૨॥

સ્વાસને સમુપાવેશ્ય સ્મૃત્વા શિવપદામ્બુજમ્ ।
હરિઃ પ્રાહ વચસ્તથ્યં નારદં મદનાશનમ્ ॥ ૪૩॥

વિષ્ણુરુવાચ ।
કુત આગમ્યતે તાત કિમર્થમિહ ચાગતઃ ।
ધન્યસ્ત્વં મુનિશાર્દૂલ તીર્થોઽહં તુ તવાગમાત્ ॥ ૪૪॥

વિષ્ણુવાક્યમિતિ શ્રુત્વા નારદો ગર્વિતો મુનિઃ ।
સ્વવૃત્તં સર્વમાચષ્ટ સમદં મદમોહિતઃ ॥ ૪૫॥

શ્રુત્વા મુનિવચો વિષ્ણુઃ સમદં કારણં તતઃ ।
જ્ઞાતવાનખિલં સ્મૃત્વા શિવપાદામ્બુજં હૃદિ ॥ ૪૬॥

તુષ્ટાવ ગિરિશં ભક્ત્યા શિવાત્મા શૈવરાડ્ઢરિઃ ।
સાઞ્જલિર્વિસુધીર્નમ્રમસ્તકઃ પરમેશ્વરમ્ ॥ ૪૭॥

વિષ્ણુરુવાચ ।
દેવ દેવ મહાદેવ પ્રસીદ પરમેશ્વર ।

ધન્યસ્ત્વં શિવ ધન્યા તે માયા સર્વવિમોહિની ॥ ૪૮॥

ઇત્યાદિ સ સ્તુતિં કૃત્વા શિવસ્ય પરમાત્મનઃ ।
નિમીલ્ય નયને ધ્યાત્વા વિરરામ પદામ્બુજમ્ ॥ ૪૯॥

યત્કર્તવ્યં શઙ્કરસ્ય સ જ્ઞાત્વા વિશ્વપાલકઃ ।
શિવશાસનતઃ પ્રાહ હૃદાથ મુનિસત્તમમ્ ॥ ૫૦॥

વિષ્ણુરુવાચ ।
ધન્યસ્ત્વં મુનિશાર્દૂલ તપોનિધિરુદારધીઃ ।
ભક્તિત્રિકં ન યસ્યાસ્તિ કામમોહાદયો મુને ॥ ૫૧॥

વિકારાસ્તસ્ય સદ્યો વૈ ભવન્ત્યખિલદુઃખદાઃ ।
નૈષ્ઠિકો બ્રહ્મચારી ત્વં જ્ઞાનવૈરાગ્યવાન્સદા ॥ ૫૨॥

કથં કામવિકારી સ્યાજ્જન્મનાવિકૃતઃ સુધીઃ ।
ઇત્યાદ્યુક્તં વચો ભૂરિ શ્રુત્વા સ મુનિસત્તમઃ ॥ ૫૩॥

વિજહાસ હૃદા નત્વા પ્રત્યુવાચ વચો હરિમ્ ।
નારદ ઉવાચ ।
કિમ્પ્રભાવઃ સ્મરઃ સ્વામિન્કૃપા યદ્યસ્તિ તે મયિ ॥ ૫૪॥

ઇત્યુક્ત્વા હરિમાનમ્ય યયૌ યાદૃચ્છિકો મુનિઃ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને નારદતપોવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૧.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૩. તૃતીયોઽધ્યાયઃ । નારદમોહનં વર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ વ્યાસશિષ્ય નમોઽસ્તુ તે ।
અદ્ભુતેયં કથા તાત વર્ણિતા કૃપયા હિ નઃ ॥ ૧॥

મુનૌ ગતે હરિસ્તાત કિઞ્ચકાર તતઃ પરમ્ ।

નારદોઽપિ ગતઃ કુત્ર તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૨॥

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં સૂતઃ પૌરાણિકોત્તમઃ ।
પ્રત્યુવાચ શિવં સ્મૃત્વા નાનાસૂતિકરં બુધઃ ॥ ૩॥

સૂત ઉવાચ ।
મુનૌ યદૃચ્છયા વિષ્ણુર્ગતે તસ્મિન્હિ નારદે ।
શિવેચ્છયા ચકારાશુ માયાં માયાવિશારદઃ ॥ ૪॥

મુનિમાર્ગસ્ય મધ્યે તુ વિરેચે નગરં મહત્ ।
શતયોજનવિસ્તારમદ્ભુતં સુમનોહરમ્ ॥ ૫॥

સ્વલોકાદધિકં રમ્યં નાનાવસ્તુવિરાજિતમ્ ।
નરનારીવિહારાઢ્યં ચતુર્વર્ણાકુલં પરમ્ ॥ ૬॥

તત્ર રાજા શીલનિધિર્નામૈશ્વર્યસમન્વિતઃ ।
સુતાસ્વયમ્વરોદ્યુક્તો મહોત્સવસમન્વિતઃ ॥ ૭॥

ચતુર્દિગ્ભ્યઃ સમાયાતૈઃ સંયુતં નૃપનન્દનૈઃ ।
નાનાવેષૈઃ સુશોભૈશ્ચ તત્કન્યાવરણોત્સુકૈઃ ॥ ૮॥

એતાદૃશં પુરં દૃષ્ટ્વા મોહં પ્રાપ્તોઽથ નારદઃ ।
કૌતુકી તન્નૃપદ્વારં જગામ મદનૈધિતઃ ॥ ૯॥

આગતં મુનિવર્યં તં દૃષ્ટ્વા શીલનિધિર્નૃપઃ ।
ઉપવેશ્યાર્ચયાઞ્ચક્રે રત્નસિંહાસને વરે ॥ ૧૦॥

અથ રાજા સ્વતનયાં નામતઃ શ્રીમતીં વરામ્ ।
નારદસ્ય સમાનીય પાદયોઃ સમપાતયત્ ॥ ૧૧॥

તત્કન્યાં પ્રેક્ષ્ય સ મુનિર્નારદઃ પ્રાહ વિસ્મિતઃ ।
કેયં રાજન્મહાભાગા કન્યા સુરસુતોપમા ॥ ૧૨॥

તસ્ય તદ્વચનં શ્રુત્વા રાજા પ્રાહ કૃતાઞ્જલિઃ ।
દુહિતેયં મમ મુને શ્રીમતી નામ નામતઃ ॥ ૧૩॥

પ્રદાનસમયં પ્રાપ્તા વરમન્વેષતી શુભમ્ ।
સા સ્વયમ્વરસમ્પ્રાપ્તા સર્વલક્ષણલક્ષિતા ॥ ૧૪॥

અસ્યા ભાગ્યં વદ મુને સર્વં જાતકમાદરાત્ ।

કીદૃશં તનયેયં મે વરમાપ્સ્યતિ તદ્વદ ॥ ૧૫॥

ઇત્યુક્તો મુનિશાર્દૂલસ્તામિચ્છુઃ કામવિહ્વલઃ ।
સમાભાષ્ય સ રાજાનં નારદો વાક્યમબ્રવીત્ ॥ ૧૬॥

સુતેયં તવ ભૂપાલ સર્વલક્ષણલક્ષિતા ।
મહાભાગ્યવતી ધન્યા લક્ષ્મીરિવ ગુણાલયા ॥ ૧૭॥

સર્વેશ્વરોઽજિતો વીરો ગિરીશસદૃશો વિભુઃ ।
અસ્યાઃ પતિર્ધ્રુવં ભાવી કામજિત્સુરસત્તમઃ ॥ ૧૮॥

ઇત્યુક્ત્વા નૃપમામન્ત્ર્ય યયૌ યાદૃચ્છિકો મુનિઃ ।
બભૂવ કામવિવશઃ શિવમાયાવિમોહિતઃ ॥ ૧૯॥

ચિત્તે વિચિન્ત્ય સ મુનિરાપ્નુયાં કન્યકાં કથમ્ ।
સ્વયંવરે નૃપાલાનામેકં માં વૃણુયાત્કથમ્ ॥ ૨૦॥

સૌન્દર્યં સર્વનારીણાં પ્રિયં ભવતિ સર્વથા ।
તદ્ દૃષ્ટ્વૈવ પ્રસન્ના સા સ્વવશા નાત્ર સંશયઃ ॥ ૨૧॥

વિધાયેત્થં વિષ્ણુરૂપં ગ્રહીતું મુનિસત્તમઃ ।
વિષ્ણુલોકં જગામાશુ નારદઃ સ્મરવિહ્વલઃ ॥ ૨૨॥

પ્રણિપત્ય હૃષીકેશં વાક્યમેતદુવાચ હ ।
રહસિ ત્વાં પ્રવક્ષ્યામિ સ્વવૃત્તાન્તમશેષતઃ ॥ ૨૩॥

તથેત્યુક્તે તથાભૂતે શિવેચ્છાકાર્યકર્તરિ ।
બ્રૂહીત્યુક્તવતિ શ્રીશે મુનિરાહ ચ કેશવમ્ ॥ ૨૪॥

નારદ ઉવાચ ।
ત્વદીયો ભૂપતિઃ શીલનિધિઃ સ વૃષતત્પરઃ ।
તસ્ય કન્યા વિશાલાક્ષી શ્રીમતી વરવર્ણિની ॥ ૨૫॥

જગન્મોહિન્યભિખ્યાતા ત્રૈલોક્યેઽપ્યતિસુન્દરી ।
પરિણેતુમહં વિષ્ણો તામિચ્છામ્યદ્ય મા ચિરમ્ ॥ ૨૬॥

સ્વયમ્વરં ચકારાસૌ ભૂપતિસ્તનયેચ્છયા ।
ચતુર્દિગ્ભ્યઃ સમાયાતા રાજપુત્રાઃ સહસ્રશઃ ॥ ૨૭॥

યદિ દાસ્યસિ રૂપં મે તદા તાં પ્રાપ્નુયાં ધ્રુવમ્ ।
ત્વદ્રૂપં સા વિના કણ્ઠે જયમાલાં ન ધાસ્યતિ ॥ ૨૮॥

સ્વરૂપં દેહિ મે નાથ સેવકોઽહં પ્રિયસ્તવ ।
વૃણુયાન્માં યથા સા વૈ શ્રીમતી ક્ષિતિપાત્મજા ॥ ૨૯॥

સૂત ઉવાચ ।
વચઃ શ્રુત્વા મુનેરિત્થં વિહસ્ય મધુસૂદનઃ ।
શાङ્કરીં પ્રભુતાં બુધ્વા પ્રત્યુવાચ દયાપરઃ ॥ ૩૦॥

વિષ્ણુરુવાચ ।
સ્વેષ્ટદેશં મુને ગચ્છ કરિષ્યામિ હિતં તવ ।
ભિષગ્વરો યથાર્તસ્ય યતઃ પ્રિયતરોઽસિ મે ॥ ૩૧॥

ઇત્યુક્ત્વા મુનયે તસ્મૈ દદૌ વિષ્ણુર્મુખં હરેઃ ।
સ્વરૂપમનુગૃહ્યાસ્ય તિરોધાનં જગામ સઃ ॥ ૩૨॥

એવમુક્તો મુનિર્હૃષ્ટઃ સ્વરૂપં પ્રાપ્ય વૈ હરેઃ ।
મેને કૃતાર્થમાત્માનં તદ્યત્નં ન બુબોધ સઃ ॥ ૩૩॥

અથ તત્ર ગતઃ શીઘ્રં નારદો મુનિસત્તમઃ ।
ચક્રે સ્વયમ્વરં યત્ર રાજપુત્રૈઃ સમાકુલમ્ ॥ ૩૪॥

સ્વયમ્વરસભા દિવ્યા રાજપુત્રસમાવૃતા ।
શુશુભેઽતીવ વિપ્રેન્દ્રા યથા શક્રસભાપરા ॥ ૩૫॥

તસ્યાં નૃપસભાયાં વૈ નારદઃ સમુપાવિશત્ ।
સ્થિત્વા તત્ર વિચિન્ત્યેતિ પ્રીતિયુક્તેન ચેતસા ॥ ૩૬॥

માં વરિષ્યતિ નાન્યં સા વિષ્ણુરૂપધરં ધ્રુવમ્ ।
આનનસ્ય કુરૂપત્વં ન વેદ મુનિસત્તમઃ ॥ ૩૭॥

પૂર્વરૂપં મુનિં સર્વે દદૃશુસ્તત્ર માનવાઃ ।
તદ્ભેદં બુબુધુસ્તે ન રાજપુત્રાદયો દ્વિજાઃ । ૩૮॥

તત્ર રુદ્રગણૌ દ્વૌ તદ્રક્ષણાર્થં સમાગતૌ ।
વિપ્રરૂપધરૌ ગૂઢૌ તદ્ભેદં જજ્ઞતુઃ પરમ્ ॥ ૩૯॥

મૂઢં મત્વા મુનિં તૌ તન્નિકટં જગ્મતુર્ગણૌ ।
કુરુતસ્તત્પ્રહાસં વૈ ભાષમાણૌ પરસ્પરમ્ ॥ ૪૦॥

પશ્ય નારદરૂપં હિ વિષ્ણોરિવ મહોત્તમમ્ ।

મુખં તુ વાનરસ્યેવ વિકટં ચ ભયઙ્કરમ્ ॥ ૪૧॥

ઇચ્છત્યયં નૃપસુતાં વૃથૈવ સ્મરમોહિતઃ ।
ઇત્યુક્ત્વા સચ્છલં વાક્યમુપહાસં પ્રચક્રતુઃ ॥ ૪૨॥

ન શુશ્રાવ યથાર્થં તુ તદ્વાક્યં સ્મરવિહ્વલઃ ।
પર્યૈક્ષચ્છ્રીમતીં તાં વૈ તલ્લિપ્સુર્મોહિતો મુનિઃ ॥ ૪૩॥

એતસ્મિન્નન્તરે ભૂપકન્યા ચાન્તઃપુરાત્તુ સા ।
સ્ત્રીભિઃ સમાવૃતા તત્રાજગામ વરવર્ણિની ॥ ૪૪॥

માલાં હિરણ્મયીં રમ્યામાદાય શુભલક્ષણા ।
તત્ર સ્વયમ્વરે રેજે સ્થિતા મધ્યે રમેવ સા ॥ ૪૫॥

બભ્રામ સા સભાં સર્વાં માલામાદાય સુવ્રતા ।
વરમન્વેષતી તત્ર સ્વાત્માભીષ્ટં નૃપાત્મજા ॥ ૪૬॥

વાનરાસ્યં વિષ્ણુતનું મુનિં દૃષ્ટ્વા ચુકોપ સા ।
દૃષ્ટિં નિવાર્ય ચ તતઃ પ્રસ્થિતા પ્રીતમાનસા ॥ ૪૭॥

ન દૃષ્ટ્વા સ્વવરં તત્ર ત્રસ્તાસીન્મનેપ્સિતમ્ ।
અન્તઃસભાસ્થિતા કસ્મિન્નર્પયામાસ ન સ્રજમ્ ॥ ૪૮॥

એતસ્મિન્નન્તરે વિષ્ણુરાજગામ નૃપાકૃતિઃ ।
ન દૃષ્ટઃ કૈશ્ચિદપરૈઃ કેવલં સા દદર્શ હિ ॥ ૪૯॥

અથ સા તં સમાલોક્ય પ્રસન્નવદનામ્બુજા ।
અર્પયામાસ તત્કણ્ઠે તાં માલાં વરવર્ણિની ॥ ૫૦॥

તામાદાય તતો વિષ્ણૂ રાજરૂપધરઃ પ્રભુઃ ।
અન્તર્ધાનમગાત્સદ્યઃ સ્વસ્થાનં પ્રયયૌ કિલ ॥ ૫૧॥

સર્વે રાજકુમારાશ્ચ નિરાશાઃ શ્રીમતીં પ્રતિ ।
મુનિસ્તુ વિહ્વલોઽતીવ બભૂવ મદનાતુરઃ ॥ ૫૨॥

તદા તાવૂચતુઃ સદ્યો નારદં સ્મરવિહ્વલમ્ ।
વિપ્રરૂપધરૌ રુદ્રગણૌ જ્ઞાનવિશારદૌ ॥ ૫૩॥

ગણાવૂચતુઃ
હે નારદ મુને ત્વં હિ વૃથા મદનમોહિતઃ ।
તલ્લિપ્સુઃ સ્વમુખં પશ્ય વાનરસ્યેવ ગર્હિતમ્ ॥ ૫૪॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય તયોર્વાક્યં નારદો વિસ્મિતોઽભવત્ ।
મુખં દદર્શ મુકુરે શિવમાયાવિમોહિતઃ ॥ ૫૫॥

સ્વમુખં વાનરસ્યેવ દૃષ્ટ્વા ચુક્રોધ સત્વરમ્ ।
શાપં દદૌ તયોસ્તત્ર ગણયોર્મોહિતો મુનિઃ ॥ ૫૬॥

યુવાં મમોપહાસં વૈ ચક્રતુર્બ્રાહ્મણસ્ય હિ ।
ભવેતાં રાક્ષસૌ વિપ્રવીર્યજૌ વૈ તદાકૃતી ॥ ૫૭॥

શ્રુત્વા હરગણાવિત્થં સ્વશાપં જ્ઞાનિસત્તમૌ ।
ન કિઞ્ચિદૂચતુસ્તૌ હિ મુનિમાજ્ઞાય મોહિતમ્ ॥ ૫૮॥

સ્વસ્થાનં જગ્મતુર્વિપ્રા ઉદાસીનૌ શિવસ્તુતિમ્ ।
ચક્રતુર્મન્યમાનૌ વૈ શિવેચ્છાં સકલાં સદા ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને નારદમોહવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૧.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૪. ચતુર્થોઽધ્યાયઃ । નારદય વિષ્ણૂપદેશવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાપ્રાજ્ઞ વર્ણિતા હ્યદ્ભુતા કથા ।
ધન્યા તુ શામ્ભવી માયા તદધીનં ચરાચરમ્ ॥ ૧॥

ગતયોર્ગણયોઃ શમ્ભોઃ સ્વયમાત્મેચ્છયા વિભોઃ ।
કિઞ્ચકાર મુનિઃ ક્રુદ્ધો નારદઃ સ્મરવિહ્વલઃ ॥ ૨॥

સૂત ઉવાચ ।
વિમોહિતો મુનિર્દત્ત્વા તયોઃ શાપં યથોચિતમ્ ।
જલે મુખં નિરીક્ષ્યાથ સ્વરૂપં ગિરિશેચ્છયા ॥ ૩॥

શિવેચ્છયા ન પ્રબુદ્ધઃ સ્મૃત્વા હરિકૃતચ્છલમ્ ।
ક્રોધં દુર્વિષહં કૃત્વા વિષ્ણુલોકં જગામ હ ॥ ૪॥

ઉવાચ વચનં ક્રુદ્ધઃ સમિદ્ધ ઇવ પાવકઃ ।
દુરુક્તિગર્ભિતં વ્યઙ્ગં નષ્ટજ્ઞાનઃ શિવેચ્છયા ॥ ૫॥

નારદ ઉવાચ ।
હે હરે ત્વં મહાદુષ્ટઃ કપટી વિશ્વમોહનઃ ।
પરોત્સાહં ન સહસે માયાવી મલિનાશયઃ ॥ ૬॥

મોહિનીરૂપમાદાય કપટં કૃતવાન્પુરા ।
અસુરેભ્યોઽપાયયસ્ત્વં વારુણીમમૃતં ન હિ ॥ ૭॥

ચેત્પિબેન્ન વિષં રુદ્રો દયાં કૃત્વા મહેશ્વરઃ ।
ભવેન્નષ્ટાખિલા માયા તવ વ્યાજરતે હરે ॥ ૮॥

ગતિઃ સકપટા તેઽતિપ્રિયા વિષ્ણો વિશેષતઃ ।
સાધુસ્વભાવો ન ભવાન્સ્વતન્ત્રઃ પ્રભુણા કૃતઃ ॥ ૯॥

કૃતં સમુચિતં નૈવ શિવેન પરમાત્મના ।
તત્પ્રભાવબલં ધ્યાત્વા સ્વતન્ત્રકૃતિકારકઃ ॥ ૧૦॥

ત્વદ્ગતિં સુસમાજ્ઞાય પશ્ચાત્તાપમવાપ સઃ ।
વિપ્રં સર્વોપરિ પ્રાહ સ્વોક્તવેદપ્રમાણકૃત્ ॥ ૧૧॥

તજ્જ્ઞાત્વાહં હરે ત્વાદ્ય શિક્ષયિષ્યામિ તદ્બલાત્ ।
યથા ન કુર્યાઃ કુત્રાપીદૃશં કર્મ કદાચન ॥ ૧૨॥

અદ્યાપિ નિર્ભયસ્ત્વં હિ સઙ્ગં નાપસ્તરસ્વિના ।
ઇદાનીં લપ્સ્યસે વિષ્ણો ફલં સ્વકૃતકર્મણઃ ॥ ૧૩॥

ઇત્થમુક્ત્વા હરિં સોઽથ મુનિર્માયાવિમોહિતઃ ।
શશાપ ક્રોધનિર્વિણ્ણો બ્રહ્મતેજઃ પ્રદર્શયન્ ॥ ૧૪॥

સ્ત્રીકૃતે વ્યાકુલં વિષ્ણો મામકાર્ષીર્વિમોહકઃ ।
અન્વકાર્ષીઃ સ્વરૂપેણ યેન કાપટ્યકાર્યકૃત્ ॥ ૧૫॥

તદ્રૂપેણ મનુષ્યસ્ત્વં ભવ તદ્દુઃખભુગ્ઘરે ।
યન્મુખં કૃતવાન્મે ત્વં તે ભવન્તુ સહાયિનઃ ॥ ૧૬॥

ત્વં સ્ત્રીવિયોગજં દુઃખં લભસ્વ પરદુઃખદઃ ।

મનુષ્યગતિકઃ પ્રાયો ભવાજ્ઞાનવિમોહિતઃ ॥ ૧૭॥

ઇતિ શપ્ત્વા હરિં મોહાન્નારદોઽજ્ઞાનમોહિતઃ ।
વિષ્ણુર્જગ્રાહ તં શાપં પ્રશંસન્ શામ્ભવીમજામ્ ॥ ૧૮॥

અથ શમ્ભુર્મહાલીલો નિશ્ચકર્ષ વિમોહિનીમ ।
સ્વમાયાં મોહિતો જ્ઞાની નારદોઽપ્યભવદ્યયા ॥ ૧૯॥

અન્તર્હિતાયાં માયાયાં પૂર્વવન્મતિમાનભૂત્ ।
નારદો વિસ્મિતમનાઃ પ્રાપ્તબોધો નિરાકુલઃ ॥ ૨૦॥

પશ્ચાત્તાપમવાપ્યાતિ નિનિન્દ સ્વં મુહુર્મુહુઃ ।
પ્રશશંસ તદા માયાં શામ્ભવીં જ્ઞાનિમોહિનીમ્ ॥ ૨૧॥

અથ જ્ઞાત્વા મુનિઃસર્વં માયાવિભ્રમમાત્મનઃ ।
અપતત્પાદયોર્વિષ્ણોર્નારદો વૈષ્ણવોત્તમઃ ॥ ૨૨॥

હર્યુપસ્થાપિતઃ પ્રાહ વચનં નષ્ટદુર્મતિઃ ।
મયા દુરુક્તયઃ પ્રોક્તા મોહિતેન કુબુદ્ધિના ॥ ૨૩॥

દત્તઃ શાપોઽપિ તે નાથ વિતથં કુરુ તં પ્રભો ।
મહત્પાપમકાર્ષં હિ યાસ્યામિ નિરયં ધ્રુવમ્ ॥ ૨૪॥

કમુપાયં હરે કુર્યાં દાસોઽહં તે તમાદિશ ।
યેન પાપકુલં નશ્યેન્નિરયો ન ભવેન્મમ ॥ ૨૫॥

ઇત્યુક્ત્વા સ પુનર્વિષ્ણોઃ પાદયોર્મુનિસત્તમઃ ।
પપાત સુમતિર્ભક્ત્યા પશ્ચાત્તાપમુપાગતઃ ॥ ૨૬॥

અથ વિષ્ણુસ્તમુત્થાપ્ય બભાષે સૂનૃતં વચઃ ।
વિષ્ણુરુવાચ ।
ન ખેદં કુરુ મે ભક્તવરસ્ત્વં નાત્ર સંશયઃ ॥ ૨૭॥

શ ृણુ તાત પ્રવક્ષ્યામિ સુહિતં તવ નિશ્ચયાત્ ।
નિરયસ્તે ન ભવિતા શિવઃ શં તે વિધાસ્યતિ ॥ ૨૮॥

યદકાર્ષીઃ શિવવચો વિતથં મદમોહિતઃ ।
સ દત્તવાનીદૃશં તે ફલં કર્મફલપ્રદઃ ॥ ૨૯॥

શિવેચ્છયાખિલં જાતં કુર્વિત્થં નિશ્ચિતાં મતિમ્ ।
ગર્વાપહર્તા સ સ્વામી શઙ્કરઃ પરમેશ્વરઃ ॥ ૩૦॥

પરં બ્રહ્મ પરાત્મા સ સચ્ચિદાનન્દબોધનઃ ।
નિર્ગુણો નિર્વિકારી ચ રજઃસત્ત્વતમઃપરઃ ॥ ૩૧॥

સ એવાદાય માયાં સ્વાં ત્રિધા ભવતિ રૂપતઃ ।
બ્રહ્મવિષ્ણુમહેશાત્મા નિર્ગુણોઽનિર્ગુણોઽપિ સઃ ॥ ૩૨॥

નિર્ગુણત્વે શિવાહ્વો હિ પરમાત્મા મહેશ્વરઃ ।
પરં બ્રહ્માવ્યયોઽનન્તો મહાદેવેતિ ગીયતે ॥ ૩૩॥

તત્સેવયા વિધિઃ સ્રષ્ટા પાલકો જગતામહમ્ ।
સ્વયં સર્વસ્ય સંહારી રુદ્રરૂપેણ સર્વદા ॥ ૩૪॥

સાક્ષી શિવસ્વરૂપેણ માયાભિન્નઃ સ નિર્ગુણઃ ।
સ્વેચ્છાચારી સંવિહારી ભક્તાનુગ્રહકારકઃ ॥ ૩૫॥

શ્ ૃણુ ત્વં નારદ મુને સદુપાયં સુખપ્રદમ્ ।
સર્વપાપાપહર્તારં ભુક્તિમુક્તિપ્રદં સદા ॥ ૩૬॥

ત્યક્ત્વા સ્વસંશયં સર્વં ગાયન્ શઙ્કરસદ્યશઃ ।
શતનામશિવસ્તોત્રં સદાનન્યમતિર્જપ ॥ ૩૭॥

યજ્જપિત્વા દ્રુતં સર્વં તવ પાપં વિનશ્યતિ ।
ઇત્યુક્ત્વા નારદં વિષ્ણુઃ પુનઃ પ્રાહ દયાન્વિતઃ ॥ ૩૮॥

મુને ન કુરુ શોકં ત્વં ત્વયા કિઞ્ચિત્કૃતં ન હિ ।
સ્વેચ્છયા કૃતવાન્શમ્ભુરિદં સર્વં ન સંશયઃ ॥ ૩૯॥

અહાર્ષિત્ત્વન્મતિં દિવ્યાં કામક્લેશમદાત્સ તે ।
ત્વન્મુખાદ્દાપયાઞ્ચક્રે શાપં મે સ મહેશ્વરઃ ॥ ૪૦॥

ઇત્થં સ્વચરિતં લોકે પ્રકટીકૃતવાન્ સ્વયમ્ ।
મૃત્યુઞ્જયઃ કાલકાલો ભક્તોદ્ધારપરાયણઃ ॥ ૪૧॥

ન મે શિવસમાનોઽસ્તિ પ્રિયઃ સ્વામી સુખપ્રદઃ ।
સર્વશક્તિપ્રદો મેઽસ્તિ સ એવ પરમેશ્વરઃ ॥ ૪૨॥

તસ્યોપાસ્યાં કુરુ મુને તમેવ સતતં ભજ ।
તદ્યશઃ શ્ ૃણુ ગાય ત્વં કુરુ નિત્યં તદર્ચનમ્ ॥ ૪૩॥

કાયેન મનસા વાચા યઃ શઙ્કરમુપૈતિ ભોઃ ।

સ પણ્ડિત ઇતિ જ્ઞેયઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૪॥

શિવેતિ નામદાવાગ્નેર્મહાપાતકપર્વતાઃ ।
ભસ્મીભવન્ત્યનાયાસાત્સત્યં સત્યં ન સંશયઃ ॥ ૪૫॥

પાપમૂલાનિ દુઃખાનિ વિવિધાન્યપિ તાન્યતઃ ।
શિવાર્ચનૈકનશ્યાનિ નાન્યનશ્યાનિ સર્વથા ॥ ૪૬॥

સ વૈદિકઃ સ પુણ્યાત્મા સ ધન્યઃ સ બુધો મુને ।
યઃ સદા કાયવાક્ ચિત્તૈઃ શરણં યાતિ શઙ્કરમ્ ॥ ૪૭॥

ભવન્તિ વિવિધા ધર્મા યેષાં સદ્યઃ ફલોન્મુખાઃ ।
તેષાં ભવતિ વિશ્વાસસ્ત્રિપુરાન્તકપૂજને ॥ ૪૮॥

પાતકાનિ વિનશ્યન્તિ યાવન્તિ શિવપૂજયા ।
ભુવિ તાવન્તિ પાપાનિ ન સન્ત્યેવ મહામુને ॥ ૪૯॥

બ્રહ્મહત્યાદિપાપાનાં રાશયોઽપ્યમિતા મુને ।
શિવસ્મૃત્યા વિનશ્યન્તિ સત્યં સત્યં વદામ્યહમ્ ॥ ૫૦॥

શિવનામતરીં પ્રાપ્ય સંસારાબ્ધિં તરન્તિ તે ।
સંસારમૂલપાપાનિ તસ્ય નશ્યન્ત્યસંશયમ્ ॥ ૫૧॥

સંસારમૂલભૂતાનાં પાતકાનાં મહામુને ।
શિવનામકુઠારેણ વિનાશો જાયતે ધ્રુવમ્ ॥ ૫૨॥

શિવનામામૃતં પેયં પાપદાવાનલાર્દિતૈઃ ।
પાપદાવાગ્નિતપ્તાનાં શાન્તિસ્તેન વિના ન હિ ॥ ૫૩॥

શિવેતિ નામપીયૂષવર્ષધારાપરિપ્લુતાઃ ।
સંસારદવમધ્યેઽપિ ન શોચન્તિ ન સંશયઃ ॥ ૫૪॥

ન ભક્તિઃ શઙ્કરે પુંસાં રાગદ્વેષરતાત્મનામ્ ।
તદ્વિરુદ્ધજનાનાં હિ મુક્તિર્ભવતિ સર્વથા ॥ ૫૫॥

અનન્તજન્મભિર્યેન તપસ્તપ્તં ભવિષ્યતિ ।
તસ્યૈવ ભક્તિર્ભવતિ ભવાનીપ્રાણવલ્લભે ॥ ૫૬॥

જાતાપિ શઙ્કરે ભક્તિરન્યસાધારણી વૃથા ।
પરં ત્વવ્યભિચારેણ શિવભક્તિરપેક્ષિતા ॥ ૫૭॥

યસ્યાસાધારણી શમ્ભૌ ભક્તિરવ્યભિચારિણી ।
તસ્યૈવ મોક્ષઃ સુલભો નાન્યસ્યેતિ મતિર્મમ ॥ ૫૮॥

કૃત્વાપ્યનન્તપાપાનિ યદિ ભક્તિર્મહેશ્વરે ।
સર્વપાપવિનિર્મુક્તો ભવત્યેવ ન સંશયઃ ॥ ૫૯॥

ભવન્તિ ભસ્મસાદ્ વૃક્ષા દવદગ્ધા યથા વને ।
તથા ભવન્તિ દગ્ધાનિ શાઙ્કરાણામઘાન્યપિ ॥ ૬૦॥

યો નિત્યં ભસ્મપૂતાઙ્ગો શિવપૂજોન્મુખો ભવેત્ ।
સ તરત્યેવ સંસારમપારમતિદારુણમ્ ॥ ૬૧॥

બ્રહ્મસ્વહરણં કૃત્વા હત્વાપિ બ્રાહ્મણાન્બહૂન્ ।
ન લિપ્યતે નરઃ પાપૈર્વિરૂપાક્ષસ્ય સેવકઃ ॥ ૬૨॥

વિલોક્ય વેદાનખિલાન્ શિવસ્યૈવાર્ચનં પરમ્ ।
સંસારનાશનોપાય ઇતિ પૂર્વૈર્વિનિશ્ચિતમ્ ॥ ૬૩॥

અદ્યપ્રભૃતિ યત્નેન સાવધાનો યથાવિધિ ।
સામ્બં સદાશિવં ભક્ત્યા ભજ નિત્યં મહેશ્વરમ્ ॥ ૬૪॥

આપાદમસ્તકં સમ્યગ્ભસ્મનોદ્ધૂલ્ય સાદરમ્ ।
સર્વશ્રુતિશ્રુતં શૈવં મન્ત્રં જપ ષડક્ષરમ્ ॥ ૬૫॥

સર્વાઙ્ગેષુ પ્રયત્નેન રુદ્રાક્ષાન્ શિવવલ્લભાન્ ।
ધારયસ્વાતિસદ્ભક્ત્યા સમન્ત્રં વિધિપૂર્વકમ્ ॥ ૬૬॥

શ ૃણુ શૈવીં કથાં નિત્યં વદ શૈવીં કથાં સદા ।
પૂજયસ્વાતિયત્નેન શિવભક્તાન્પુનઃ પુનઃ ॥ ૬૭॥

અપ્રમાદેન સતતં શિવૈકશરણો ભવ ।
શિવાર્ચનેન સતતમાનન્દઃ પ્રાપ્યતે યતઃ ॥ ૬૮॥

ઉરસ્યાધાય વિશદે શિવસ્ય ચરણામ્બુજૌ ।
શિવતીર્થાનિ વિચર પ્રથમં મુનિસત્તમ ॥ ૬૯॥

પશ્યન્માહાત્મ્યમતુલં શઙ્કરસ્ય પરાત્મનઃ ।
ગચ્છાનન્દવનં પશ્ચાચ્છમ્ભુપ્રિયતમં મુને ॥ ૭૦॥

તત્ર વિશ્વેશ્વરં દૃષ્ટ્વા પૂજનં કુરુ ભક્તિતઃ ।
નત્વા સ્તુત્વા વિશેષેણ નિર્વિકલ્પો ભવિષ્યસિ ॥ ૭૧॥

તતશ્ચ ભવતા નૂનં વિધેયં ગમનં મુને ।
બ્રહ્મલોકે સ્વકામાર્થં શાસનાન્મમ ભક્તિતઃ ॥ ૭૨॥

નત્વા સ્તુત્વા વિશેષેણ વિધિં સ્વજનકં મુને ।
પ્રષ્ટવ્યં શિવમાહાત્મ્યં બહુશઃ પ્રીતચેતસા ॥ ૭૩॥

સ શૈવપ્રવરો બ્રહ્મા માહાત્મ્યં શઙ્કરસ્ય તે ।
શ્રાવયિષ્યતિ સુપ્રીત્યા શતનામસ્તવં ચ હિ ॥ ૭૪॥

અદ્યતસ્ત્વં ભવ મુને શૈવઃ શિવપરાયણઃ ।
મુક્તિભાગી વિશેષેણ શિવસ્તે શં વિધાસ્યતિ ॥ ૭૫॥

ઇત્થં વિષ્ણુર્મુનિં પ્રીત્યા હ્યુપદિશ્ય પ્રસન્નધીઃ ।
સ્મૃત્વા નુત્વા શિવં સ્તુત્વા તતસ્ત્વન્તરધીયત ॥ ૭૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને નારદાય વિષ્ણૂપદેશવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૧.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૫. પઞ્ચમોઽધ્યાયઃ । નારદસ્ય કાશીક્ષેત્રગમનમ્ ।

સૂત ઉવાચ ।
અન્તર્હિતે હરૌ વિપ્રા નારદો મુનિસત્તમઃ ।
વિચચાર મહીં પશ્યન્ શિવલિઙ્ગાનિ ભક્તિતઃ ॥ ૧॥

પૃથિવ્યા અટનં કૃત્વા શિવરૂપાણ્યનેકશઃ ।
દદર્શ પ્રીતિતો વિપ્રા ભુક્તિમુક્તિપ્રદાનિ સઃ ॥ ૨॥

અથ તં વિચરન્તં કૌ નારદં દિવ્યદર્શનમ્ ।
જ્ઞાત્વા શમ્ભુગણૌ તૌ તુ સુચિત્તમુપજગ્મતુઃ ॥ ૩॥

શિરસા સુપ્રણમ્યાશુ ગણાવૂચતુરાદરાત્ ।
ગૃહીત્વા ચરણૌ તસ્ય શાપોદ્ધારેચ્છયા ચ તૌ ॥ ૪॥

શિવગણાવૂચતુઃ
બ્રહ્મપુત્ર સુરર્ષે હિ શ‍ૃણુ પ્રીત્યાવયોર્વચઃ ।
તવાપરાધકર્તારાવાવાં વિપ્રૌ ન વસ્તુતઃ ॥ ૫॥

આવાં હરગણૌ વિપ્ર તવાગસ્કારિણૌ મુને ।
સ્વયમ્વરે રાજપુત્ર્યા માયામોહિતચેતસા ॥ ૬॥

ત્વયા દત્તશ્ચ નૌ શાપઃ પરેશપ્રેરિતેન હ ।
જ્ઞાત્વા કુસમયં તત્ર મૌનમેવ હિ જીવનમ્ ॥ ૭॥

સ્વકર્મણઃ ફલં પ્રાપ્તં કસ્યાપિ ન હિ દૂષણમ્ ।
સુપ્રસન્નો ભવ વિભો કુર્વનુગ્રહમદ્ય નૌ ॥ ૮॥

સૂત ઉવાચ ।
વચ આકર્ણ્ય ગણયોરિતિ ભક્ત્યુક્તમાદરાત્ ।
પ્રત્યુવાચ મુનિઃ પ્રીત્યા પશ્ચાત્તાપમવાપ્ય સઃ ॥ ૯॥

નારદ ઉવાચ ।
શ‍ૃણુતં મે મહાદેવગણૌ માન્યતમૌ સતામ્ ।
વચનં સુખદં મોહનિર્મુક્તં ચ યથાર્થકમ્ ॥ ૧૦॥

પુરા મમ મતિર્ભ્રષ્ટાસીચ્છિવેચ્છાવશાદ્ ધ્રુવમ્ ।
સર્વથા મોહમાપન્નઃ શપ્તવાન્વાં કુશેમુષિઃ ॥ ૧૧॥

યદુક્તં તત્તથા ભાવિ તથાપિ શ‍ૃણુતાં ગણૌ ।
શાપોદ્ધારમહં વચ્મિ ક્ષમેથામદ્યમદ્ય મે ॥ ૧૨॥

વીર્યાન્મુનિવરસ્યાપ્વા રાક્ષસેશત્વમાદિશમ્ ।
સ્યાતાં વિભવસંયુક્તૌ બલિનૌ સુપ્રતાપિનૌ ॥ ૧૩॥

સર્વબ્રહ્માણ્ડરાજાનૌ શિવભક્તૌ જિતેન્દ્રિયૌ ।
શિવાપરતનોર્મૃત્યું પ્રાપ્ય સ્વં પદમાપ્સ્યથઃ ॥ ૧૪॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય મુનેર્વાક્યં નારદસ્ય મહાત્મનઃ ।
ઉભૌ હરગણૌ પ્રીતૌ સ્વં પદં જગ્મતુર્મુદા ॥ ૧૫॥

નારદોઽપિ પરં પ્રીતો ધ્યાયન્ શિવમનન્યધીઃ ।
વિચચાર મહીં પશ્યન્ શિવતીર્થાન્યભીક્ષ્ણશઃ ॥ ૧૬॥

કાશીં પ્રાપ્યાથ સ મુનિઃ સર્વોપરિવિરાજિતામ્ ।
શિવપ્રિયાં શમ્ભુસુખપ્રદાં શમ્ભુસ્વરૂપિણીમ્ ॥ ૧૭॥

દૃષ્ટ્વા કાશીં કૃતાર્થોઽભૂત્કાશીનાથં દદર્શ હ ।
આનર્ચ પરમપ્રીત્યા પરમાનન્દસંયુતઃ ॥ ૧૮॥

સમુદઃ સેવ્ય તાં કાશીં કૃતાર્થો મુનિસત્તમઃ ।
નમન્સંવર્ણયન્ભક્ત્યા સંસ્મરન્પ્રેમવિહ્વલઃ ॥ ૧૯॥

બ્રહ્મલોકં જગામાથ શિવસ્મરણસન્મતિઃ ।
શિવતત્ત્વં વિશેષેણ જ્ઞાતુમિચ્છુઃ સ નારદઃ ॥ ૨૦॥

નત્વા તત્ર વિધિં ભક્ત્યા સ્તુત્વા ચ વિવિધૈસ્તવૈઃ ।
પપ્રચ્છ શિવસત્તત્ત્વં શિવસંયુક્તમાનસઃ ॥ ૨૧॥

નારદ ઉવાચ ।
બ્રહ્મન્બ્રહ્મસ્વરૂપજ્ઞ પિતામહ જગત્પ્રભો ।
ત્વત્પ્રસાદાન્મયા સર્વં વિષ્ણોર્માહાત્મ્યમુત્તમમ્ ॥ ૨૨॥

ભક્તિમાર્ગં જ્ઞાનમાર્ગં તપોમાર્ગં સુદુસ્તરમ્ ।
દાનમાર્ગં ચ તીર્થાનાં માર્ગં ચ શ્રુતવાનહમ્ ॥ ૨૩॥

ન જ્ઞાતં શિવતત્ત્વં ચ પૂજાવિધિમતઃ ક્રમાત્ ।
ચરિત્રં વિવિધં તસ્ય નિવેદય મમ પ્રભો ॥ ૨૪॥

નિર્ગુણોઽપિ શિવસ્તાત સગુણઃ શઙ્કરઃ કથમ્ ।
શિવતત્ત્વં ન જાનામિ મોહિતઃ શિવમાયયા ॥ ૨૫॥

સૃષ્ટેઃ પૂર્વં કથં શમ્ભુઃ સ્વરૂપેણ પ્રતિષ્ઠિતઃ ।
સૃષ્ટિમધ્યે સ હિ કથં ક્રીડન્સંવર્તતે પ્રભુઃ ॥ ૨૬॥

તદન્તે ચ કથં દેવઃ સ તિષ્ઠતિ મહેશ્વરઃ ।
કથં પ્રસન્નતાં યાતિ શઙ્કરો લોકશઙ્કરઃ ॥ ૨૭॥

સન્તુષ્ટશ્ચ સ્વભક્તેભ્યઃ પરેભ્યશ્ચ મહેશ્વરઃ ।
કિં ફલં યચ્છતિ વિધે તત્સર્વં કથયસ્વ મે ॥ ૨૮॥

સદ્યઃ પ્રસન્નો ભગવાન્ભવતીત્યનુસંશ્રુતમ્ ।
ભક્તપ્રયાસં સ મહાન્ન પશ્યતિ દયાપરઃ ॥ ૨૯॥

બ્રહ્મા વિષ્ણુર્મહેશશ્ચ ત્રયો દેવાઃ શિવાંશજાઃ ।

મહેશસ્તત્ર પૂર્ણાંશઃ સ્વયમેવ શિવઃ પરઃ ॥ ૩૦॥

તસ્યાવિર્ભાવમાખ્યાહિ ચરિતાનિ વિશેષતઃ ।
ઉમાવિર્ભાવમાખ્યાહિ તદ્વિવાહં તથા વિભો ॥ ૩૧॥

તદ્ગાર્હસ્થ્યં વિશેષેણ તથા લીલાઃ પરા અપિ ।
એતત્સર્વં તથાન્યચ્ચ કથનીયં ત્વયાનઘ ॥ ૩૨॥

તદુત્પત્તિં વિવાહં ચ શિવાયાસ્તુ વિશેષતઃ ।
પ્રબ્રૂહિ મે પ્રજાનાથ ગુહજન્મ તથૈવ ચ ॥ ૩૩॥

બહુભ્યશ્ચ શ્રુતં પૂર્વં ન તૃપ્તોઽસ્મિ જગત્પ્રભો ।
અતસ્ત્વાં શરણં પ્રાપ્તઃ કૃપાં કુરુ મમોપરિ ॥ ૩૪॥

ઇતિ શ્રુત્વા વચસ્તસ્ય નારદસ્યાઙ્ગજસ્ય હિ ।
ઉવાચ વચનં તત્ર બ્રહ્મા લોકપિતામહઃ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને નારદપ્રશ્નવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૨.૧.૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૬. ષષ્ઠોઽધ્યાયઃ । વિષ્ણૂત્પત્તિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
ભો બ્રહ્મન્સાધુ પૃષ્ટોઽહં ત્વયા વિબુધસત્તમ ।
લોકોપકારિણા નિત્યં લોકાનાં હિતકામ્યયા ॥ ૧॥

યચ્છ્રુત્વા સર્વલોકાનાં સર્વપાપક્ષયો ભવેત્ ।
તદહં તે પ્રવક્ષ્યામિ શિવતત્ત્વમનામયમ્ ॥ ૨॥

શિવતત્ત્વં મયા નૈવ વિષ્ણુનાપિ યથાર્થતઃ ।
જ્ઞાતં ચ પરમં રૂપમદ્ભુતં ચ પરેણ ન ॥ ૩॥

મહાપ્રલયકાલે ચ નષ્ટે સ્થાવરજઙ્ગમે ।
આસીત્તમોમયં સર્વમનર્કગ્રહતારકમ્ ॥ ૪॥

અચન્દ્રમનહોરાત્રમનગ્ન્યનિલભૂજલમ્ ।
અપ્રધાનં વિયચ્છૂન્યમન્યતેજોવિવર્જિતમ્ ॥ ૨॥

અદૃષ્ટત્વાદિરહિતં શબ્દસ્પર્શસમુજ્ઝિતમ્ ।
અવ્યક્તગન્ધરૂપં ચ રસત્યક્તમદિઙ્મુખમ્ ॥ ૬॥

ઇત્થં સત્યન્ધતમસે સૂચીભેદ્યે નિરન્તરે ।
તત્સદ્બ્રહ્મેતિ યચ્છ્રુત્વા સદેકં પ્રતિપદ્યતે ॥ ૭॥

ઇતીદૃશં યદા નાસીદ્યત્તત્સદસદાત્મકમ્ ।
યોગિનોઽન્તર્હિતાકાશે યત્પશ્યન્તિ નિરન્તરમ્ ॥ ૮॥

અમનોગોચરં વાચાં વિષયં ન કદાચન ।
અનામરૂપવર્ણં ચ ન ચ સ્થૂલં ન યત્કૃશમ્ ॥ ૯॥

અહ્રસ્વદીર્ઘમલઘુ ગુરુત્વપરિવર્જિતમ્ ।
ન યત્રોપચયઃ કશ્ચિત્તથા નોપચયોઽપિ ચ ॥ ૧૦॥

અભિધત્તે સચકિતં યદસ્તીતિ શ્રુતિઃ પુનઃ ।
સત્યં જ્ઞાનમનન્તં ચ પરાનન્દં પરં મહઃ ॥ ૧૧॥

અપ્રમેયમનાધારમવિકારમનાકૃતિ ।
નિર્ગુણં યોગિગમ્યં ચ સર્વવ્યાપ્યેકકારકમ્ ॥ ૧૨॥

નિર્વિકલ્પં નિરારમ્ભં નિર્માયં નિરુપદ્રવમ્ ।
અદ્વિતીયમનાદ્યન્તમવિકાશં ચિદાત્મકમ્ ॥ ૧૩॥

યસ્યેત્થં સંવિકલ્પન્તે સંજ્ઞાસંજ્ઞોક્તિતઃ સ્મ વૈ ।
કિયતા ચૈવ કાલેન દ્વિતીયેચ્છાઽભવત્કિલ ॥ ૧૪॥

અમૂર્તેન સ્વમૂર્તિશ્ચ તેનાકલ્પિ સ્વલીલયા ।
સર્વૈશ્વર્યગુણોપેતા સર્વજ્ઞાનમયી શુભા ॥ ૧૫॥

સર્વગા સર્વરૂપા ચ સર્વદૃક્સર્વકારિણી ।
સર્વૈકવન્દ્યા સર્વાદ્યા સર્વદા સર્વસંસ્કૃતિઃ ॥ ૧૬॥

પરિકલ્પ્યેતિ તાં મૂર્તિમૈશ્વરીં શુદ્ધરૂપિણીમ્ ।
અદ્વિતીયમનાદ્યન્તં સર્વાભાસં ચિદાત્મકમ્ ।
અન્તર્દધે પરાખ્યં યદ્ બ્રહ્મ સર્વગમવ્યયમ્ ॥ ૧૭॥

અમૂર્તે યત્પરાખ્યં વૈ તસ્ય મૂર્તિઃ સદાશિવઃ ।

અર્વાચીનાઃ પરાચીના ઈશ્વરં તં જગુર્બુધાઃ ॥ ૧૮॥

શક્તિસ્તદૈકલેનાપિ સ્વૈરં વિહરતા તનુઃ ।
સ્વવિગ્રહાત્સ્વયં સૃષ્ટા સ્વશરીરાનપાયિની ॥ ૧૯॥

પ્રધાનં પ્રકૃતિં તાં ચ માયાં ગુણવતીં પરામ્ ।
બુદ્ધિતત્ત્વસ્ય જનનીમાહુર્વિકૃતિવર્જિતામ્ ॥ ૨૦॥

સા શક્તિરમ્બિકા પ્રોક્તા પ્રકૃતિઃ સકલેશ્વરી ।
ત્રિદેવજનની નિત્યા મૂલકારણમિત્યુત ॥ ૨૧॥

અસ્યા અષ્ટૌ ભુજાશ્ચાસન્વિચિત્રવદના શુભા ।
રાકાચન્દ્રસહસ્રસ્ય વદને ભાશ્ચ નિત્યશઃ ॥ ૨૨॥

નાનાભરણસંયુક્તા નાનાગતિસમન્વિતા ।
નાનાયુધધરા દેવી ફુલ્લપઙ્કજલોચના ॥ ૨૩॥

અચિન્ત્યતેજસા યુક્તા સર્વયોનિઃ સમુદ્યતા ।
એકાકિની યદા માયા સંયોગાચ્ચાપ્યનેકિકા ॥ ૨૪॥

પરઃ પુમાનીશ્વરઃ સ શિવઃ શમ્ભુરનીશ્વરઃ ।
શીર્ષે મન્દાકિનીધારી ભાલચન્દ્રસ્ત્રિલોચનઃ ॥ ૨૫॥

પઞ્ચવક્ત્રઃ પ્રસન્નાત્મા દશબાહુસ્ત્રિશૂલધૃક્ ।
કર્પૂરગૌરસુસિતો ભસ્મોદ્ધૂલિતવિગ્રહઃ ॥ ૨૬॥

યુગપચ્ચ તયા શક્ત્યા સાકં કાલસ્વરૂપિણા ।
શિવલોકાભિધં ક્ષેત્રં નિર્મિતં તેન બ્રહ્મણા ॥ ૨૭॥

તદેવ કાશિકેત્યેતત્પ્રોચ્યતે ક્ષેત્રમુત્તમમ્ ।
પરં નિર્વાણસઙ્ખ્યાનં સર્વોપરિ વિરાજિતમ્ ॥ ૨૮॥

તાભ્યાં ચ રમમાણાભ્યાં તસ્મિન્ક્ષેત્રે મનોરમે ।
પરમાનન્દરૂપાભ્યાં પરમાનન્દરૂપિણમ્ ॥ ૨૯॥

મુને પ્રલયકાલેઽપિ ન તત્ક્ષેત્રં કદાચન ।
વિમુક્તં હિ શિવાભ્યાં યદવિમુક્તં તતો વિદુઃ ॥ ૩૦॥

અસ્યાનન્દવનં નામ પુરાકારિ પિનાકિના ।
ક્ષેત્રસ્યાનન્દહેતુત્વાદવિમુક્તમનન્તરમ્ ॥ ૩૧॥

અથાનન્દવને તસ્મિન્ શિવયો રમમાણયોઃ ।
ઇચ્છેત્યભૂત્સુરર્ષે હિ સૃજ્યઃ કોઽપ્યપરઃ કિલ ॥ ૩૨॥

યસ્મિન્ ન્યસ્ય મહાભારમાવાં સ્વસ્વૈરચારિણૌ ।
નિર્વાણધારણં કુર્વઃ કેવલં કાશિશાયિનૌ ॥ ૩૩॥

સ એવ સર્વં કુરુતાં સ એવ પરિપાતુ ચ ।
સ એવ સંવૃણોત્વન્તે મદનુગ્રહતઃસદા ॥ ૩૪॥

ચેતઃ સમુદ્રમાકુઞ્ચ્ય ચિન્તાકલ્લોલલોલિતમ્ ।
સત્ત્વરત્નં તમોગ્રાહં રજોવિદ્રુમવલ્લિતમ્ ॥ ૩૫॥

યસ્ય પ્રસાદાત્તિષ્ઠાવઃ સુખમાનન્દકાનને ।
પરિક્ષિપ્તમનોવૃત્તૌ બહિશ્ચિન્તાતુરે સુખમ્ ॥ ૩૬॥

સમ્પ્રધાર્યેતિ સ વિભુસ્તયા શક્ત્યા પરેશ્વરઃ ।
સવ્યે વ્યાપારયાઞ્ચક્રે દશમેઽઙ્ગે સુધાસવમ્ ॥ ૩૭॥

તતઃ પુમાનાવિરાસીદેકસ્ત્રૈલોક્યસુન્દરઃ ।
શાન્તઃસત્ત્વગુણોદ્રિક્તો ગામ્ભીર્યામિતસાગરઃ ॥ ૩૮॥

તથા ચ ક્ષમયા યુક્તો મુનેઽલબ્ધોપમોઽભવત્ ।
ઇન્દ્રનીલદ્યુતિઃ શ્રીમાન્પુણ્ડરીકોત્તમેક્ષણઃ ॥ ૩૯॥

સુવર્ણકાન્તિભૃચ્છ્રેષ્ઠદુકૂલયુગલાવૃતઃ ।
લસત્પ્રચણ્ડદોર્દણ્ડયુગલો હ્યપરાજિતઃ ॥ ૪૦॥

તતઃ સ પુરુષઃ શમ્ભું પ્રણમ્ય પરમેશ્વરમ્ ।
નામાનિ કુરુ મે સ્વામિન્વદ કર્મ જગાવતિ ॥ ૪૧॥

તચ્છ્રુત્વા વચનં પ્રાહ શઙ્કરઃ પ્રહસન્પ્રભુઃ ।
પુરુષં તં મહેશાનો વાચા મેઘગભીરયા ॥ ૪૨॥

શિવ ઉવાચ ।
વિષ્ણ્વિતિ વ્યાપકત્વાત્તે નામ ખ્યાતં ભવિષ્યતિ ।
બહૂન્યન્યાનિ નામાનિ ભક્તસૌખ્યકરાણિ હ ॥ ૪૩॥

તપઃ કુરુ દૃઢો ભૂત્વા પરમં કાર્યસાધનમ્ ।
ઇત્યુક્ત્વા શ્વાસમાર્ગેણ દદૌ ચ નિગમં તતઃ ॥ ૪૪॥

તતોઽચ્યુતઃ શિવં નત્વા ચકાર વિપુલં તપઃ ।

અન્તર્ધાનં ગતઃ શક્ત્યા સલોકઃ પરમેશ્વરઃ ॥ ૪૫॥

દિવ્યં દ્વાદશસાહસ્રં વર્ષં તસ્વાપિ ચાચ્યુતઃ ।
ન પ્રાપ સ્વાભિલષિતં સર્વદં શમ્ભુદર્શનમ્ ॥ ૪૬॥

તતઃ સંશયમાપન્નશ્ચિન્તિતં હૃદિ સાદરમ્ ।
મયાદ્ય કિં પ્રકર્તવ્યમિતિ વિષ્ણુઃ શિવં સ્મરન્ ॥ ૪૭॥

એતસ્મિન્નન્તરે વાણી સમુત્પન્ના શિવાચ્છુભા ।
તપઃ પુનઃ પ્રકર્તવ્યં સંશયસ્યાપનુત્તયે ॥ ૪૮॥

તતસ્તેન ચ તચ્છ્રુત્વા તપસ્તપ્તં સુદારુણમ્ ।
બહુકાલં તદા બ્રહ્મધ્યાનમાર્ગપરેણ હિ ॥ ૪૯॥

તતઃ સ પુરુષો વિષ્ણુઃ પ્રબુદ્ધો ધ્યાનમાર્ગતઃ ।
સુપ્રીતો વિસ્મયં પ્રાપ્તઃ કિં યત્તત્ત્વમહો ઇતિ ॥ ૫૦॥

પરિશ્રમવતસ્તસ્ય વિષ્ણોઃ સ્વાઙ્ગેભ્ય એવ ચ ।
જલધારા હિ સંયાતા વિવિધાઃ શિવમાયયા ॥ ૫૧॥

અભિવ્યાપ્તં ચ સકલં શૂન્યં યત્તન્મહામુને ।
બ્રહ્મરૂપં જલમભૂત્સ્પર્શનાત્પાપનાશનમ્ ॥ ૫૨॥

તદા શ્રાન્તશ્ચ પુરુષો વિષ્ણુસ્તસ્મિઞ્જલે સ્વયમ્ ।
સુષ્વાપ પરમપ્રીતો બહુકાલં વિમોહિતઃ ॥ ૫૩॥

નારાયણેતિ નામાપિ તસ્યાસીચ્છ્રુતિસમ્મતમ્ ।
નાન્યત્કિઞ્ચિત્તદા હ્યાસીત્પ્રાકૃતં પુરુષં વિના ॥ ૫૪॥

એતસ્મિન્નન્તરે કાલે તત્ત્વાન્યાસન્મહાત્મનઃ ।
તત્પ્રકારં શૃણુ પ્રાજ્ઞ ગદતો મે મહામતે ॥ ૫૫॥

પ્રકૃતેશ્ચ મહાનાસીન્મહતશ્ચ ગુણાસ્ત્રયઃ ।
અહઙ્કારસ્તતો જાતસ્ત્રિવિધો ગુણભેદતઃ ॥ ૫૬॥

તન્માત્રશ્ચ તતો જાતાઃ પઞ્ચ ભૂતાનિ વૈ તતઃ ।
તદૈવ તાનીન્દ્રિયાણિ જ્ઞાનકર્મમયાનિ ચ ॥ ૫૭॥

તત્ત્વાનામિતિ સઙ્ખ્યાનમુક્તં તે ઋષિસત્તમ ।
જડાત્મકં ચ તત્સર્વં પ્રકૃતેઃ પુરુષં વિના ॥ ૫૮॥

તત્તદૈકીકૃતં તત્ત્વં ચતુર્વિંશતિસઙ્ખ્યકમ્ ।
શિવેચ્છયા ગૃહીત્વા સ સુષ્વાપ બ્રહ્મરૂપકે ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટિવ્યાખ્યાને વિષ્ણૂત્પત્તિવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૧.૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૭. સપ્તમોઽધ્યાયઃ । વિષ્ણુબ્રહ્મવિવાદવર્ણનમ્ ।

બ્રહ્મોવાચ ।
સુપ્તે નારાયણે દેવે નાભૌ પઙ્કજમુત્તમમ્ ।
આવિર્બભૂવ સહસા બૃહદ્વૈ શઙ્કરેચ્છયા ॥ ૧॥

અનન્તયષ્ટિકાયુક્તં કર્ણિકારસમપ્રભમ્ ।
અનન્તયોજનાયામમનન્તોચ્છ્રાયસંયુતમ્ ॥ ૨॥

કોટિસૂર્યપ્રતીકાશં સુન્દરં તત્ત્વસંયુતમ્ ।
અત્યદ્ભુતં મહારમ્યં દર્શનીયમનુત્તમમ્ ॥ ૩॥

કૃત્વા યત્નં પૂર્વવત્સ શઙ્કરઃ પરમેશ્વરઃ ।
દક્ષિણાઙ્ગાન્નિજાન્માં વૈ સામ્બઃ શમ્ભુરજીજનત્ ॥ ૪॥

સ માયામોહિતં કૃત્વા માં મહેશો દ્રુતં મુને ।
તન્નાભિપઙ્કજાદાવિર્ભાવયામાસ લીલયા ॥ ૫॥

એવં પદ્માત્તતો જજ્ઞે પુત્રોઽહં હેમગર્ભકઃ ।
ચતુર્મુખો રક્તવર્ણસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ॥ ૬॥

તન્માયામોહિતશ્ચાહં નાવિદં કમલં વિના ।
સ્વદેહજનકં તાત પિતરં જ્ઞાનદુર્બલઃ ॥ ૭॥

કોઽહં વા કુત આયાતઃ કિં કાર્યં તુ મદીયકમ્ ।
કસ્ય પુત્રોઽહમુત્પન્નઃ કેનૈવ નિર્મિતોઽધુના ॥ ૮॥

ઇતિ સંશયમાપન્નં બુદ્ધિર્માં સમપદ્યત ।

કિમર્થં મોહમાયામિ તજ્જ્ઞાનં સુકરં ખલુ ॥ ૯॥

એતત્કમલપુષ્પસ્ય પત્રારોહસ્થલં હ્યધઃ ।
મત્કર્તા ચ સ વૈ તત્ર ભવિષ્યતિ ન સંશયઃ ॥ ૧૦॥

ઇતિ બુદ્ધિં સમાસ્થાય કમલાદવરોહયમ્ ।
નાલે નાલે ગતસ્તત્ર વર્ષાણાં શતકં મુને ॥ ૧૧॥

ન લબ્ધં તુ મયા તત્ર કમલસ્થાનમુત્તમમ્ ।
સંશયં ચ પુનઃ પ્રાપ્તઃ કમલે ગન્તુમુત્સુકઃ ॥ ૧૨॥

આરુરોહાથ કમલં નાલમાર્ગેણ વૈ મુને ।
કુડ્મલં કમલસ્યાથ લબ્ધવાન્ન વિમોહિતઃ ॥ ૧૩॥

નાલમાર્ગેણ ભ્રમતો ગતં વર્ષશતં પુનઃ ।
ક્ષણમાત્રં તદા તત્ર તતસ્તિષ્ઠન્વિમોહિતઃ ॥ ૧૪॥

તદા વાણી સમુત્પન્ના તપેતિ પરમા શુભા ।
શિવેચ્છયા પરા વ્યોમ્નો મોહવિધ્વંસિની મુને ॥ ૧૫॥

તચ્છ્રુત્વા વ્યોમવચનં દ્વાદશાબ્દં પ્રયત્નતઃ ।
પુનસ્તપ્તં તપો ઘોરં દ્રષ્ટું સ્વજનકં તદા ॥ ૧૬॥

તદા હિ ભગવાન્વિષ્ણુશ્ચતુર્બાહુઃ સુલોચનઃ ।
મય્યેવાનુગ્રહં કર્તું દ્રુતમાવિર્બભૂવ હ ॥ ૧૭॥

શઙ્ખચક્રાયુધકરો ગદાપદ્મધરઃ પરઃ ।
ઘનશ્યામલસર્વાઙ્ગઃ પીતામ્બરધરઃ પરઃ ॥ ૧૮॥

મુકુટાદિમહાભૂષઃ પ્રસન્નમુખપઙ્કજઃ ।
કોટિકન્દર્પસઙ્કાશઃસન્દૃષ્ટો મોહિતેન સઃ ॥ ૧૯॥

તદ્ દૃષ્ટ્વા સુન્દરં રૂપં વિસ્મયં પરમં ગતઃ ।
કાલાભં કાઞ્ચનાભં ચ સર્વાત્માનં ચતુર્ભુજમ્ ॥ ૨૦॥

તથાભૂતમહં દૃષ્ટ્વા સદસન્મયમાત્મના ।
નારાયણં મહાબાહું હર્ષિતો હ્યભવં તદા ॥ ૨૧॥

માયયા મોહિતઃ શમ્ભોસ્તદા લીલાત્મનઃ પ્રભોઃ ।
અવિજ્ઞાય સ્વજનકં તમવોચં પ્રહર્ષિતઃ ॥ ૨૨॥

બ્રહ્મોવાચ ।
કસ્ત્વં વદેતિ હસ્તેન સમુત્થાપ્ય સનાતનમ્ ।
તદા હસ્તપ્રહારેણ તીવ્રેણ સુદૃઢેન તુ ॥ ૨૩॥

પ્રબુદ્ધ્યોત્થાય શયનાત્સમાસીનઃ ક્ષણં વશી ।
દદર્શ નિદ્રાવિક્લિન્ન નીરજામલલોચનઃ ॥ ૨૪॥

મામત્ર સંસ્થિતં ભાસાધ્યાસિતો ભગવાન્હરિઃ ।
આહ ચોત્થાય બ્રહ્માણં હસન્માં મધુરં સકૃત્ ॥ ૨૫॥

વિષ્ણુરુવાચ ।
સ્વાગતં સ્વાગતં વત્સ પિતામહ મહાદ્યુતે ।
નિર્ભયો ભવ દાસ્યેઽહં સર્વાન્કામાન્ન સંશયઃ ॥ ૨૬॥

તસ્ય તદ્વચનં શ્રુત્વા સ્મિતપૂર્વં સુરર્ષભઃ ।
રજસા બદ્ધવૈરશ્ચ તમવોચં જનાર્દનમ્ ॥ ૨૭॥

બ્રહ્મોવાચ ।
ભાષસે વત્સ વત્સેતિ સર્વસંહારકારણમ્ ।
મામિહાતિ સ્મિતં કૃત્વા ગુરુઃ શિષ્યમિવાનઘ ॥ ૨૮॥

કર્તારં જગતાં સાક્ષાત્પ્રકૃતેશ્ચ પ્રવર્તકમ્ ।
સનાતનમજં વિષ્ણું વિરિઞ્ચિં વિષ્ણુસમ્ભવમ્ ॥ ૨૯॥

વિશ્વાત્માનં વિધાતારં ધાતારં પઙ્કજેક્ષણમ્ ।
કિમર્થં ભાષસે મોહાદ્વક્તુમર્હસિ સત્વરમ્ ॥ ૩૦॥

વેદો માં વક્તિ નિયમાત્સ્વયમ્ભુવમજં વિભુમ્ ।
પિતામહં સ્વરાજં ચ પરમેષ્ઠિનમુત્તમમ્ ॥ ૩૧॥

ઇત્યાકર્ણ્ય હરિર્વાક્યં મમ ક્રુદ્ધો રમાપતિઃ ।
સોઽપિ મામાહ જાને ત્વાં કર્તારમિતિ લોકતઃ ॥ ૩૨॥

વિષ્ણુરુવાચ ।
કર્તું ધર્તું ભવાનઙ્ગાદવતીર્ણો મમાવ્યયાત્ ।
વિસ્મૃતોઽસિ જગન્નાથં નારાયણમનામયમ્ ॥ ૩૩॥

પુરુષં પરમાત્માનં પુરુહૂતં પુરુષ્ટુતમ્ ।
વિષ્ણુમચ્યુતમીશાનં વિશ્વસ્ય પ્રભવોદ્ભવમ્ ॥ ૩૪॥

નારાયણં મહાબાહું સર્વવ્યાપકમીશ્વરમ્ ।
મન્નાભિપદ્મતસ્ત્વં હિ પ્રસૂતો નાત્ર સંશયઃ ॥ ૩૫॥

તવાપરાધો નાસ્ત્યત્ર ત્વયિ માયાકૃતં મમ ।
શૃણુ સત્યં ચતુર્વક્ત્ર સર્વદેવેશ્વરો હ્યહમ્ ॥ ૩૬॥

કર્તા હર્તા ચ ભર્તા ચ ન મયાસ્તિ સમો વિભુઃ ।
અહમેવ પરં બ્રહ્મ પરં તત્ત્વં પિતામહ ॥ ૩૭॥

અહમેવ પરં જ્યોતિઃ પરમાત્મા ત્વહં વિભુઃ ।
અદ્ય દૃષ્ટં શ્રુતં સર્વં જગત્યસ્મિંશ્ચરાચરમ્ ॥ ૩૮॥

તત્તદ્વિદ્ધિ ચતુર્વક્ત્ર સર્વં મન્મયમિત્યથ ।
મયા સૃષ્ટં પુરાવ્યક્તં ચતુર્વિંશતિતત્ત્વકમ્ ॥ ૩૯॥

નિત્યં તેષ્વણવો બદ્ધાઃ સૃષ્ટાઃ ક્રોધભયાદયઃ ।
પ્રભાવાચ્ચ ભવાનઙ્ગાન્યનેકાનીહ લીલયા ॥ ૪૦॥

સૃષ્ટા બુદ્ધિર્મયા તસ્યામહઙ્કારસ્ત્રિધા તતઃ ।
તન્માત્રં પઞ્ચકં તસ્માન્મનો દેહેન્દ્રિયાણિ ચ ॥ ૪૧॥

આકાશાદીનિ ભૂતાનિ ભૌતિકાનિ ચ લીલયા ।
ઇતિ બુદ્ધ્વા પ્રજાનાથ શરણં વ્રજ મે વિધે ॥ ૪૨॥

અહં ત્વાં સર્વદુઃખેભ્યો રક્ષિષ્યામિ ન સંશયઃ ।
બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય બ્રહ્મા ક્રોધસમન્વિતઃ ।
કો વા ત્વમિતિ સમ્ભર્ત્સ્યાબ્રુવં માયાવિમોહિતઃ ॥ ૪૩॥

કિમર્થં ભાષસે ભૂરિ બહ્વનર્થકરં વચઃ ।
નેશ્વરસ્ત્વં પરં બ્રહ્મ કશ્ચિત્કર્તા ભવેત્તવ ॥ ૪૪॥

માયયા મોહિતશ્ચાહં યુદ્ધં ચક્રે સુદારુણમ્ ।
હરિણા તેન વૈ સાર્ધં શઙ્કરસ્ય મહાપ્રભોઃ ॥ ૪૫॥

એવં મમ હરેશ્ચાસીત્સઙ્ગરો રોમહર્ષણઃ ।
પ્રલયાર્ણવમધ્યે તુ રજસા બદ્ધવૈરયોઃ ॥ ૪૬॥

એતસ્મિન્નન્તરે લિઙ્ગમભવચ્ચાવયોઃ પુરઃ ।
વિવાદશમનાર્થં હિ પ્રબોધાર્થં તથાવયોઃ ॥ ૪૭॥

જ્વાલામાલાસહસ્રાઢ્યં કાલાનલશતોપમમ્ ।
ક્ષયવૃદ્ધિવિનિર્મુક્તમાદિમધ્યાન્તવર્જિતમ્ ॥ ૪૮॥

અનૌપમ્યમનિર્દેશ્યમવ્યક્તં વિશ્વસમ્ભવમ્ ।
તસ્ય જ્વાલાસહસ્રેણ મોહિતો ભગવાન્હરિઃ ॥ ૪૯॥

મોહિતં ચાહ મામત્ર કિમર્થં સ્પર્ધસેઽધુના ।
આગતસ્તુ તૃતીયોઽત્ર તિષ્ઠતાં યુદ્ધમાવયોઃ ॥ ૫૦॥

કુત એવાત્ર સમ્ભૂતઃ પરીક્ષાવોઽગ્નિસમ્ભવમ્ ।
અધો ગમિષ્યામ્યનલસ્તમ્ભસ્યાનુપમસ્ય ચ ॥ ૫૧॥

પરીક્ષાર્થં પ્રજાનાથ તસ્ય વૈ વાયુવેગતઃ ।
ભવાનૂર્ધ્વં પ્રયત્નેન ગન્તુમર્હતિ સત્વરમ્ ॥ ૫૨॥

બ્રહ્મોવાચ ।
એવં વ્યાહૃત્ય વિશ્વાત્મા સ્વરૂપમકરોત્તદા ।
વારાહમહમપ્યાશુ હંસત્વં પ્રાપ્તવાન્મુને ॥ ૫૩॥

તદાપ્રભૃતિ મામાહુર્હંસહંસો વિરાડિતિ ।
હંસ હંસેતિ યો બ્રૂયાત્સ હંસોઽથ ભવિષ્યતિ ॥ ૫૪॥

સુશ્વેતો હ્યનલપ્રખ્યો વિશ્વતઃ પક્ષસંયુતઃ ।
મનોઽનિલજવો ભૂત્વા ગતોર્ધ્વં ચોર્ધ્વતઃ પુરા ॥ ૫૫॥

નારાયણોઽપિ વિશ્વાત્મા સુશ્વેતો હ્યભવત્તદા ।
દશયોજનવિસ્તીર્ણં શતયોજનમાયતમ્ ॥ ૫૬॥

મેરુપર્વતવર્ષ્માણં ગૌરતીક્ષ્ણોગ્રદંષ્ટ્રિણમ્ ।
કાલાદિત્યસમાભાસં દીર્ઘઘોણં મહાસ્વનમ્ ॥ ૫૭॥

હ્રસ્વપાદં વિચિત્રાઙ્ગં જૈત્રં દૃઢમનૌપમમ્ ।
વારાહાકારમાસ્થાય ગતવાંસ્તદધૌ જવાત્ ॥ ૫૮॥

એવં વર્ષસહસ્રં ચ ચરન્વિષ્ણુરધો ગતઃ ।
તદાપ્રભૃતિ લોકેષુ શ્વેતવારાહસંજ્ઞકઃ ॥ ૫૯॥

કલ્પો બભૂવ દેવર્ષે નરાણાં કાલસંજ્ઞકઃ ।
બભ્રામ બહુધા વિષ્ણુઃ પ્રભવિષ્ણુરધોગતઃ ॥ ૬૦॥

નાપશ્યદલ્પમપ્યસ્ય મૂલં લિઙ્ગસ્ય સૂકરઃ ।

તાવત્કાલં ગતશ્ચોર્ધ્વમહમપ્યરિસૂદન ॥ ૬૧॥

સત્વરં સર્વયત્નેન તસ્યાન્તં જ્ઞાતુમિચ્છયા ।
શ્રાન્તો ન દૃષ્ટ્વા તસ્યાન્તમહં કાલાદધોગતઃ ॥ ૬૨॥

તથૈવ ભગવાન્વિષ્ણુઃ શ્રાન્તઃ કમલલોચનઃ ।
સર્વદેવનિભસ્તૂર્ણમુત્થિતઃ સ મહાવપુઃ ॥ ૬૩॥

સમાગતો મયા સાર્ધં પ્રણિપત્ય ભવં મુહુઃ ।
માયયા મોહિતઃ શમ્ભોસ્તસ્થૌ સંવિગ્નમાનસઃ ॥ ૬૪॥

પૃષ્ઠતઃ પાર્શ્વતશ્ચૈવ હ્યગ્રતઃ પરમેશ્વરમ્ ।
પ્રણિપત્ય મયા સાર્ધં સસ્માર કિમિદં ત્વિતિ ॥ ૬૫॥

અનિર્દેશ્યં ચ તદ્રૂપમનામ કર્મવર્જિતમ્ ।
અલિઙ્ગં લિઙ્ગતાં પ્રાપ્તં ધ્યાનમાર્ગેઽપ્યગોચરમ્ ॥ ૬૬॥

સ્વસ્થં ચિત્તં તદા કૃત્વા નમસ્કારપરાયણૌ ।
બભૂવતુરુભાવાવામહં હરિરપિ ધ્રુવમ્ ॥ ૬૭॥

જાનીવો ન હિ તે રૂપં યોઽસિ સોઽસિ મહાપ્રભો ।
નમોઽસ્તુ તે મહેશાન રૂપં દર્શય નૌ ત્વરમ્ ॥ ૬૮॥

એવં શરચ્છતાન્યાસન્નમસ્કારં પ્રકુર્વતોઃ ।
આવયોર્મુનિશાર્દૂલ મદમાસ્થિતયોસ્તદા ॥ ૬૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને વિષ્ણુબ્રહ્મવિવાદવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૧.૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૮. અષ્ટમોઽધ્યાયઃ । શબ્દબ્રહ્મતનુવર્ણનમ્ ।

બ્રહ્મોવાચ ।
એવં તયોર્મુનિશ્રેષ્ઠ દર્શનં કાઙ્ક્ષમાણયોઃ ।
વિગર્વયોશ્ચ સુરયોઃ સદા નૌ સ્થિતયોર્મુને ॥ ૧॥

દયાલુરભવચ્છમ્ભુર્દીનાનાં પ્રતિપાલકઃ ।
ગર્વિણાં ગર્વહર્તા ચ સર્વેષાં પ્રભુરવ્યયઃ ॥ ૨॥

તદા સમભવત્તત્ર નાદો વૈ શબ્દલક્ષણઃ ।
ઓમોમિતિ સુરશ્રેષ્ઠાત્સુવ્યક્તઃ પ્લુતલક્ષણઃ ॥ ૩॥

કિમિદં ત્વિતિ સઞ્ચિન્ત્ય મયા તિષ્ઠન્મહાસ્વનઃ ।
વિષ્ણુઃ સર્વસુરારાધ્યો નિર્વૈરસ્તુષ્ટચેતસા ॥ ૪॥

લિઙ્ગસ્ય દક્ષિણે ભાગે તથાપશ્યત્સનાતનમ્ ।
આદ્યં વર્ણમકારાખ્યમુકારં ચોત્તરે તતઃ ॥ ૫॥

મકારં મધ્યતશ્ચૈવ નાદમન્તેઽસ્ય ચોમિતિ ।
સૂર્યમણ્ડલવદ્ દૃષ્ટ્વા વર્ણમાદ્યં તુ દક્ષિણે ॥ ૬॥

ઉત્તરે પાવકપ્રખ્યમુકારમૃષિસત્તમ ।
શીતાંશુમણ્ડલપ્રખ્યં મકારં તસ્ય મધ્યતઃ ॥ ૭॥

તસ્યોપરિ તદાપશ્યચ્છુદ્ધસ્ફટિકસુપ્રભમ્ ।
તુરીયાતીતમમલં નિષ્કલં નિરુપદ્રવમ્ ॥ ૮॥

નિર્દ્વન્દ્વં કેવલં શૂન્યં બાહ્યાભ્યન્તરવર્જિતમ્ ।
સબાહ્યાભ્યન્તરે ચૈવ બાહ્યાભ્યન્તરસંસ્થિતમ્ ॥ ૯॥

આદિમધ્યાન્તરહિતમાનન્દસ્યાદિકારણમ્ ।
સત્યમાનન્દમમૃતં પરં બ્રહ્મપરાયણમ્ ॥ ૧૦॥

કુત એવાત્ર સમ્ભૂતઃ પરીક્ષાવોઽગ્નિસમ્ભવમ્ ।
અધો ગમિષ્યામ્યનલસ્તમ્ભસ્યાનુપમસ્ય ચ ॥ ૧૧॥

વેદશબ્દોભયાવેશં વિશ્વાત્માનં વ્યચિન્તયત્ ।
તદાભવદૃષિસ્તત્ર ઋષેઃ સારતમઃ સ્મૃતઃ ॥ ૧૨॥

તેનૈવ ઋષિણા વિષ્ણુર્જ્ઞાતવાન્પરમેશ્વરમ્ ।
મહાદેવં પરં બ્રહ્મ શબ્દબ્રહ્મતનું પરમ્ ॥ ૧૩॥

ચિન્તયા રહિતો રુદ્રો વાચો યન્મનસા સહ ।
અપ્રાપ્ય તન્નિવર્તન્તે વાચ્યસ્ત્વેકાક્ષરેણ સઃ ॥ ૧૪॥

એકાક્ષરેણ તદ્વાચ્યમૃતં પરમકારણમ્ ।
સત્યમાનન્દમમૃતં પરં બ્રહ્મ પરાત્પરમ્ ॥ ૧૫॥

એકાક્ષરાદકારાખ્યાદ્ભગવાન્બીજકોઽણ્ડજઃ ।
એકાક્ષરાદુકારાખ્યાદ્ધરિઃ પરમકારણમ્ ॥ ૧૬॥

એકાક્ષરાન્મકારાખ્યાદ્ભગવાન્નીલલોહિતઃ ।
સર્ગકર્તા ત્વકારાખ્યો હ્યુકારાખ્યસ્તુ મોહકઃ ॥ ૧૭॥

મકારાખ્યસ્તુ યો નિત્યમનુગ્રહકરોઽભવત્ ।
મકારાખ્યો વિભુર્બીજી હ્યકારો બીજ ઉચ્યતે ॥ ૧૮॥

ઉકારાખ્યો હરિર્યોનિઃ પ્રધાનપુરુષેશ્વરઃ ।
બીજી ચ બીજં તદ્યોનિર્નાદાખ્યશ્ચ મહેશ્વરઃ ॥ ૧૯॥

બીજી વિભજ્ય ચાત્માનં સ્વેચ્છયા તુ વ્યવસ્થિતઃ ।
અસ્ય લિઙ્ગાદભૂદ્ બીજમકારો બીજિનઃ પ્રભોઃ ॥ ૨૦॥

ઉકારયોનૌ નિઃક્ષિપ્તમવર્ધત સમન્તતઃ ।
સૌવર્ણમભવચ્ચાણ્ડમાવેદ્યં તદલક્ષણમ્ ॥ ૨૧॥

અનેકાબ્દં તથા ચાપ્સુ દિવ્યમણ્ડં વ્યવસ્થિતમ્ ।
તતો વર્ષસહસ્રાન્તે દ્વિધા કૃતમજોદ્ભવમ્ ॥ ૨૨॥

અણ્ડમપ્સુ સ્થિતં સાક્ષાદ્ વ્યાઘાતેનેશ્વરેણ તુ ।
તથાસ્ય સુશુભં હૈમં કપાલં ચોર્ધ્વસંસ્થિતમ્ ॥ ૨૩॥

જજ્ઞે સા દ્યૌસ્તદપરં પૃથિવી પઞ્ચલક્ષણા ।
તસ્માદણ્ડાદ્ભવો જજ્ઞે કકારાખ્યશ્ચતુર્મુખઃ ॥ ૨૪॥

સ સ્રષ્ટા સર્વલોકાનાં સ એવ ત્રિવિધઃ પ્રભુઃ ।
એવમોમોમિતિ પ્રોક્તમિત્યાહુર્યજુષાં વરાઃ ॥ ૨૫॥

યજુષાં વચનં શ્રુત્વા ઋચઃ સામાનિ સાદરમ્ ।
એવમેવ હરે બ્રહ્મન્નિત્યાહુશ્ચાવયોસ્તદા ॥ ૨૬॥

તતો વિજ્ઞાય દેવેશં યથાવચ્છક્તિસમ્ભવૈઃ ।
મન્ત્રૈર્મહેશ્વરં દેવં તુષ્ટાવ સુમહોદયમ્ ॥ ૨૭॥

એતસ્મિન્નન્તરેઽન્યચ્ચ રૂપમદ્ભુતસુન્દરમ્ ।
દદર્શ ચ મયા સાર્ધં ભગવાન્વિશ્વપાલકઃ ॥ ૨૮॥

પઞ્ચવક્ત્રં દશભુજં ગૌરકર્પૂરવન્મુને ।

નાનાકાન્તિસમાયુક્તં નાનાભૂષણભૂષિતમ્ ॥ ૨૯॥

મહોદારં મહાવીર્યં મહાપુરુષલક્ષણમ્ ।
તં દૃષ્ટ્વા પરમં રૂપં કૃતાર્થોઽભૂન્મયા હરિઃ ॥ ૩૦॥

અથ પ્રસન્નો ભગવાન્મહેશઃ પરમેશ્વરઃ ।
દિવ્યં શબ્દમયં રૂપમાખ્યાય પ્રહસન્સ્થિતઃ ॥ ૩૧॥

અકારસ્તસ્ય મૂર્ધા હિ લલાટો દીર્ઘ ઉચ્યતે ।
ઇકારો દક્ષિણં નેત્રમીકારો વામલોચનમ્ ॥ ૩૨॥

ઉકારો દક્ષિણં શ્રોત્રમૂકારો વામ ઉચ્યતે ।
ઋકારો દક્ષિણં તસ્ય કપોલં પરમેષ્ઠિનઃ ॥ ૩૩॥

વામં કપોલમૄકારો લૃ લૄ નાસાપુટે ઉભે ।
એકારશ્ચોષ્ઠ ઊર્ધ્વશ્ચ હ્યૈકારસ્ત્વધરો વિભોઃ ॥ ૩૪॥

ઓકારશ્ચ તથૌકારો દન્તપઙ્ક્તિદ્વયં ક્રમાત્ ।
અમસ્તુ તાલુની તસ્ય દેવદેવસ્ય શૂલિનઃ ॥ ૩૫॥

કાદિપઞ્ચાક્ષરાણ્યસ્ય પઞ્ચ હસ્તાશ્ચ દક્ષિણે ।
ચાદિપઞ્ચાક્ષરાણ્યેવં પઞ્ચ હસ્તાસ્તુ વામતઃ ॥ ૩૬॥

ટાદિપઞ્ચાક્ષરં પાદાસ્તાદિ પઞ્ચાક્ષરં તથા ।
પકાર ઉદરં તસ્ય ફકારઃ પાર્શ્વ ઉચ્યતે ॥ ૩૭॥

બકારો વામપાર્શ્વસ્તુ ભકારઃ સ્કન્ધ ઉચ્યતે ।
મકારો હૃદયં શમ્ભોર્મહાદેવસ્ય યોગિનઃ ॥ ૩૮॥

યકારાદિસકારાન્તા વિભોર્વૈ સપ્તધાતવઃ ।
હકારો નાભિરૂપો હિ ક્ષકારો ઘ્રાણ ઉચ્યતે ॥ ૩૯॥

એવં શબ્દમયં રૂપમગુણસ્ય ગુણાત્મનઃ ।
દૃષ્ટ્વા તમુમયા સાર્ધં કૃતાર્થોઽભૂન્મયા હરિઃ ॥ ૪૦॥

એવં દૃષ્ટ્વા મહેશાનં શબ્દબ્રહ્મતનું શિવમ્ ।
પ્રણમ્ય ચ મયા વિષ્ણુઃ પુનશ્ચાપશ્યદૂર્ધ્વતઃ ॥ ૪૧॥

ઓઙ્કારપ્રભવં મન્ત્રં કલાપઞ્ચકસંયુતમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં શુભાષ્ટત્રિંશદક્ષરમ્ ॥ ૪૨॥

મેધાકારમભૂદ્ભૂયઃ સર્વધર્માર્થસાધકમ્ ।
ગાયત્રીપ્રભવં મન્ત્રં સહિતં વશ્યકારકમ્ ॥ ૪૩॥

ચતુર્વિંશતિવર્ણાઢ્યં ચતુષ્કાલમનુત્તમમ્ ।
અથ પઞ્ચસિતં મન્ત્રં કલાષ્ટકસમાયુતમ્ ॥ ૪૪॥

આભિચારિકમત્યર્થં પ્રાયસ્ત્રિંશચ્છુભાક્ષરમ્ ।
યજુર્વેદસમાયુક્તં પઞ્ચવિંશચ્છુભાક્ષરમ્ ॥ ૪૫॥

કલાષ્ટકસમાયુક્તં સુશ્વેતં શાન્તિકં તથા ।
ત્રયોદશકલાયુક્તં બાલાદ્યૈઃ સહ લેહિતમ્ ॥ ૪૬॥

બભૂવુરસ્ય ચોત્પત્તિવૃદ્ધિસંહારકારણમ્ ।
વર્ણા એકાધિકાઃ ષષ્ટિરસ્ય મન્ત્રવરસ્ય તુ ॥ ૪૭॥

પુનર્મૃત્યુઞ્જયં મન્ત્રં પઞ્ચાક્ષરમતઃ પરમ્ ।
ચિન્તામણિં તથા મન્ત્રં દક્ષિણામૂર્તિસંજ્ઞકમ્ ॥ ૪૮॥

તતસ્તત્ત્વમસીત્યુક્તં મહાવાક્યં હરસ્ય ચ ।
પઞ્ચમન્ત્રાંસ્તથા લબ્ધ્વા જજાપ ભગવાન્હરિઃ ॥ ૪૯॥

અથ દૃષ્ટ્વા કલાવર્ણમૃગ્યજુઃસામરૂપિણમ્ ।
ઈશાનમીશમુકુટં પુરુષાખ્યં પુરાતનમ્ ॥ ૫૦॥

અઘોરહૃદયં હૃદ્યં સર્વગુહ્યં સદાશિવમ્ ।
વામપાદં મહાદેવં મહાભોગીન્દ્રભૂષણમ્ ॥ ૫૧॥

વિશ્વતઃ પાદવન્તં તં વિશ્વતોઽક્ષિકરં શિવમ્ ।
બ્રહ્મણોઽધિપતિં સર્ગસ્થિતિસંહારકારણમ્ ॥ ૫૨॥

તુષ્ટાવ વાગ્ભિરિષ્ટાભિઃ સામ્બં વરદમીશ્વરમ્ ।
મયા ચ સહિતો વિષ્ણુર્ભગવાંસ્તુષ્ટચેતસા ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને શબ્દબ્રહ્મતનુવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૨.૧.૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૯. નવમોઽધ્યાયઃ । શિવતત્ત્વવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથાકર્ણ્ય નુતિં વિષ્ણુકૃતાં સ્વસ્ય મહેશ્વરઃ ।
પ્રાદુર્બભૂવ સુપ્રીતઃ સવામઃ કરુણાનિધિઃ ॥ ૧॥

પઞ્ચવક્ત્રસ્ત્રિનયનો ભાલચન્દ્રો જટાધરઃ ।
ગૌરવર્ણો વિશાલાક્ષો ભસ્મોદ્ધૂલિતવિગ્રહઃ ॥ ૨॥

દશબાહુર્નીલગલઃ સર્વાભરણભૂષિતઃ ।
સર્વાઙ્ગસુન્દરો ભસ્મત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ॥ ૩॥

તં દૃષ્ટ્વા તાદૃશં દેવં સવામં પરમેશ્વરમ્ ।
તુષ્ટાવ પુનરિષ્ટાભિર્વાગ્ભિર્વિષ્ણુર્મયા સહ ॥ ૪॥

નિગમં શ્વાસરૂપેણ દદૌ તસ્મૈ તતો હરઃ ।
વિષ્ણવે ચ પ્રસન્નાત્મા મહેશઃ કરુણાકરઃ ॥ ૫॥

તતો જ્ઞાનમદાત્તસ્મૈ રહસ્યં પરમાત્મને ।
પરમાત્મા પુનર્મહ્યં દત્તવાન્કૃપયા મુને ॥ ૬॥

સમ્પ્રાપ્ય નિગમં વિષ્ણુઃ પપ્રચ્છ પુનરેવ તમ્ ।
કૃતાર્થઃ સાઞ્જલિર્નત્વા મયા સહ મહેશ્વરમ્ ॥ ૭॥

વિષ્ણુરુવાચ ।
કથં ચ તુષ્યસે દેવ મયા પૂજ્યઃ કથં પ્રભો ।
કથં ધ્યાનં પ્રકર્તવ્યં કથં વ્રજસિ વશ્યતામ્ । ૮॥

કિં કર્તવ્યં મહાદેવ હ્યાવાભ્યાં તવ શાસનાત્ ।
સદા સદાજ્ઞાપય નૌ પ્રીત્યર્થં કુરુ શઙ્કર ॥ ૯॥

એતત્સર્વં મહારાજ કૃપાં કૃત્વાવયોઃ પ્રભો ।
કથનીયં તથાન્યચ્ચ વિજ્ઞાય સ્વાનુગૌ શિવ ॥ ૧૦॥

બ્રહ્મોવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા પ્રસન્નો ભગવાન્હરઃ ।
ઉવાચ વચનં પ્રીત્યા સુપ્રસન્નઃ કૃપાનિધિઃ ॥ ૧૧॥

શ્રીશિવ ઉવાચ ।

ભક્ત્યા ચ ભવતોર્નૂનં પ્રીતોઽહં સુરસત્તમૌ ।
પશ્યન્તં માં મહાદેવં ભયં સર્વં વિમુઞ્ચતામ્ ॥ ૧૨॥

મમ લિઙ્ગં સદા પૂજ્યં ધ્યેયં ચૈતાદૃશં મમ ।
ઇદાનીં દૃશ્યતે યદ્વત્તથા કાર્યં પ્રયત્નતઃ ॥ ૧૩॥

પૂજિતો લિઙ્ગરૂપેણ પ્રસન્નો વિવિધં ફલમ્ ।
દાસ્યામિ સર્વલોકેભ્યો મનોઽભીષ્ટાન્યનેકશઃ ॥ ૧૪॥

યદા દુઃખં ભવેત્તત્ર યુવયોઃ સુરસત્તમૌ ।
પૂજિતે મમ લિઙ્ગે ચ તદા સ્યાદ્ દુઃખનાશનમ્ ॥ ૧૫॥

યુવાં પ્રસૂતૌ પ્રકૃતેર્મદીયાયા મહાબલૌ ।
સવ્યાપસવ્યાગાત્રાભ્યાં મમ સર્વેશ્વરસ્ય હિ ॥ ૧૬॥

અયં મે દક્ષિણાત્પાર્શ્વાદ્ બ્રહ્મા લોકપિતામહઃ ।
વામપાર્શ્વાચ્ચ વિષ્ણુસ્ત્વં સમુત્પન્નઃ પરાત્મનઃ ॥ ૧૭॥

પ્રીતોઽહં યુવયોઃ સમ્યગ્વરં દદ્યાં યથેપ્સિતમ્ ।
મયિ ભક્તિર્દૃઢા ભૂયાદ્યુવયોરભ્યનુજ્ઞયા ॥ ૧૮॥

પાર્થિવીં ચૈવ મન્મૂર્તિં વિધાય કુરુતં યુવામ્ ।
સેવાં ચ વિવિધાં પ્રાજ્ઞૌ કૃત્વા સુખમવાપ્સ્યથઃ ॥ ૧૯॥

બ્રહ્મન્સૃષ્ટિં કુરુ ત્વં હિ મદાજ્ઞાપરિપાલકઃ ।
વત્સ વત્સ હરે ત્વં ચ પાલયૈવં ચરાચરમ્ ॥ ૨૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા નૌ પ્રભુસ્તાભ્યાં પૂજાવિધિમદાચ્છુભામ્ ।
યેનૈવ પૂજિતઃ શમ્ભુઃ ફલં યચ્છત્યનેકશઃ ॥ ૨૧॥

ઇત્યાકર્ણ્ય વચઃ શમ્ભોર્મયા ચ સહિતો હરિઃ ।
પ્રત્યુવાચ મહેશાનં પ્રણિપત્ય કૃતાઞ્જલિઃ ॥ ૨૨॥

વિષ્ણુરુવાચ ।
યદિ પ્રીતિઃ સમુત્પન્ના યદિ દેયો વરશ્ચ નૌ ।
ભક્તિર્ભવતુ નૌ નિત્યં ત્વયિ ચાવ્યભિચારિણી ॥ ૨૩॥

ત્વમપ્યવતરસ્વાદ્ય લીલયા નિર્ગુણોઽપિ હિ ।
સહાયં કુરુ નૌ તાત ત્વં પરઃ પરમેશ્વરઃ ॥ ૨૪॥

આવયોર્દેવદેવેશ વિવાદમપિ શોભનમ્ ।
ઇહાગતો ભવાન્યસ્માદ્વિવાદશમનાય નૌ ॥ ૨૫॥

બ્રહ્મોવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા પુનઃ પ્રાહ હરો હરિમ્ ।
પ્રણિપત્ય સ્થિતં મૂર્ધ્ના કૃતાઞ્જલિપુટઃ સ્વયમ્ ॥ ૨૬॥

શ્રીમહેશ ઉવાચ ।
પ્રલયસ્થિતિસર્ગાણાં કર્તાહં સગુણોઽગુણઃ ।
પરબ્રહ્મ નિર્વિકારી સચ્ચિદાનન્દલક્ષણઃ ॥ ૨૭॥

ત્રિધા ભિન્નો હ્યહં વિષ્ણો બ્રહ્મવિષ્ણુહરાખ્યયા ।
સર્ગરક્ષાલયગુણૈર્નિષ્કલોઽહં સદા હરે ॥ ૨૮॥

સ્તુતોઽહં યત્ત્વયા વિષ્ણો બ્રહ્મણા મેઽવતારણે ।
પ્રાર્થનાં તાં કરિષ્યામિ સત્યાં યદ્ભક્તવત્સલઃ ॥ ૨૯॥

મદ્રૂપં પરમં બ્રહ્મન્નીદૃશં ભવદઙ્ગતઃ ।
પ્રકટીભવિતા લોકે નામ્ના રુદ્રઃ પ્રકીર્તિતઃ ॥ ૩૦॥

મદંશાત્તસ્ય સામર્થ્યં ન્યૂનં નૈવ ભવિષ્યતિ ।
યોઽહં સોઽહં ન ભેદોઽસ્તિ પૂજાવિધિવિધાનતઃ ॥ ૩૧॥

યથા ચ જ્યોતિષઃ સઙ્ગાજ્જલાદેઃ સ્પર્શતા ન વૈ ।
તથા મમાગુણસ્યાપિ સંયોગાદ્ બન્ધનં ન હિ ॥ ૩૨॥

શિવરૂપં મમૈતચ્ચ રુદ્રોઽપિ શિવવત્તદા ।
ન તત્ર પરભેદો વૈ કર્તવ્યશ્ચ મહામુને ॥ ૩૩॥

વસ્તુતો હ્યેકરૂપં હિ દ્વિધા ભિન્નં જગત્યુત ।
અતો ભેદો ન વિજ્ઞેયઃ શિવે રુદ્રે કદાચન ॥ ૩૪॥

સુવર્ણસ્ય યથૈકસ્ય વસ્તુત્વં નૈવ ગચ્છતિ ।
અલઙ્કૃતિકૃતે દેવ નામભેદો ન વસ્તુતઃ ॥ ૩૫॥

યથૈકસ્યા મૃદો ભેદો નાનાપાત્રે ન વસ્તુતઃ ।
કારણસ્યૈવ કાર્યે ન સન્નિધાનં નિદર્શનમ્ ॥ ૩૬॥

જ્ઞાતવ્યં બુધવર્યૈશ્ચ નિર્મલજ્ઞાનિભિઃ સુરૌ ।
એવં જ્ઞાત્વા ભવદ્ભ્યાં તુ ન દૃશ્યં ભેદકારણમ્ ॥ ૩૭॥

વસ્તુવત્ સર્વદૃશ્યં ચ શિવરૂપં મતં મમ ।
અહં ભવાનજશ્ચૈવ રુદ્રો યોઽયં ભવિષ્યતિ ॥ ૩૮॥

એકરૂપા ન ભેદસ્તુ ભેદે વૈ બન્ધનં ભવેત્ ।
તથાપિ ચ મદીયં હિ શિવરૂપં સનાતનમ્ ॥ ૩૯॥

મૂલીભૂતં સદોક્તં ચ સત્યજ્ઞાનમનન્તકમ્ ।
એવં જ્ઞાત્વા સદા ધ્યેયં મનસા ચૈવ તત્ત્વતઃ ॥ ૪૦॥

શ્રૂયતાં ચૈવ ભો બ્રહ્મન્ યદ્ગોપ્યં કથ્યતે મયા ।
ભવન્તૌ પ્રકૃતેર્યાતૌ નાયં વૈ પ્રકૃતેઃ પુનઃ ॥ ૪૧॥

મદાજ્ઞા જાયતે તત્ર બ્રહ્મણો ભ્રુકુટેરહમ્ ।
ગુણેષ્વપિ યથા પ્રોક્તસ્તામસઃ પ્રકૃતો હરઃ ॥ ૪૨॥

વૈકારિકશ્ચ વિજ્ઞેયો યોઽહઙ્કાર ઉદાહૃતઃ ।
નામતો વસ્તુતો નૈવ તામસઃ પરિચક્ષ્યતે ॥ ૪૩॥

એતસ્માત્કારણાદ્ બહ્મન્કરણીયમિદં ત્વયા ।
સૃષ્ટિકર્તા ભવ બ્રહ્મન્સૃષ્ટેશ્ચ પાલકો હરિઃ ॥ ૪૪॥

મદીયશ્ચ તથાંશો યો લયકર્તા ભવિષ્યતિ ।
ઇયં યા પ્રકૃતિર્દેવી હ્યુમાખ્યા પરમેશ્વરી ॥ ૪૫॥

તસ્યાસ્તુ શક્તિર્વાગ્દેવી બ્રહ્માણં સા ભજિષ્યતિ ।
અન્યા શક્તિઃ પુનસ્તત્ર પ્રકૃતેઃ સમ્ભવિષ્યતિ ॥ ૪૬॥

સમાશ્રયિષ્યતે વિષ્ણું લક્ષ્મીરૂપેણ સા તદા ।
પુનશ્ચ કાલી નામ્ના સા મદંશં પ્રાપ્સ્યતિ ધ્રુવમ્ ॥ ૪૭॥

જ્યોતીરૂપેણ સા તત્ર કાર્યાર્થે સમ્ભવિષ્યતિ ।
એવં દેવ્યાસ્તથા પ્રોક્તાઃ શક્તયઃ પરમાઃ શુભાઃ ॥ ૪૮॥

સૃષ્ટિસ્થિતિલયાનાં હિ કાર્યં તાસાં ક્રમાદ ધ્રુવમ્ ।
એતસ્યાઃ પ્રકૃતેરંશા મત્પ્રિયાયાઃ સુરોત્તમ ॥ ૪૯॥

ત્વં ચ લક્ષ્મીમુપાશ્રિત્ય કાર્યં કર્તુમિહાર્હસિ ।
બ્રહ્મંસ્ત્વં ચ ગિરાં દેવીં પ્રકૃત્યંશામવાપ્ય ચ ॥ ૫૦॥

સૃષ્ટિકાર્યં હૃદા કર્તું મન્નિર્દેશાદિહાર્હસિ ।
અહં કાલીં સમાશ્રિત્ય મત્પ્રિયાંશાં પરાત્પરામ્ ॥ ૫૧॥

રુદ્રરૂપેણ પ્રલયં કરિષ્યે કાર્યમુત્તમમ્ ।
ચતુર્વર્ણમયં લોકં તત્સર્વૈરાશ્રમૈર્ધ્રુવમ્ ॥ ૫૨॥

તદન્યૈર્વિવિધૈઃ કાર્યૈઃ કૃત્વા સુખમવાપ્સ્યથઃ ।
જ્ઞાનવિજ્ઞાનસંયુક્તો લોકાનાં હિતકારકઃ ॥ ૫૩॥

મુક્તિદોઽત્ર ભવાનદ્ય ભવ લોકે મદાજ્ઞયા ।
મદ્દર્શને ફલં યદ્વત્તદેવ તવ દર્શને ॥ ૫૪॥

ઇતિ દત્તો વરસ્તેઽદ્ય સત્યં સત્યં ન સંશયઃ ।
મમૈવ હૃદયે વિષ્ણુર્વિષ્ણોશ્ચ હૃદયે હ્યહમ્ ॥ ૫૫॥

ઉભયોરન્તરં યો વૈ ન જાનાતિ મનો મમ ।
વામાઙ્ગજો મમ હરિર્દક્ષિણાઙ્ગોદ્ભવો વિધિઃ ॥ ૫૬॥

મહાપ્રલયકૃદ રુદ્રો વિશ્વાત્મા હૃદયોદ્ભવઃ ।
ત્રિધા ભિન્નો હ્યહં વિષ્ણો બ્રહ્મવિષ્ણુભવાખ્યયા ॥ ૫૭॥

સર્ગરક્ષાલયકરસ્ત્રિગુણૈ રજ આદિભિઃ ।
ગુણભિન્નઃ શિવઃ સાક્ષાત્પ્રકૃતે પુરુષાત્પરઃ ॥ ૫૮॥

પરં બ્રહ્માદ્વયો નિત્યોઽનન્તઃ પૂર્ણો નિરઞ્જનઃ ।
અન્તસ્તમો બહિઃસત્ત્વસ્ત્રિજગત્પાલકો હરિઃ ॥ ૫૯॥

અન્તઃસત્ત્વસ્તમોબાહ્યસ્ત્રિજગલ્લયકૃદ્ધરઃ ॥ ૬૦॥

અન્તર્બહિરજશ્ચૈવ ત્રિજગત્સૃષ્ટિકૃદ્વિધિઃ ।
એવં ગુણાસ્ત્રિદેવેષુ ગુણભિન્નઃ શિવઃ સ્મૃતઃ ॥ ૬૧॥

વિષ્ણો સૃષ્ટિકરં પ્રીત્યા પાલયૈનં પિતામહમ્ ।
સમ્પૂજ્યસ્ત્રિષુ લોકેષુ ભવિષ્યસિ મદાજ્ઞયા ॥ ૬૨॥

તવ સેવ્યો વિધેશ્ચાપિ રુદ્ર એવ ભવિષ્યતિ ।
શિવપૂર્ણાવતારો હિ ત્રિજગલ્લયકારકઃ ॥ ૬૩॥

પાદ્મે ભવિષ્યતિ સુતઃ કલ્પે તવ પિતામહઃ ।
તદા દ્રક્ષ્યસિ માં ચૈવ સોઽપિ દ્રક્ષ્યતિ પદ્મજઃ ॥ ૬૪॥

એવમુક્ત્વા મહેશાનઃ કૃપાં કૃત્વાતુલાં હરઃ ।
પુનઃ પ્રોવાચ સુપ્રીત્યા વિષ્ણું સર્વેશ્વરઃ પ્રભુઃ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને શિવતત્ત્વવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૧.૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૧૦. દશમોઽધ્યાયઃ । પરમશિવતત્ત્વવર્ણનમ્ ।

પરમેશ્વર ઉવાચ ।
અન્યચ્છૃણુ હરે વિષ્ણો શાસનં મમ સુવ્રત ।
સદા સર્વેષુ લોકેષુ માન્યઃ પૂજ્યો ભવિષ્યસિ ॥ ૧॥

બ્રહ્મણા નિર્મિતે લોકે યદા દુઃખં પ્રજાયતે ।
તદા ત્વં સર્વદુઃખાનાં નાશાય તત્પરો ભવ ॥ ૨॥

સહાયં તે કરિષ્યામિ સર્વકાર્યે ચ દુઃસહે ।
તવ શત્રૂન્હનિષ્યામિ દુઃસાધ્યાન્પરમોત્કટાન્ ॥ ૩॥

વિવિધાનવતારાંશ્ચ ગૃહીત્વા કીર્તિમુત્તમામ્ ।
વિસ્તારય હરે લોકે તારણાય પરો ભવ ॥ ૪॥

ગુણરૂપો હ્યહં રુદ્રો હ્યનેન વપુષા સદા ।
કાર્યં કરિષ્યે લોકાનાં તવાશક્યં ન સંશયઃ ॥ ૫॥

રુદ્રધ્યેયો ભવાંશ્ચૈવ ભવદ્ધ્યેયો હરસ્તથા ।
યુવયોરન્તરં નૈવ તવ રુદ્રસ્ય કિઞ્ચન ॥ ૬॥

વસ્તુતશ્ચાપિ ચૈકત્વં વરતોઽપિ તથૈવ ચ ।
લીલયાપિ મહાવિષ્ણો સત્યં સત્યં ન સંશયઃ ॥ ૭॥

રુદ્રભક્તો નરો યસ્તુ તવ નિન્દાં કરિષ્યતિ ।
તસ્ય પુણ્યં ચ નિખિલં દ્રુતં ભસ્મ ભવિષ્યતિ ॥ ૮॥

નરકે પતનં તસ્ય ત્વદ્દ્વેષાત્પુરુષોત્તમ ।
મદાજ્ઞયા ભવેદ્વિષ્ણો સત્યં સત્યં ન સંશયઃ ॥ ૯॥

લોકેઽસ્મિન્મુક્તિદો નૃણાં ભુક્તિદશ્ચ વિશેષતઃ ।
ધ્યેયઃ પૂજ્યશ્ચ ભક્તાનાં નિગ્રહાનુગ્રહૌ કુરુ ॥ ૧૦॥

ઇત્યુક્ત્વા માં ચ ધાતારં હસ્તે ધૃત્વા સ્વયં હરિમ્ ।
કથયામાસ દુઃખેષુ સહાયો ભવ સર્વદા ॥ ૧૧॥

સર્વાધ્યક્ષશ્ચ સર્વેષુ ભક્તિમુક્તિપ્રદાયકઃ ।
ભવ ત્વં સર્વદા શ્રેષ્ઠઃ સર્વકામપ્રસાધકઃ ॥ ૧૨॥

સર્વેષાં પ્રાણરૂપશ્ચ ભવ ત્વં ચ મમાજ્ઞયા ।
સઙ્કટે ભજનીયો હિ સ રુદ્રો મત્તનુર્હરે ॥ ૧૩॥

ત્વાં યઃ સમાશ્રિતો નૂનં મામેવ સ સમાશ્રિતઃ ।
અન્તરં યશ્ચ જાનાતિ નિરયે પતતિ ધ્રુવમ્ ॥ ૧૪॥

આયુર્બલં શ‍ૃણુષ્વાદ્ય ત્રિદેવાનાં વિશેષતઃ ।
સન્દેહોઽત્ર ન કર્તવ્યો બ્રહ્મવિષ્ણુહરાત્મનામ્ ॥ ૧૫॥

ચતુર્યુગસહસ્રાણિ બ્રહ્મણો દિનમુચ્યતે ।
રાત્રિશ્ચ તાવતી તસ્ય માનમેતત્ક્રમેણ હ ॥ ૧૬॥

તેષાં ત્રિંશદ્દિનૈર્માસો દ્વાદશૈસ્તૈશ્ચ વત્સરઃ ।
શતવર્ષપ્રમાણેન બ્રહ્માયુઃ પરિકીર્તિતમ્ ॥ ૧૭॥

બ્રહ્મણો વર્ષમાત્રેણ દિનં વૈષ્ણવમુચ્યતે ।
સોઽપિ વર્ષશતં યાવદાત્મમાનેન જીવતિ ॥ ૧૮॥

વૈષ્ણવેન તુ વર્ષેણ દિનં રૌદ્રં ભવેદ્ ધ્રુવમ્ ।
હરો વર્ષશતે યાતે નરરૂપેણ સંસ્થિતઃ ॥ ૧૯॥

યાવદુચ્છ્વસિતં વક્ત્રે સદાશિવસમુદ્ભવમ્ ।
પશ્ચાચ્છક્તિં સમભ્યેતિ યાવન્નિઃશ્વસિતં ભવેત્ ॥ ૨૦॥

નિઃશ્વાસોચ્છ્વસિતાનાં ચ સર્વેષામેવ દેહિનામ્ ।
બ્રહ્મવિષ્ણુહરાણાં ચ ગન્ધર્વોરગરક્ષસામ્ ॥ ૨૧॥

એકવિંશસહસ્રાણિ શતૈઃ ષડ્ભિઃ શતાનિ ચ ।
અહોરાત્રાણિ ચોક્તાનિ પ્રમાણં સુરસત્તમૌ ॥ ૨૨॥

ષડ્ભિરુચ્છ્વાસનિઃશ્વાસૈઃ પલમેકં પ્રવર્તિતમ્ ।
ઘટી ષષ્ટિપલા પ્રોક્તા સા ષષ્ટ્યા ચ દિનં નિશા ॥ ૨૩॥

નિઃશ્વાસોચ્છ્વાસિતાનાં ચ પરિસઙ્ખ્યા ન વિદ્યતે ।
સદાશિવસમુત્થાનમેતસ્માત્સોઽક્ષયઃ સ્મૃતઃ ॥ ૨૪॥

ઇત્થં રૂપં ત્વયા તાવદ્રક્ષણીયં મમાજ્ઞયા ।
તાવત્સૃષ્ટેશ્ચ કાર્યં વૈ કર્તવ્યં વિવિધૈર્ગુણૈઃ ॥ ૨૫॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભોર્મયા ચ ભગવાન્હરિઃ ।
પ્રણિપત્ય ચ વિશ્વેશં પ્રાહ મન્દતરં વશી ॥ ૨૬॥

વિષ્ણુરુવાચ ।
શઙ્કર શ્રૂયતામેતત્કૃપાસિન્ધો જગત્પતે ।
સર્વમેતત્કરિષ્યામિ ભવદાજ્ઞાવશાનુગઃ ॥ ૨૭॥

મમ ધ્યેયઃ સદા ત્વં ચ ભવિષ્યસિ ન ચાન્યથા ।
ભવતઃ સર્વસામર્થ્યં લબ્ધં ચૈવ પુરા મયા ॥ ૨૮॥

ક્ષણમાત્રમપિ સ્વામિંસ્તવ ધ્યાનં પરં મમ ।
ચેતસો દૂરતો નૈવ સઙ્ગચ્છતુ કદાચન ॥ ૨૯॥

મમ ભક્તશ્ચ યઃ સ્વામિઁસ્તવ નિન્દાં કરિષ્યતિ ।
તસ્ય વૈ નિરયે વાસં પ્રયચ્છ નિયતં ધ્રુવમ્ ॥ ૩૦॥

ત્વદ્ભક્તો યો ભવેત્ સ્વામિન્મમ પ્રિયતરો હિ સઃ ।
એવં વૈ યો વિજાનાતિ તસ્ય મુક્તિર્ન દુર્લભા ॥ ૩૧॥

મહિમા ચ મદીયોઽદ્ય વર્ધિતો ભવતા ધ્રુવમ્ ।
કદાચિદગુણશ્ચૈવ જાયતે ક્ષમ્યતામિતિ ॥ ૩૨॥

બ્રહ્મોવાચ ।
તદા શમ્ભુસ્તદીયં હિ શ્રુત્વા વચનમુત્તમમ્ ।
ઉવાચ વિષ્ણું સુપ્રીત્યા ક્ષમ્યા તેઽગુણતા મયા ॥ ૩૩॥

એવમુક્ત્વા હરિં નૌ સ કરાભ્યાં પરમેશ્વરઃ ।
પસ્પર્શ સકલાઙ્ગેષુ કૃપયા તુ કૃપાનિધિઃ ॥ ૩૪॥

આદિશ્ય વિવિધાન્ધર્માન્સર્વદુઃખહરો હરઃ ।
દદૌ વરાનનેકાંશ્ચાવયોર્હિતચિકીર્ષયા ॥ ૩૫॥

તતઃ સ ભગવાન્ શમ્ભુઃ કૃપયા ભક્તવત્સલઃ ।
દૃષ્ટ્યા સમ્પશ્યતોઃ શીઘ્રં તત્રૈવાન્તરધીયત ॥ ૩૬॥

તદાપ્રભૃતિ લોકેઽસ્મિઁલ્લિઙ્ગપૂજાવિધિઃ સ્મૃતઃ ।
લિઙ્ગે પ્રતિષ્ઠિતઃ શમ્ભુર્ભુક્તિમુક્તિપ્રદાયકઃ ॥ ૩૭॥

લિઙ્ગવેદિર્મહાદેવી લિઙ્ગં સાક્ષાન્મહેશ્વરઃ ।
લયનાલ્લિઙ્ગમિત્યુક્તં તત્રૈવ નિખિલં જગત્ ॥ ૩૮॥

યસ્તુ લૈઙ્ગં પઠેન્નિત્યમાખ્યાનં લિઙ્ગસન્નિધૌ ।
ષણ્માસાચ્છિવરૂપો વૈ નાત્ર કાર્યા વિચારણા ॥ ૩૯॥

યસ્તુ લિઙ્ગસમીપે તુ કાર્યં કિઞ્ચિત્કરોતિ ચ ।
તસ્ય પુણ્યફલં વક્તું ન શક્નોમિ મહામુને ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને પરમ શિવતત્ત્વવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૨.૧.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૧૧. એકાદશોઽધ્યાયઃ । શિવપૂજાવિધિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ વ્યાસશિષ્ય નમોઽસ્તુ તે ।
શ્રાવિતાદ્યાદ્ભુતા શૈવી કથા પરમપાવની ॥ ૧॥

તત્રાદ્ભુતા મહાદિવ્યા લિઙ્ગોત્પત્તિઃ શ્રુતા શુભા ।
શ્રુત્વા યસ્યાઃ પ્રભાવં ચ દુઃખનાશો ભવેદિહ ॥ ૨॥

બ્રહ્મનારદસંવાદમનુસૃત્ય દયાનિધે ।
શિવાર્ચનવિધિં બ્રૂહિ યેન તુષ્ટો ભવેચ્છિવઃ ॥ ૩॥

બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈર્વા પૂજ્યતે શિવઃ ।
કથં કાર્યં ચ તદ્ બ્રૂહિ યથા વ્યાસમુખાચ્છ્રુતમ્ ॥ ૪॥

તચ્છ્રુત્વા વચનં તેષાં શર્મદં શ્રુતિસમ્મતમ્ ।

ઉવાચ સકલં પ્રીત્યા મુનિપ્રશ્નાનુસારતઃ ॥ ૫॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટં ભવદ્ભિશ્ચ તદ્રહસ્યં મુનીશ્વરાઃ ।
તદહં કથયામ્યદ્ય યથાબુદ્ધિ યથાશ્રુતમ્ ॥ ૬॥

ભવદ્ભિઃ પૃચ્છ્યતે યદ્વત્તથા વ્યાસેન વૈ પુરા ।
પૃષ્ટં સનત્કુમારાય તચ્છ્રુતં હ્યુપમન્યુના ॥ ૭॥

તતો વ્યાસેન વૈ શ્રુત્વા શિવપૂજાદિકં ચ યત્ ।
મહ્યં ચ પાઠિતં તેન લોકાનાં હિતકામ્યયા ॥ ૮॥

તચ્છ્રુતં ચૈવ કૃષ્ણેન હ્યુપમન્યોર્મહાત્મનઃ ।
તદહં કથયિષ્યામિ યથા બ્રહ્માવદત્પુરા ॥ ૯॥

બ્રહ્મોવાચ ।
શ‌ૃણુ નારદ વક્ષ્યામિ સઙ્ક્ષેપાલ્લિઙ્ગપૂજનમ્ ।
વક્તું વર્ષશતેનાપિ ન શક્યં વિસ્તરાન્મુને ॥ ૧૦॥

એવં તુ શાઙ્કરં રૂપં સુખં સ્વચ્છં સનાતનમ્ ।
પૂજયેત્પરયા ભક્ત્યા સર્વકામફલાપ્તયે ॥ ૧૧॥

દારિદ્ર્યં રોગદુઃખં ચ પીડનં શત્રુસમ્ભવમ્ ।
પાપં ચતુર્વિધં તાવદ્યાવન્નાર્ચયતે શિવમ્ ॥ ૧૨॥

સમ્પૂજિતે શિવે દેવે સર્વદુઃખં વિલીયતે ।
સમ્પદ્યતે સુખં સર્વં પશ્ચાન્મુક્તિરવાપ્યતે ॥ ૧૩॥

યો વૈ માનુષ્યમાશ્રિત્ય મુખ્યં સન્તાનતઃ સુખમ્ ।
તેન પૂજ્યો મહાદેવઃ સર્વકાર્યાર્થસાધકઃ ॥ ૧૪॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચ વિધિવત્ક્રમાત્ ।
શઙ્કરાર્ચાં પ્રકુર્વન્તુ સર્વકામાર્થસિદ્ધયે ॥ ૧૫॥

પ્રાતઃકાલે સમુત્થાય મુહૂર્તે બ્રહ્મસંજ્ઞકે ।
ગુરોશ્ચ સ્મરણં કૃત્વા શમ્ભોશ્ચૈવ તથા પુનઃ ॥ ૧૬॥

તીર્થાનાં સ્મરણં કૃત્વા ધ્યાનં ચૈવ હરેરપિ ।
મમાપિ નિર્જરાણાં વૈ મુન્યાદીનાં તથા મુને ॥ ૧૭॥

તતઃ સ્તોત્રં શમ્ભુનામ ગૃહ્ણીયાદ્વિધિપૂર્વકમ્ ।

તતોત્થાય મલોત્સર્ગં દક્ષિણસ્યાં ચરેદ્દિશિ ॥ ૧૮॥

એકાન્તે તુ વિધિં કુર્યાન્મલોત્સર્ગસ્ય યચ્છ્રુતમ્ ।
તદેવ કથયામ્યદ્ય શૃણ્વાધાય મનો મુને ॥ ૧૯॥

શુદ્ધાં મૃદં દ્વિજો લિપ્યાત્પઞ્ચવારં વિશુદ્ધયે ।
ક્ષત્રિયશ્ચ ચતુર્વારં વૈશ્યો વારત્રયં તથા ॥ ૨૦॥

શૂદ્રો દ્વિવારં ચ મૃદં ગૃહ્ણીયાદ્વિધિશુદ્ધયે ।
ગુદે વાથ સકૃલ્લિઙ્ગે વારમેકં પ્રયત્નતઃ ॥ ૨૧॥

દશવારં વામહસ્તે સપ્તવારં દ્વયોસ્તથા ।
પ્રત્યેકં પાદયોસ્તાત ત્રિવારં કરયોઃ પુનઃ ॥ ૨૨॥

સ્ત્રીભિશ્ચ શૂદ્રવત્કાર્યં મૃદાગ્રહણમુત્તમમ્ ।
હસ્તૌ પાદૌ ચ પ્રક્ષાલ્ય પૂર્વવન્મૃદમાહરેત્ ॥ ૨૩॥

દન્તકાષ્ઠં તતઃ કુર્યાત્સ્વવર્ણક્રમતો નરઃ ॥ ૨૪॥

વિપ્રઃ કુર્યાદ્દન્તકાષ્ઠં દ્વાદશાઙ્ગુલમાનતઃ ।
એકાદશાઙ્ગુલં રાજા વૈશ્યઃ કુર્યાદ્દશાઙ્ગુલમ્ ॥ ૨૫॥

શૂદ્રો નવાઙ્ગુલં કુર્યાદિતિ માનમિદં સ્મૃતમ્ ।
કાલદોષં વિચાર્યૈવ માનદુષ્ટં વિવર્જયેત્ ॥ ૨૬॥

ષષ્ઠ્યાદ્યામશ્ચ નવમી વ્રતમસ્તં રવેર્દિનમ્ ।
તથા શ્રાદ્ધદિનં તાત નિષિદ્ધં રદધાવને ॥ ૨૭॥

સ્નાનં તુ વિધિવત્કાર્યં તીર્થાદિષુ ક્રમેણ તુ ।
દેશકાલવિશેષેણ સ્નાનં કાર્યં સમન્ત્રકમ્ ॥ ૨૮॥

આચમ્ય પ્રથમં તત્ર ધૌતવસ્ત્રાણિ ધારયેત્ ।
એકાન્તે સુસ્થલે સ્થિત્વા સન્ધ્યાવિધિમથાચરેત્ ॥ ૨૯॥

યથાયોગ્યં વિધિં કૃત્વા પૂજાવિધિમથારભેત્ ।
મનસ્તુ સુસ્થિરં કૃત્વા પૂજાગારં પ્રવિશ્ય ચ ॥ ૩૦॥

પૂજાવિધિં સમાદાય સ્વાસને હ્યુપવિશ્ય વૈ ।
ન્યાસાદિકં વિધાયાદૌ પૂજયેત્ ક્રમશો હરમ્ ॥ ૩૧॥

પ્રથમં ચ ગણાધીશં દ્વારપાલાંસ્તથૈવ ચ ।

દિક્પાલાંશ્ચ સુસમ્પૂજ્ય પશ્ચાત્પીઠં પ્રકલ્પયેત્ ॥ ૩૨॥

અથવાષ્ટદલં કૃત્વા પૂજાદ્રવ્યં સમીપતઃ ।
ઉપવિશ્ય તતસ્તત્ર ઉપવેશ્ય શિવં પ્રભુમ્ ॥ ૩૩॥

આચમનત્રયં કૃત્વા પ્રક્ષાલ્ય ચ પુનઃ કરૌ ।
પ્રાણાયામત્રયં કૃત્વા મધ્યે ધ્યાયેચ્ચ ત્ર્યમ્બકમ્ ॥ ૩૪॥

પઞ્ચવક્ત્રં દશભુજં શુદ્ધસ્ફટિકસન્નિભમ્ ।
સર્વાભરણસંયુક્તં વ્યાઘ્રચર્મોત્તરીયકમ્ ॥ ૩૫॥

તસ્ય સારૂપ્યતાં સ્મૃત્વા દહેત્પાપં નરઃ સદા ।
શિવં તતઃ સમુત્થાપ્ય પૂજયેત્પરમેશ્વરમ્ ॥ ૩૬॥

દેહશુદ્ધિં તતઃ કૃત્વા મૂલમન્ત્રં ન્યસેત્ક્રમાત્ ।
સર્વત્ર પ્રણવેનૈવ ષડઙ્ગન્યાસમાચરેત્ ॥ ૩૭॥

કૃત્વા હૃદિ પ્રયોગં ચ તતઃ પૂજાં સમારભેત્ ।
પાદ્યાર્ઘાચમનાર્થં ચ પાત્રાણિ ચ પ્રકલ્પયેત્ ॥ ૩૮॥

સ્થાપયેદ્વિવિધાન્કુમ્ભાન્નવ ધીમાન્યથાવિધિ ।
દર્ભૈરાચ્છાદ્ય તૈરેવ સંસ્થાપ્યાભ્યુક્ષ્ય વારિણા ॥ ૩૯॥

તેષુ તેષુ ચ સર્વેષુ ક્ષિપેત્તોયં સુશીતલમ્ ।
પ્રણવેન ક્ષિપેત્તેષુ દ્રવ્યાણ્યાલોક્ય બુદ્ધિમાન્ ॥ ૪૦॥

ઉશીરં ચન્દનં ચૈવ પાદ્યે તુ પરિકલ્પયેત્ ।
જાતીકઙ્કોલકર્પૂરવટમૂલતમાલકમ્ ॥ ૪૧॥

ચૂર્ણયિત્વા યથાન્યાયં ક્ષિપેદાચમનીયકે ।
એતત્સર્વેષુ પાત્રેષુ દાપયેચ્ચન્દનાન્વિતમ્ ॥ ૪૨॥

પાર્શ્વયોર્દેવદેવસ્ય નન્દીશં તુ સમર્ચયેત્ ।
ગન્ધૈર્ધૂપૈસ્તથા દીપૈર્વિવિધૈઃ પૂજયેચ્છિવમ્ ॥ ૪૩॥

લિઙ્ગશુદ્ધિં તતઃ કૃત્વા મુદા યુક્તો નરસ્તદા ।
યથોચિતં તુ મન્ત્રૌઘૈઃ પ્રણવાદિર્નમોઽન્તકૈઃ ॥ ૪૪॥

કલ્પયેદાસનં સ્વસ્તિપદ્માદિ પ્રણવેન તુ ।
તસ્માત્પૂર્વદિશં સાક્ષાદણિમામયમક્ષરમ્ ॥ ૪૫॥

લઘિમા દક્ષિણં ચૈવ મહિમા પશ્ચિમં તથા ।
પ્રાપ્તિશ્ચૈવોત્તરં પત્રં પ્રાકામ્યં પાવકસ્ય ચ ॥ ૪૬॥

ઈશિત્વં નૈરૃતં પત્રં વશિત્વં વાયુગોચરે ।
સર્વજ્ઞત્વં તથૈશાન્યં કર્ણિકા સોમ ઉચ્યતે ॥ ૪૭॥

સોમસ્યાધસ્તથા સૂર્યસ્તસ્યાધઃ પાવકસ્ત્વયમ્ ।
ધર્માદીનપિ તસ્યાધો ભવતઃ કલ્પયેત્ ક્રમાત્ ॥ ૪૮॥

અવ્યક્તાદિ ચતુર્દિક્ષુ સોમસ્યાન્તે ગુણત્રયમ્ ।
સદ્યોજાતં પ્રપદ્યામીત્યાવાહ્ય પરમેશ્વરમ્ ॥ ૪૯॥

વામદેવેન મન્ત્રેણ તિષ્ઠેચ્ચૈવાસનોપરિ ।
સાન્નિધ્યં રુદ્રગાયત્ર્યા અઘોરેણ નિરોધયેત્ ॥ ૫૦॥

ઈશાનઃ સર્વવિદ્યાનામિતિ મન્ત્રેણ પૂજયેત્ ।
પાદ્યમાચનીયં ચ વિધાયાર્ઘ્યં પ્રદાપયેત્ ॥ ૫૧॥

સ્થાપયેદ્વિધિના રુદ્રં ગન્ધચન્દનવારિણા ।
પઞ્ચગવ્યવિધાનેન ગૃહ્યપાત્રેઽભિમન્ત્ર્ય ચ .. .. ૫૨॥

પ્રણવેનૈવ ગવ્યેન સ્નાપયેત્પયસા ચ તમ્ ।
દધ્ના ચ મધુના ચૈવ તથા ચેક્ષુરસેન તુ ॥ ૫૩॥

ધૃતેન તુ તથા પૂજ્યં સર્વકામહિતાવહમ્ ।
પુણ્યૈર્દ્રવ્યૈર્મહાદેવં પ્રણવેનાભિષેચયેત્ ॥ ૫૪॥

પવિત્રજલભાણ્ડેષુ મન્ત્રૈઃ તોયં ક્ષિપેત્તતઃ ।
શુદ્ધીકૃત્ય યથાન્યાયં સિતવસ્ત્રેણ સાધકઃ ॥ ૫૫॥

તાવદ્ દૂરં ન કર્તવ્યં ન યાવચ્ચન્દનં ક્ષિપેત્ ।
તન્દુલૈઃ સુન્દરૈસ્તત્ર પૂજયેચ્છઙ્કરં મુદા ॥ ૫૬॥

કુશાપામાર્ગકર્પૂરજાતિચમ્પકપાટલૈઃ ।
કરવીરૈઃ સિતૈશ્ચૈવ મલ્લિકાકમલોત્પલૈઃ ॥ ૫૭॥

અપૂર્વપુષ્પૈર્વિવિધૈશ્ચન્દનાદ્યૈસ્તથૈવ ચ ।
જલેન જલધારાં ચ કલ્પયેત્પરમેશ્વરે ॥ ૫૮॥

પાત્રૈશ્ચ વિવિધૈર્દેવં સ્નાપયેચ્ચ મહેશ્વરમ્ ।
મન્ત્રપૂર્વં પ્રકર્તવ્યા પૂજા સર્વફલપ્રદા ॥ ૫૯॥

મન્ત્રાંશ્ચ તુભ્યં તાંસ્તાત સર્વકામાર્થસિદ્ધયે ।
પ્રવક્ષ્યામિ સમાસેન સાવધાનતયા શ઼ૃણુ ॥ ૬૦॥

પવમાનેન મન્ત્રેણ તથા વાઙ્મયકેન ચ ।
રુદ્રેણ નીલરુદ્રેણ સુશુક્લેન શુભેન ચ ॥ ૬૧॥

હોતારેણ તથા શીર્ષ્ણા શુભેનાથર્વણેન ચ ।
શાન્ત્યા વાથ પુનઃ શાન્ત્યા ભારુણ્ડેનારુણેન ચ ॥ ૬૨॥

અર્થાભીષ્ટેન સામ્ના ચ તથા દેવવ્રતેન ચ ॥ ૬૩॥

રથન્તરેણ પુષ્પેણ સૂક્તેન પુરુષેણ ચ ।
મૃત્યુઞ્જયેન મન્ત્રેણ તથા પઞ્ચાક્ષરેણ ચ ॥ ૬૪॥

જલધારાઃ સહસ્રેણ શતેનૈકોત્તરેણ વા ।
કર્તવ્યા વેદમાર્ગેણ નામભિર્વાથ વા પુનઃ ॥ ૬૫॥

તતશ્ચન્દનપુષ્પાદિ રોપણીયં શિવોપરિ ।
દાપયેત્પ્રણવેનૈવ મુખવાસાદિકં તથા ॥ ૬૬॥

તતઃ સ્ફટિકસઙ્કાશં દેવં નિષ્કલમક્ષયમ્ ।
કારણં સર્વલોકાનાં સર્વલોકમયં પરમ્ ॥ ૬૭॥

બ્રહ્મેન્દ્રોપેન્દ્રવિષ્ણ્વાદ્યૈરપિ દેવૈરગોચરમ્ ।
વેદવિદ્ભિર્હિ વેદાન્તે ત્વગોચરમિતિ સ્મૃતમ્ ॥ ૬૮॥

આદિમધ્યાન્તરહિતં ભેષજં સર્વરોગિણામ્ ।
શિવતત્ત્વમિતિ ખ્યાતં શિવલિઙ્ગં વ્યવસ્થિતમ્ ॥ ૬૯॥

પ્રણવેનૈવ મન્ત્રેણ પૂજયેલ્લિઙ્ગમૂર્દ્ધનિ ।
ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈસ્તામ્બૂલૈઃ સુન્દરૈસ્તથા ॥ ૭૦॥

નીરાજનેન રમ્યેણ યથોક્તવિધિના તતઃ ।
નમસ્કારૈઃ સ્તવૈશ્ચાન્યૈર્મન્ત્રૈર્નાનાવિધૈરપિ ॥ ૭૧॥

અર્ઘ્યં દત્ત્વા તુ પુષ્પાણિ પાદયોઃ સુવિકીર્ય ચ ।
પ્રણિપત્ય ચ દેવેશમાત્મનારાધયેચ્છિવમ્ ॥ ૭૨॥

હસ્તે ગૃહીત્વા પુષ્પાણિ સમુત્થાય કૃતાઞ્જલિઃ ।
પ્રાર્થયેત્પુનરીશાનં મન્ત્રેણાનેન શઙ્કરમ્ ॥ ૭૩॥

અજ્ઞાનાદ્યદિ વા જ્ઞાનાજ્જપપૂજાદિકં મયા ।
કૃતં તદસ્તુ સફલં કૃપયા તવ શઙ્કર ॥ ૭૪॥

પઠિત્વૈવં ચ પુષ્પાણિ શિવોપરિ મુદા ન્યસેત્ ।
તતઃ સ્વસ્ત્યયનં કૃત્વા હ્યાશિષો વિવિધાસ્તથા ॥ ૭૫॥

માર્જનં તુ તતઃ કાર્યં શિવસ્યોપરિ વૈ પુનઃ ।
નમસ્કારં તતઃ ક્ષાન્તિં પુનરાગમનાય ચ ॥ ૭૬॥

અઘોરમન્ત્રમુચ્ચાર્ય નમસ્કારં પ્રકલ્પયેત્ ।
પ્રાર્થયેચ્ચ પુનસ્તત્ર સર્વભાવસમન્વિતઃ ॥ ૭૭॥

શિવે ભક્તિઃ શિવે ભક્તિઃ શિવે ભક્તિર્ભવે ભવે ।
અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ॥ ૭૮॥

ઇતિ સમ્પ્રાર્થ્ય દેવેશં સર્વસિદ્ધિપ્રદાયકમ્ ।
પૂજયેત્પરયા ભક્ત્યા ગલનાદૈર્વિશેષતઃ ॥ ૭૯॥

નમસ્કારં તતઃ કૃત્વા પરિવારગણૈઃ સહ ।
પ્રહર્ષમતુલં લબ્ધ્વા કાર્યં કુર્યાદ્યથાસુખમ્ ॥ ૮૦॥

એવં યઃ પૂજયેન્નિત્યં શિવભક્તિપરાયણઃ ।
તસ્ય વૈ સકલા સિદ્ધિર્જાયતે તુ પદે પદે ॥ ૮૧॥

વાગ્મી સ જાયતે તસ્ય મનોઽભીષ્ટફલં ધ્રુવમ્ ।
રોગં દુઃખં ચ શોકં ચ હ્યુદ્વેગં કૃત્રિમં તથા ॥ ૮૨॥

કૌટિલ્યં ચ ગરં ચૈવ યદ્યદ્દુઃખમુપસ્થિતમ્ ।
તદ્દુઃખં નાશયત્યેવ શિવઃ શિવકરઃ પરઃ ॥ ૮૩॥

કલ્યાણં જાયતે તસ્ય શુક્લપક્ષે યથા શશી ।
વર્ધતે સદ્ગુણસ્તત્ર ધ્રુવં શઙ્કરપૂજનાત્ ॥ ૮૪॥

ઇતિ પૂજાવિધિઃ શમ્ભોઃ પ્રોક્તસ્તે મુનિસત્તમ ।
અતઃ પરં ચ શુશ્રૂષુઃ કિં પ્રષ્ટાસિ ચ નારદ ॥ ૮૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને શિવપૂજાવિધિવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૧.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૧૨. દ્વાદશોઽધ્યાયઃ । પૂજાવિધિવર્ણને સારાસારવિચારવર્ણનમ્ ।

નારદ ઉવાચ ।
બ્રહ્મન્પ્રજાપતે તાત ધન્યસ્ત્વં શિવસક્તધીઃ ।
એતદેવ પુનઃ સમ્યગ્બ્રૂહિ મે વિસ્તરાદ્વિધે ॥ ૧॥

બ્રહ્મોવાચ ।
એકસ્મિન્સમયે તાત ઋષીનાહૂય સર્વતઃ ।
નિર્જરાંશ્ચાવદં પ્રીત્યા સુવચઃ પદ્મસમ્ભવઃ ॥ ૨॥

યદિ નિત્યસુખે શ્રદ્ધા યદિ સિદ્ધેશ્ચ કામુકાઃ ।
આગન્તવ્યં મયા સાર્ધં તીરં ક્ષીરપયોનિધેઃ ॥ ૩॥

ઇત્યેતદ્વચનં શ્રુત્વા ગતાસ્તે હિ મયા સહ ।
યત્રાસ્તે ભગવાન્વિષ્ણુઃ સર્વેષાં હિતકારકઃ ॥ ૪॥

તત્ર ગત્વા જગન્નાથં દેવદેવં જનાર્દનમ્ ।
ઉપતસ્થુઃ સુરા નત્વા સુકૃતાઞ્જલયો મુને ॥ ૫॥

તાન્દૃષ્ટ્વા ચ તદા વિષ્ણુર્બ્રહ્માદ્યાનમરાન્સ્થિતાન્ ।
સ્મરન્ શિવપદામ્ભોજમબ્રવીત્પરમં વચઃ ॥ ૬॥

વિષ્ણુરુવાચ ।
કિમર્થમાગતા યૂયં બ્રહ્માદ્યાશ્ચ સુરર્ષયઃ ।
સર્વં વદત તત્પ્રીત્યા કિં કાર્યં વિદ્યતેઽધુના ॥ ૭॥

બ્રહ્મોવાચ ।
ઇતિ પૃષ્ટાસ્તદા તેન વિષ્ણુના ચ મયા સુરાઃ ।
પુનઃ પ્રણમ્ય તં પ્રીત્યા કિં કાર્યં વિદ્યતેઽધુના ॥

વિનિવેદયિતું કાર્યં હ્યબ્રુવન્વચનં શુભમ્ ॥ ૮॥

દેવા ઊચુઃ ।
નિત્યં સેવા તુ કસ્યૈવ કાર્યા દુઃખાપહારિણી ॥ ૯॥

ઇત્યેતદ્વચનં શ્રુત્વા ભગવાન્ભક્તવત્સલઃ ।
સામરસ્ય મમ પ્રીત્યા કૃપયા વાક્યમબ્રવીત્ ॥ ૧૦॥

શ્રીભગવાનુવાચ ।
બ્રહ્મન્ શ઼ૃણુ સુરૈઃ સમ્યક્ શ્રુતં ચ ભવતા પુરા ।
તથાપિ કથ્યતે તુભ્યં દેવેભ્યશ્ચ તથા પુનઃ ॥ ૧૧॥

દૃષ્ટં ચ દૃશ્યતેઽદ્યૈવ કિં પુનઃ પૃચ્છ્યતેઽધુના ।
બ્રહ્મન્દેવૈઃ સમસ્તૈશ્ચ બહુધા કાર્યતત્પરૈઃ ॥ ૧૨॥

સેવ્યઃ સેવ્યઃ સદા દેવઃ શઙ્કરઃ સર્વદુઃખહા ।
મમાપિ કથિતં તેન બ્રહ્મણોઽપિ વિશેષતઃ ॥ ૧૩॥

પ્રસ્તુતં ચૈવ દૃષ્ટં વઃ સર્વં દૃષ્ટાન્તમદ્ભુતમ્ ।
ત્યાજ્યં તદર્ચનં નૈવ કદાપિ સુખમીપ્સુભિઃ ॥ ૧૪॥

સન્ત્યજ્ય દેવદેવેશં લિઙ્ગમૂર્તિં મહેશ્વરમ્ ।
તારપુત્રાસ્તથૈવૈતે નષ્ટાસ્તેઽપિ સબાન્ધવાઃ ॥ ૧૫॥

મયા ચ મોહિતાસ્તે વૈ માયયા દૂરતઃ કૃતાઃ ।
સર્વે વિનષ્ટાઃ પ્રધ્વસ્તાઃ શિવેન રહિતા યદા ॥ ૧૬॥

તસ્માત્સદા પૂજનીયો લિઙ્ગમૂર્તિધરો હરઃ ।
સેવનીયો વિશેષેણ શ્રદ્ધયા દેવસત્તમ ॥ ૧૭॥

શર્વલિઙ્ગાર્ચનાદેવ દેવા દૈત્યાશ્ચ સત્તમાઃ ।
અહં ત્વં ચ તથા બ્રહ્મન્કથં તદ્વિસ્મૃતં ત્વયા ॥ ૧૮॥

તલ્લિઙ્ગમર્ચયેન્નિત્યં યેન કેનાપિ હેતુના ।
તસ્માત્ બ્રહ્મન્સુરૈઃ શર્વઃ સર્વકામફલેપ્સયા ॥ ૧૯॥

સા હાનિસ્તન્મહાછિદ્રં સાન્ધતા સા ચ મુગ્ધતા ।
યન્મુહૂર્તં ક્ષણં વાપિ શિવં નૈવ સમર્ચયેત્ ॥ ૨૦॥

ભવભક્તિપરા યે ચ ભવપ્રણતચેતસઃ ।
ભવસંસ્મરણા યે ચ ન તે દુઃખસ્ય ભાજનાઃ ॥ ૨૧॥

ભવનાનિ મનોજ્ઞાનિ મનોજ્ઞાભરણાઃ સ્ત્રિયઃ ।
ધનં ચ તુષ્ટિપર્યન્તં પુત્રપૌત્રાદિસન્તતિઃ ॥ ૨૨॥

આરોગ્યં ચ શરીરં ચ પ્રતિષ્ઠાં ચાપ્યલૌકિકીમ્ ।

યે વાઞ્છન્તિ મહાભાગાઃ સુખં વા ત્રિદશાલયમ્ ॥ ૨૩॥

અન્તે મુક્તિફલં ચૈવ ભક્તિં વા પરમેશિતુઃ ।
પૂર્વપુણ્યાતિરેકેણ તેઽર્ચયન્તિ સદાશિવમ્ ॥ ૨૪॥

યોઽર્ચયેચ્છિવલિઙ્ગં વૈ નિત્યં ભક્તિપરાયણઃ ।
તસ્ય વૈ સફલા સિદ્ધિર્ન સ પાપૈઃ પ્રયુજ્યતે ॥ ૨૫॥

બ્રહ્મોવાચ ।
ઇત્યુક્તાશ્ચ તદા દેવાઃ પ્રણિપત્ય હરિં સ્વયમ્ ।
લિઙ્ગાનિ પ્રાર્થયામાસુઃ સર્વકામાપ્તયે નૃણામ્ ॥ ૨૬॥

તચ્છ્રુત્વા ચ તદા વિષ્ણુર્વિશ્વકર્માણમબ્રવીત્ ।
અહં ચ મુનિશાર્દૂલ જીવોદ્ધારપરાયણઃ ॥ ૨૭॥

વિશ્વકર્મન્યથા શમ્ભોઃ કલ્પયિત્વા શુભાનિ ચ ।
લિઙ્ગાનિ સર્વદેવેભ્યો દેયાનિ વચનાન્મમ ॥ ૨૮॥

બ્રહ્મોવાચ ।
લિઙ્ગાનિ કલ્પયિત્વૈવમધિકારાનુરૂપતઃ ।
વિશ્વકર્મા દદૌ તેભ્યો નિયોગાન્મમ વા હરેઃ ॥ ૨૯॥

તદેવ કથયામ્યદ્ય શ્રૂયતામૃષિસત્તમ ।
પદ્મરાગમયં શક્રો હૈમં વિશ્રવસઃ સુતઃ ॥ ૩૦॥

પીતં મણિમયં ધર્મો વરુણઃ શ્યામલં શિવમ્ ।
ઇન્દ્રનીલમયં વિષ્ણુર્બ્રહ્મા હેમમયં તથા ॥ ૩૧॥

વિશ્વેદેવાસ્તથા રૌપ્યં વસવશ્ચ તથૈવ ચ ।
આરકૂટમયં વાપિ પાર્થિવં હ્યશ્વિનૌ મુને ॥ ૩૨॥

લક્ષ્મીશ્ચ સ્ફાટિકં દેવી હ્યાદિત્યાસ્તામ્રનિર્મિતમ્ ।
મૌક્તિકં સોમરાજો વૈ વજ્રલિઙ્ગં વિભાવસુઃ ॥ ૩૩॥

મૃણ્મયં ચૈવ વિપ્રેન્દ્રા વિપ્રપત્ન્યસ્તથૈવ ચ ।
ચાન્દનં ચ મયો નાગાઃ પ્રવાલમયમાદરાત્ ॥ ૩૪॥

નવનીતમયં દેવી યોગી ભસ્મમયં તથા ।
યક્ષા દધિમયં લિઙ્ગં છાયા પિષ્ટમયં તથા ॥ ૩૫॥

શિવલિઙ્ગં ચ બ્રહ્માણી રત્નં પૂજયતિ ધ્રુવમ્ ।

પારદં પાર્થિવં બાણઃ સમર્ચતિ પરેઽપિ વા ॥ ૩૬॥

એવંવિધાનિ લિઙ્ગાનિ દત્તાનિ વિશ્વકર્મણા ।
તે પૂજયન્તિ સર્વે વૈ દેવા ઋષિગણાસ્તથા ॥ ૩૭॥

વિષ્ણુર્દત્ત્વા ચ લિઙ્ગાનિ દેવેભ્યો હિતકામ્યયા ।
પૂજાવિધિં સમાચષ્ટ બ્રહ્મણે મે પિનાકિનઃ ॥ ૩૮॥

તચ્છ્રુત્વા વચનં તસ્ય બ્રહ્માહં દેવસત્તમૈઃ ।
આગચ્છં ચ સ્વકં ધામ હર્ષનિર્ભરમાનસઃ ॥ ૩૯॥

તત્રાગત્ય ઋષીન્સર્વાન્દેવાંશ્ચાહં તથા મુને ।
શિવપૂજાવિધિં સમ્યગબ્રુવં સકલેષ્ટદમ્ ॥ ૪૦॥

બ્રહ્મોવાચ ।
શ્રૂયતામૃષયઃ સર્વે સામરાઃ પ્રેમતત્પરાઃ ।
શિવપૂજાવિધિં પ્રીત્યા કથયે ભુક્તિમુક્તિદમ્ ॥ ૪૧॥

માનુષં જન્મ સમ્પ્રાપ્ય દુર્લભં સર્વજન્તુષુ ।
તત્રાપિ સત્કુલે દેવા દુષ્પ્રાપ્યં ચ મુનીશ્વરાઃ ॥ ૪૨॥

અવ્યઙ્ગં ચૈવ વિપ્રેષુ સાચારેષુ સપુણ્યતઃ ।
શિવસન્તોષહેતોશ્ચ કર્મ સ્વોક્તં સમાચરેત્ ॥ ૪૩॥

યદ્યજ્જાતિસમુદ્દિષ્ટં તત્તત્કર્મ ન લઙ્ઘયેત્ ।
યાવદ્દાનસ્ય સમ્પત્તિસ્તાવત્કર્મ સમાવહેત્ ॥ ૪૪॥

કર્મયજ્ઞસહસ્રેભ્યસ્તપોયજ્ઞો વિશિષ્યતે ।
તપોયજ્ઞસહસ્રેભ્યો જપયજ્ઞો વિશિષ્યતે ॥ ૪૫॥

ધ્યાનયજ્ઞાત્પરં નાસ્તિ ધ્યાનં જ્ઞાનસ્ય સાધનમ્ ।
યતઃ સમરસં સ્વેષ્ટં યોગી ધ્યાનેન પશ્યતિ ॥ ૪૬॥

ધ્યાનયજ્ઞરતસ્યાસ્ય સદા સન્નિહિતઃ શિવઃ ।
નાસ્તિ વિજ્ઞાનિનાં કિઞ્ચિત્પ્રાયશ્ચિત્તાદિશોધનમ્ ॥ ૪૭॥

વિશુદ્ધા વિદ્યયા યે ચ બ્રહ્મન્બ્રહ્મવિદો જનાઃ ।
નાસ્તિ ક્રિયા ચ તેષાં વૈ સુખં દુઃખં વિચારતઃ ॥ ૪૮॥

ધર્માધર્મૌ જપો હોમો ધ્યાનં ધ્યાનવિધિસ્તથા ।
સર્વદા નિર્વિકારાસ્તે વિદ્યયા ચ તયામરાઃ ॥ ૪૯॥

પરાનન્દકરં લિઙ્ગં વિશુદ્ધં શિવમક્ષરમ્ ।
નિષ્કલં સર્વગં જ્ઞેયં યોગિનાં હૃદિ સંસ્થિતમ્ ॥ ૫૦॥

લિઙ્ગં તુ દ્વિવિધં પ્રોક્તં બાહ્યમાભ્યન્તરં દ્વિજાઃ ।
બાહ્યં સ્થૂલં સમુદ્દિષ્ટં સૂક્ષ્મમાભ્યન્તરં મતમ્ ॥ ૫૧॥

કર્મયજ્ઞરતા યે ચ સ્થૂલલિઙ્ગાર્ચને રતાઃ ।
અસતાં ભાવનાર્થાય સૂક્ષ્મેણ સ્થૂલવિગ્રહાઃ ॥ ૫૨॥

આધ્યાત્મિકં તુ યલ્લિઙ્ગં પ્રત્યક્ષં યસ્ય નો ભવેત્ ।
સ તલ્લિઙ્ગે તથા સ્થૂલે કલ્પયેચ્ચ ન ચાન્યથા ॥ ૫૩॥

જ્ઞાનિનાં સૂક્ષ્મમમલં ભાવાત્પ્રત્યક્ષમવ્યયમ્ ।
યથા સ્થૂલમયુક્તાનામુત્કૃષ્ટાદૌ પ્રકલ્પિતમ્ ॥ ૫૪॥

અહો વિચારતો નાસ્તિ હ્યન્યત્તત્ત્વાર્થવાદિનઃ ।
નિષ્કલં સકલં ચિત્તે સર્વં શિવમયં જગત્ ॥ ૫૫॥

એવં જ્ઞાનવિમુક્તાનાં નાસ્તિ દોષવિકલ્પના ।
વિધિશ્ચૈવ તથા નાસ્તિ વિહિતાવિહિતે તથા ॥ ૫૬॥

યથા જલેષુ કમલં સલિલૈર્નાવલિપ્યતે ।
તથા જ્ઞાની ગૃહે તિષ્ઠન્કર્મણા નાવબધ્યતે ॥ ૫૭॥

ઇતિ જ્ઞાનં સમુત્પન્નં યાવન્નૈવ નરસ્ય વૈ ।
તાવચ્ચ કર્મણા દેવં શિવમારાધયેન્નરઃ ॥ ૫૮॥

પ્રત્યયાર્થં ચ જગતામેકસ્થોઽપિ દિવાકરઃ ।
એકોઽપિ બહુધા દૃષ્ટો જલાધારાદિવસ્તુષુ ॥ ૫૯॥

દૃશ્યતે શ્રૂયતે લોકે યદ્યત્સદસદાત્મકમ્ ।
તત્તત્સર્વં સુરા વિત્ત પરં બ્રહ્મ શિવાત્મકમ્ ॥ ૬૦॥

ભેદો જલાનાં લોકેઽસ્મિન્પ્રતિભાવેઽવિચારતઃ ।
એવમાહુસ્તથા ચાન્યે સર્વે વેદાર્થતત્ત્વગાઃ ॥ ૬૧॥

હૃદિ સંસારિણઃ સાક્ષાત્સકલઃ પરમેશ્વરઃ ।
ઇતિ વિજ્ઞાનયુક્તસ્ય કિં તસ્ય પ્રતિમાદિભિઃ ॥ ૬૨॥

ઇતિ વિજ્ઞાનહીનસ્ય પ્રતિમાકલ્પના શુભા ।

પદમુચ્ચૈઃ સમારોઢું પુંસો હ્યાલમ્બનં સ્મૃતમ્ ॥ ૬૩॥

આલમ્બનં વિના તસ્ય પદમુચ્ચૈઃ સુદુષ્કરમ્ ।
નિર્ગુણપ્રાપ્તયે નૃણાં પ્રતિમાલમ્બનં સ્મૃતમ્ ॥ ૬૪॥

સગુણાન્નિર્ગુણપ્રાપ્તિર્ભવતીતિ સુનિશ્ચિતમ્ ।
એવં ચ સર્વદેવાનાં પ્રતિમા પ્રત્યયાવહા ॥ ૬૫॥

દેવશ્ચાયં મહીયાન્વૈ તસ્યાર્થે પૂજનં ત્વિદમ્ ।
ગન્ધચન્દનપુષ્પાદિ કિમર્થં પ્રતિમાં વિના ॥ ૬૬॥

તાવચ્ચ પ્રતિમા પૂજ્યા યાવદ્વિજ્ઞાનસમ્ભવઃ ।
જ્ઞાનાભાવે ન પૂજ્યેત પતનં તસ્ય નિશ્ચિતમ્ ॥ ૬૭॥

એતસ્માત્કારણાદ્વિપ્રાઃ શ્રૂયતાં પરમાર્થતઃ ।
સ્વજાત્યુક્તં તુ યત્કર્મ કર્તવ્યં તત્પ્રયત્નતઃ ॥ ૬૮॥

યત્ર યત્ર યથા ભક્તિઃ કર્તવ્યં પૂજનાદિકમ્ ।
વિના પૂજનદાનાદિ પાતકં ન ચ દૂરતઃ ॥ ૬૯॥

યાવચ્ચ પાતકં દેહે તાવત્સિદ્ધિર્ન જાયતે ।
ગતે ચ પાતકે તસ્ય સર્વં ચ સફલં ભવેત્ ॥ ૭૦॥

તથા ચ મલિને વસ્ત્રે રઙ્ગઃ શુભતરો ન હિ ।
ક્ષાલને હિ કૃતે શુદ્ધે સર્વો રઙ્ગઃ પ્રસજ્જતે ॥ ૭૧॥

તથા ચ નિર્મલે દેહે દેવાનાં સમ્યગર્ચયા ।
જ્ઞાનરઙ્ગઃ પ્રજાયેત તદા વિજ્ઞાનસમ્ભવઃ ॥ ૭૨॥

વિજ્ઞાનસ્ય ચ સન્મૂલં ભક્તિરવ્યભિચારિણી ।
જ્ઞાનસ્યાપિ ચ સન્મૂલં ભક્તિરેવાઽભિધીયતે ॥ ૭૩॥

ભક્તેર્મૂલં તુ સત્કર્મ સ્વેષ્ટદેવાદિપૂજનમ્ ।
તન્મૂલં સદ્ગુરુઃ પ્રોક્તસ્તન્મૂલં સઙ્ગતિઃ સતામ્ ॥ ૭૪॥

સઙ્ગત્યા ગુરુરાપ્યેત ગુરોર્મન્ત્રાદિપૂજનમ્ ।
પૂજનાજ્જાયતે ભક્તિર્ભક્ત્યા જ્ઞાનં પ્રજાયતે ॥ ૭૪॥

વિજ્ઞાનં જાયતે જ્ઞાનાત્પરબ્રહ્મપ્રકાશકમ્ ।
વિજ્ઞાનં ચ યદા જાતં તદા ભેદો નિવર્તતે ॥ ૭૬॥

ભેદે નિવૃત્તે સકલે દ્વન્દ્વદુઃખવિહીનતા ।
દ્વન્દ્વદુઃખવિહીનસ્તુ શિવરૂપો ભવત્યસૌ ॥ ૭૭॥

દ્વન્દ્વાપ્રાપ્તૌ ન જાયેતાં સુખદુઃખે વિજાનતઃ ।
વિહિતાવિહિતે તસ્ય ન સ્યાતાં ચ સુરર્ષયઃ ॥ ૭૮॥

ઈદૃશો વિરલો લોકે ગૃહાશ્રમવિવર્જિતઃ ।
યદિ લોકે ભવત્યસ્મિન્દર્શનાત્પાપહારકઃ ॥ ૭૯॥

તીર્થાનિ શ્લાઘયન્તીહ તાદૃશં જ્ઞાનવિત્તમમ્ ।
દેવાશ્ચ મુનયઃ સર્વે પરબ્રહ્માત્મકં શિવમ્ ॥ ૮૦॥

તાદૃશાનિ ન તીર્થાનિ ન દેવા મૃચ્છિલામયાઃ ।
તે પુનન્ત્યુરુકાલેન વિજ્ઞાની દર્શનાદપિ ॥ ૮૧॥

યાવદ્ગૃહાશ્રમે તિષ્ઠેત્તાવદાકારપૂજનમ્ ।
કુર્યાચ્છ્રેષ્ઠસ્ય સુપ્રીત્યા સુરેષુ ખલુ પઞ્ચસુ ॥ ૮૨॥

અથવા ચ શિવઃ પૂજ્યો મૂલમેકં વિશિષ્યતે ।
મૂલે સિક્તે તથા શાખાઃ તૃપ્તાઃ સત્યખિલાઃ સુરાઃ ॥ ૮૩॥

શાખાસુ ચ સુતૃપ્તાસુ મૂલં તૃપ્તં ન કર્હિચિત્ ।
એવં સર્વેષુ તૃપ્તેષુ સુરેષુ મુનિસત્તમાઃ ॥ ૮૪॥

સર્વથા શિવતૃપ્તિર્નો વિજ્ઞેયા સૂક્ષ્મબુદ્ધિભિઃ ।
શિવે ચ પૂજિતે દેવાઃ પૂજિતાઃ સર્વ એવ હિ ॥ ૮૫॥

તસ્માચ્ચ પૂજયેદ્દેવં શઙ્કરં લોકશઙ્કરમ્ ।
સર્વકામફલાવાપ્ત્યૈ સર્વભૂતહિતે રતઃ ॥ ૮૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્ર સંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને પૂજાવિધિવર્ણને સારાસારવિચારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૧.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૧૩. ત્રયોદશોઽધ્યાયઃ । શિવપૂજનવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ પૂજાવિધિમનુત્તમમ્ ।
શ્રૂયતામૃષયો દેવાઃસર્વકામસુખાવહમ્ ॥ ૧॥

બ્રાહ્મે મુહૂર્તે ચોત્થાય સંસ્મરેત્સામ્બકં શિવમ્ ।
કુર્યાત્તત્પ્રાર્થનાં ભક્ત્યા સાઞ્જલિર્નતમસ્તકઃ ॥ ૨॥

ઉત્તિષ્ઠોત્તિષ્ઠ દેવેશ ઉત્તિષ્ઠ હૃદયેશય ।
ઉત્તિષ્ઠ ત્વમુમાસ્વામિન્બ્રહ્માણ્ડે મઙ્ગલં કુરુ ॥ ૩॥

જાનામિ ધર્મં ન ચ મે પ્રવૃત્તિ-
ર્જાનામ્યધર્મં ન ચ મે નિવૃત્તિઃ ।
ત્વયા મહાદેવ હૃદિ સ્થિતેન
યથા નિયુક્તોઽસ્મિ તથા કરોમિ ॥ ૪॥

ઇત્યુક્ત્વા વચનં ભક્ત્યા સ્મૃત્વા ચ ગુરુપાદકે ।
બહિર્ગચ્છેદ્દક્ષિણાશાં ત્યાગાર્થં મલમૂત્રયોઃ ॥ ૫॥

દેહશુદ્ધિં તતઃ કૃત્વા સ મૃજ્જલવિશોધનૈઃ ।
હસ્તૌ પાદૌ ચ પ્રક્ષાલ્ય દન્તધાવનમાચરેત્ ॥ ૬॥

દિવાનાથે ત્વનુદિતે કૃત્વા વૈ દન્તધાવનમ્ ।
મુખં ષોડશવારં તુ પ્રક્ષાલ્યાઞ્જલિભિસ્તથા ॥ ૭॥

ષષ્ઠ્યાદ્યામાશ્ચ તિથયો નવમ્યર્કદિને તથા ।
વર્જ્યાઃ સુરર્ષયો યત્નાદ્ભક્તેન રદધાવને ॥ ૮॥

યથાવકાશં સુસ્નાયાન્નદ્યાદિષ્વથવા ગૃહે ।
દેશકાલાવિરુદ્ધં ચ સ્નાનં કાર્યં નરેણ ચ ॥ ૯॥

રવેર્દિને તથા શ્રાદ્ધે સઙ્ક્રાન્તૌ ગ્રહણે તથા ।
મહાદાને તથા તીર્થે હ્યુપવાસદિને તથા ॥ ૧૦॥

અશૌચેઽપ્યથવા પ્રાપ્તે ન સ્નાયાદુષ્ણવારિણા ।
યથા સાભિમુખં સ્નાયાત્તીર્થાદૌ ભક્તિમાન્નરઃ ॥ ૧૧॥

તૈલાભ્યઙ્ગં ચ કુર્વીત વારાન્દૃષ્ટ્વા ક્રમેણ ચ ।
નિત્યમભ્યઙ્ગકે ચૈવ વાસિતં વા ન દૂષિતમ્ ॥ ૧૨॥

શ્રાદ્ધે ચ ગ્રહણે ચૈવોપવાસે પ્રતિપદ્દિને ।
અથવા સાર્ષપં તૈલં ન દુષ્યેદ્ ગ્રહણં વિના ॥ ૧૩॥

દેશં કાલં વિચાર્યૈવં સ્નાનં કુર્યાદ્યથાવિધિ ।
ઉત્તરાભિમુખશ્ચૈવ પ્રાઙ્મુખોઽપ્યથવા પુનઃ ॥ ૧૪॥

ઉચ્છિષ્ટેનૈવ વસ્ત્રેણ ન સ્નાયાત્સ કદાચન ।
શુદ્ધવસ્ત્રેણ સ સ્નાયાત્તદ્દેવસ્મૃતિપૂર્વકમ્ ॥ ૧૫॥

પરધાર્યં ચ નોચ્છિષ્ટં રાત્રૌ ચ વિધૃતં ચ યત્ ।
તેન સ્નાનં તથા કાર્યં ક્ષાલિતં ચ પરિત્યજેત્ ॥ ૧૬॥

તર્પણં ચ તતઃ કાર્યં દેવર્ષિપિતૃતૃપ્તિદમ્ ।
ધૌતવસ્ત્રં તતો ધાર્યં પુનરાચમનં ચરેત્ ॥ ૧૭॥

શુચૌ દેશે તતો ગત્વા ગોમયાદ્યપમાર્જિતે ।
આસનં ચ શુભં તત્ર રચનીયં દ્વિજોત્તમાઃ ॥ ૧૮॥

શુદ્ધકાષ્ઠસમુત્પન્નં પૂર્ણં સ્તરિતમેવ વા ।
ચિત્રાસનં તથા કુર્યાત્સર્વકામફલપ્રદમ્ ॥ ૧૯॥

યથાયોગ્યં પુનર્ગ્રાહ્યં મૃગચર્માદિકં ચ યત્ ।
તત્રોપવિશ્ય કુર્વીત ત્રિપુણ્ડ્રં ભસ્મના સુધીઃ ॥ ૨૦॥

જપસ્તપસ્તથા દાનં ત્રિપુણ્ડ્રાત્સફલં ભવેત્ ।
અભાવે ભસ્મનસ્તત્ર જલસ્યાદિ પ્રકીર્તિતમ્ ॥ ૨૧॥

એવં કૃત્વા ત્રિપુણ્ડ્રં ચ રુદ્રાક્ષાન્ધારયેન્નરઃ ।
સમ્પાદ્ય ચ સ્વકં કર્મ પુનરારાધયેચ્છિવમ્ ॥ ૨૨॥

પુનરાચમનં કૃત્વા ત્રિવારં મન્ત્રપૂર્વકમ્ ।
એકં વાથ પ્રકુર્યાચ્ચ ગઙ્ગાબિન્દુરિતિ બ્રુવન્ ॥ ૨૩॥

અન્નોદકં તથા તત્ર શિવપૂજાર્થમાહરેત્ ।
અન્યદ્વસ્તુ ચ યત્કિઞ્ચિદ્યથાશક્તિ સમીપગમ્ ॥ ૨૪॥

કૃત્વા સ્થેયં ચ તત્રૈવ ધૈર્યમાસ્થાય વૈ પુનઃ ।
અર્ઘપાત્રં તથા ચૈકં જલગન્ધાક્ષતૈર્યુતમ્ ॥ ૨૫॥

દક્ષિણાંસે તથા સ્થાપ્યમુપચારસ્ય ક્લૃપ્તયે ।
ગુરોશ્ચ સ્મરણં કૃત્વા તદનુજ્ઞામવાપ્ય ચ ॥ ૨૬॥

સઙ્કલ્પં વિધિવત્કૃત્વા કામનાં ચ નિયુજ્ય વૈ ।
પૂજયેત્પરયા ભક્ત્યા શિવં સપરિવારકમ્ ॥ ૨૭॥

મુદ્રામેકાં પ્રદર્શ્યૈવ પૂજયેદ્વિઘ્નહારકમ્ ।
સિન્દુરાદિપદાર્થૈશ્ચ સિદ્ધિબુદ્ધિસમન્વિતમ્ ॥ ૨૮॥

લક્ષલાભયુતં તત્ર પૂજયિત્વા નમેત્પુનઃ ।
ચતુર્થ્યન્તૈર્નામપદૈર્નમોઽન્તૈઃ પ્રણવાદિભિઃ ॥ ૨૯॥

ક્ષમાપ્યૈનં તદા દેવં ભ્રાત્રા ચૈવ સમન્વિતમ્ ।
પૂજયેત્પરયા ભક્ત્યા નમસ્કુર્યાત્પુનઃ પુનઃ ॥ ૩૦॥

દ્વારપાલં સદા દ્વારિ તિષ્ઠન્તં ચ મહોદરમ્ ।
પૂજયિત્વા તતઃ પશ્ચાત્પૂજયેદ્ગિરિજાં સતીમ્ ॥ ૩૧॥

ચન્દનૈઃ કુઙ્કુમૈશ્ચૈવ ધૂપૈર્દીપૈરનેકશઃ ।
નૈવેદ્યૈર્વિવિધૈશ્ચૈવ પૂજયિત્વા તતઃ શિવમ્ ॥ ૩૨॥

નમસ્કૃત્ય પુનસ્તત્ર ગચ્છેચ્ચ શિવસન્નિધૌ ।
યદિ ગેહે પાર્થિવીં વા હૈમીં વા રાજતીં તથા ॥ ૩૩॥

ધાતુજન્યાં તથૈવાન્યાં પારદાં વા પ્રકલ્પયેત્ ।
નમસ્કૃત્ય પુનસ્તાં ચ પૂજયેદ્ભક્તિતત્પરઃ ॥ ૩૪॥

તસ્યાં તુ પૂજિતાયાં વૈ સર્વે સ્યુઃ પૂજિતાસ્તથા ।
સ્થાપયેચ્ચ મૃદા લિઙ્ગં વિધાય વિધિપૂર્વકમ્ ॥ ૩૫॥

કર્તવ્યં સર્વથા તત્ર નિયમાઃ સ્વગૃહે સ્થિતૈઃ ।
પ્રાણપ્રતિષ્ઠાં કુર્વીત ભૂતશુદ્ધિં વિધાય ચ ॥ ૩૬॥

દિક્પાલાન્પૂજયેત્તત્ર સ્થાપયિત્વા શિવાલયે ।
ગૃહે શિવઃ સદા પૂજ્યો મૂલમન્ત્રાભિયોગતઃ ॥ ૩૭॥

તત્ર તુ દ્વારપાલાનાં નિયમો નાસ્તિ સર્વથા ।
ગૃહે લિઙ્ગં ચ યત્પૂજ્યં તસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ॥ ૩૮॥

પૂજાકાલે ચ સાઙ્ગં વૈ પરિવારેણ સંયુતમ્ ।
આવાહ્ય પૂજયેદ્દેવં નિયમોઽત્ર ન વિદ્યતે ॥ ૩૯॥

શિવસ્ય સન્નિધિં કૃત્વા સ્વાસનં પરિકલ્પયેત્ ।

ઉદઙ્મુખસ્તદા સ્થિત્વા પુનરાચમનં ચરેત્ ॥ ૪૦॥

પ્રક્ષાલ્ય હસ્તૌ પશ્ચાદ્વૈ પ્રાણાયામં પ્રકલ્પયેત્ ।
મૂલમન્ત્રેણ તત્રૈવ દશાવર્તં નયેન્નરઃ ॥ ૪૧॥

પઞ્ચમુદ્રાઃ પ્રકર્તવ્યાઃ પૂજાવશ્યં કરે સ્થિતા ।
એતા મુદ્રાઃ પ્રદર્શ્યૈવ ચરેત્પૂજાવિધિં નરઃ ॥ ૪૨॥

દીપં કૃત્વા તદા તત્ર નમસ્કારં ગુરોરથ ।
બધ્વા પદ્માસનં તત્ર ભદ્રાસનમથાપિ વા ॥ ૪૩॥

ઉત્તાનાસનકં કૃત્વા પર્યઙ્કાસનકં તથા ।
યથાસુખં તથા સ્થિત્વા પ્રયોગં પુનરેવ ચ ॥ ૪૪॥

કૃત્વા પૂજાં પુરા જાતાં વટ્ટકેનૈવ તારયેત્ ।
યદિ વા સ્વયમેવેહ ગૃહે ન નિયમોઽસ્તિ ચ ॥ ૪૫॥

પશ્ચાચ્ચૈવાર્ઘપાત્રેણ ક્ષાલયેલ્લિઙ્ગમુત્તમમ્ ।
અનન્યમાનસો ભૂત્વા પૂજાદ્રવ્યં નિધાય ચ ॥ ૪૬॥

પશ્ચાચ્ચાવાહયેદ્દેવં મન્ત્રેણાનેન વૈ નરઃ ।
કૈલાસશિખરસ્થં ચ પાર્વતીપતિમુત્તમમ્ ॥ ૪૭॥

યથોક્તરૂપિણં શમ્ભું નિર્ગુણં ગુણરૂપિણમ્ ।
પઞ્ચવક્ત્રં દશભુજં ત્રિનેત્રં વૃષભધ્વજમ્ ॥ ૪૮॥

કર્પૂરગૌરં દિવ્યાઙ્ગં ચન્દ્રમૌલિં કપર્દિનમ્ ।
વ્યાઘ્રચર્મોત્તરીયં ચ ગજચર્મામ્બરં શુભમ્ ॥ ૪૯॥

વાસુક્યાદિપરીતાઙ્ગં પિનાકાદ્યાયુધાન્વિતમ્ ।
સિદ્ધયોઽષ્ટૌ ચ યસ્યાગ્રે નૃત્યન્તીહ નિરન્તરમ્ ॥ ૫૦॥

જયજયેતિ શબ્દૈશ્ચ સેવિતં ભક્તપુઞ્જકૈઃ ।
તેજસા દુઃસહેનૈવ દુર્લક્ષ્યં દેવસેવિતમ્ ॥ ૫૧॥

શરણ્યં સર્વસત્ત્વાનાં પ્રસન્નમુખપઙ્કજમ્ ।
વેદૈઃ શાસ્ત્રૈર્યથાગીતં વિષ્ણુબ્રહ્મનુતં સદા ॥ ૫૨॥

ભક્તવત્સલમાનન્દં શિવમાવાહયામ્યહમ્ ।
એવં ધ્યાત્વા શિવં સામ્બમાસનં પરિકલ્પયેત્ ॥ ૫૩॥

ચતુર્થ્યન્તપદેનૈવ સર્વં કુર્યાદ્યથાક્રમમ્ ।
તતઃ પાદ્યં પ્રદદ્યાદ્વૈ તતોઽર્ઘ્યં શઙ્કરાય ચ ॥ ૫૪॥

તતશ્ચાચમનં કૃત્વા શમ્ભવે પરમાત્મને ।
પશ્ચાચ્ચ પઞ્ચભિર્દ્રવ્યૈઃ સ્નાપયેચ્છઙ્કરં મુદા ॥ ૫૫॥

વેદમન્ત્રૈર્યથાયોગ્યં નામભિર્વા સમન્ત્રકૈઃ ।
ચતુર્થ્યન્તપદૈર્ભક્ત્યા દ્રવ્યાણ્યેવાર્પયેત્તદા ॥ ૫૬॥

તથાભિલષિતં દ્રવ્યમર્પયેચ્છઙ્કરોપરિ ।
તતશ્ચ વારુણં સ્નાનં કરણીયં શિવાય વૈ ॥ ૫૭॥

સુગન્ધં ચન્દનં દદ્યાદન્યલેપાનિ યત્નતઃ ।
સસુગન્ધજલેનૈવ જલધારાં પ્રકલ્પયેત્ ॥ ૫૮॥

વેદમન્ત્રૈઃ ષડઙ્ગૈર્વા નામભી રુદ્રસઙ્ખ્યયા ।
યથાવકાશં તાં દત્વા વસ્ત્રેણ માર્જયેત્તતઃ ॥ ૫૯॥

પશ્ચાદાચમનં દદ્યાત્તતો વસ્ત્રં સમર્પયેત ।
તિલાશ્ચૈવ યવા વાપિ ગોધૂમા મુદ્ગમાષકાઃ ॥ ૬૦॥

અર્પણીયાઃ શિવાયૈવં મન્ત્રૈર્નાનાવિધૈરપિ ।
તતઃ પુષ્પાણિ દેયાનિ પઞ્ચાસ્યાય મહાત્મને ॥ ૬૧॥

પ્રતિવક્ત્રં યથાધ્યાનં યથાયોગ્યાભિલાષતઃ ।
કમલૈઃ શતપત્રૈશ્ચ શઙ્ખપુષ્પૈઃ પરૈસ્તથા ॥ ૬૨॥

કુશપુષ્પૈશ્ચ ધત્તૂરૈર્મન્દારૈર્દ્રોણસમ્ભવૈઃ ।
તથા ચ તુલસીપત્રૈર્બિલ્વપત્રૈર્વિશેષતઃ ॥ ૬૩॥

પૂજયેત્પરયા ભક્ત્યા શઙ્કરં ભક્તવત્સલમ્ ।
સર્વાભાવે બિલ્વપત્રમર્પણીયં શિવાય વૈ ॥ ૬૪॥

બિલ્વપત્રાર્પણેનૈવ સર્વપૂજા પ્રસિધ્યતિ ।
તતઃ સુગન્ધચૂર્ણં વૈ વાસિતં તૈલમુત્તમમ્ ॥ ૬૫॥

અર્પણીયં ચ વિવિધં શિવાય પરયા મુદા ।
તતો ધૂપઃ પ્રકર્તવ્યો ગુગ્ગુલાગુરુભિર્મુદા ॥ ૬૬॥

દીપો દેયસ્તતસ્તસ્મૈ શઙ્કરાય ઘૃતાપ્લુતઃ ।
અર્ઘં દદ્યાત્પુનસ્તસ્મૈ મન્ત્રેણાનેન ભક્તિતઃ ॥ ૬૭॥

કારયેદ્ભાવતો ભક્ત્યા વસ્ત્રેણ મુખમાર્જનમ્ ।
રૂપં દેહિ યશો દેહિ ભોગં દેહિ ચ શઙ્કર ॥ ૬૮॥

ભુક્તિમુક્તિફલં દેહિ ગૃહીત્વાર્ઘં નમોઽસ્તુ તે ।
તતો દેયં શિવાયૈવ નૈવેદ્યં વિવિધં શુભમ્ ॥ ૬૯॥

તત આચમનં પ્રીત્યા કારયેદ્વાવિલમ્બતઃ ।
તતઃ શિવાય તામ્બૂલં સાઙ્ગોપાઙ્ગં વિધાય ચ ॥ ૭૦॥

કુર્યાદારાર્તિકં પઞ્ચવર્તિકામનુસઙ્ખ્યયા ।
પાદયોશ્ચ ચતુર્વારં દ્વિઃકૃત્વો નાભિમણ્ડલે ॥ ૭૧॥

એકકૃત્વો મુખે સપ્તકૃત્વઃ સર્વાઙ્ગ એવ હિ ।
તતો ધ્યાનં યથોક્તં વૈ કૃત્વા મન્ત્રમુદીરયેત્ ॥ ૭૨॥

યથાસઙ્ખ્યં યથાજ્ઞાનં કુર્યાન્મન્ત્રવિધિં નરઃ ।
ગુરૂપદિષ્ટમાર્ગેણ કૃત્વા મન્ત્રજપં સુધીઃ ॥ ૭૩॥

ગુરૂપદિષ્ટમાર્ગેણ કૃત્વા મન્ત્રમુદીરયેત્ ।
યથાસઙ્ખ્યં યથાજ્ઞાનં કુર્યાન્મન્ત્રવિધિં નરઃ ॥ ૭૪॥

સ્તોત્રૈર્નાનાવિધૈઃ પ્રીત્યા સ્તુવીત વૃષભધ્વજમ્ ।
તતઃ પ્રદક્ષિણાં કુર્યાચ્છિવસ્ય ચ શનૈઃ શનૈઃ ॥ ૭૫॥

નમસ્કારાંસ્તતઃ કુર્યાત્સાષ્ટાઙ્ગં વિધિવત્પુમાન્ ।
તતઃ પુષ્પાઞ્જલિર્દેયો મન્ત્રેણાનેન ભક્તિતઃ ॥ ૭૬॥

શઙ્કરાય પરેશાય શિવસન્તોષહેતવે ।
અજ્ઞાનાદ્યદિ વા જ્ઞાનાદ્યદ્યત્પૂજાદિકં મયા ॥ ૭૭॥

કૃતં તદસ્તુ સફલં કૃપયા તવ શઙ્કર ।
તાવકસ્ત્વદ્ગતપ્રાણસ્ત્વચ્ચિત્તોઽહં સદા મૃડ ॥ ૭૮॥

ઇતિ વિજ્ઞાય ગૌરીશ ભૂતનાથ પ્રસીદ મે ।
ભૂમૌ સ્ખલિતપાદાનાં ભૂમિરેવાવલમ્બનમ્ ॥ ૭૯॥

ત્વયિ જાતાપરાધાનાં ત્વમેવ શરણં પ્રભો ।
ઇત્યાદિ બહુવિજ્ઞપ્તિં કૃત્વા સમ્યગ્વિધાનતઃ ॥ ૮૦॥

પુષ્પાઞ્જલિં સમર્પ્યૈવ પુનઃ કુર્યાન્નતિં મુહુઃ ।

સ્વસ્થાનં ગચ્છ દેવેશ પરિવારયુતઃ પ્રભો ॥ ૮૧॥

પૂજાકાલે પુનર્નાથ ત્વયાગન્તવ્યમાદરાત્ ।
ઇતિ સમ્પ્રાર્થ્ય બહુશઃ શઙ્કરં ભક્તવત્સલમ્ ॥ ૮૨॥

વિસર્જયેત્સ્વહૃદયે તદપો મૂર્ધ્નિ વિન્યસેત્ ।
ઇતિ પ્રોક્તમશેષેણ મુનયઃ શિવપૂજનમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈવ કિમન્યચ્છ્રોતુમર્હથ ॥ ૮૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને શિવપૂજનવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૨.૧.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ

## ૨.૧.૧૪. ચતુર્દશોઽધ્યાયઃ । શિવપૂજાવિધાનવર્ણનમ્ ।

ઋષય ઊચુઃ ।
વ્યાસશિષ્ય મહાભાગ કથય ત્વં પ્રમાણતઃ ।
કૈઃ પુષ્પૈઃ પૂજિતઃ શમ્ભુઃ કિં કિં યચ્છતિ વૈ ફલમ્ ॥ ૧॥

સૂત ઉવાચ ।
શૌનકાદ્યાશ્ચ ઋષયઃ શૃણુતાદરતોઽખિલમ્ ॥

કથયામ્યદ્ય સુપ્રીત્યા પુષ્પાર્પણવિનિર્ણયમ્ । ૨॥

એષ એવ વિધિઃ પૃષ્ટો નારદેન મહર્ષિણા ।
પ્રોવાચ પરમપ્રીત્યા પુષ્પાર્પણવિનિર્ણયમ્ ॥ ૩॥

બ્રહ્મોવાચ ।
કમલૈર્બિલ્વપત્રૈશ્ચ શતપત્રૈસ્તથા પુનઃ ।
શઙ્ખપુષ્પૈસ્તથા દેવં લક્ષ્મીકામોઽર્ચયેચ્છિવમ્ ॥ ૪॥

એતૈશ્ચ લક્ષસઙ્ખ્યાકૈઃ પૂજિતશ્ચેદ્ભવેચ્છિવઃ ।
પાપહાનિસ્તથા વિપ્ર લક્ષ્મીઃ સ્યાન્નાત્ર સંશયઃ ॥ ૫॥

વિંશતિઃ કમલાનાં તુ પ્રસ્થમેકમુદાહૃતમ્ ।

બિલ્વો દલસહસ્રેણ પ્રસ્થાર્ધં પરિભાષિતમ્ ॥ ૬॥

શતપત્રસહસ્રેણ પ્રસ્થાર્ધં પરિભાષિતમ્ ।
પલૈઃ ષોડશભિઃ પ્રસ્થઃ પલં ટઙ્કદશસ્મૃતઃ ॥ ૭॥

અનેનૈવ તુ માનેન તુલામારોપયેદ્યદા ।
સર્વાન્કામાનવાપ્નોતિ નિષ્કામશ્ચેચ્છિવો ભવેત્ ॥ ૮॥

રાજ્યસ્ય કામુકો યો વૈ પાર્થિવાનાં ચ પૂજયા ।
તોષયેચ્છઙ્કરં દેવં દશકોટ્યા મુનીશ્વરાઃ ॥ ૯॥

લિઙ્ગં શિવં તથા પુષ્પમખણ્ડં તણ્ડુલં તથા ।
ચર્ચિતં ચન્દનેનૈવ જલધારાં તથા પુનઃ ॥ ૧૦॥

પ્રતિરૂપં તથા મન્ત્રં બિલ્વીદલમનુત્તમમ્ ।
અથવા શતપત્રં ચ કમલં વા તથા પુનઃ ॥ ૧૧॥

શઙ્ખપુષ્પૈસ્તથા પ્રોક્તં વિશેષેણ પુરાતનૈઃ ।
સર્વકામફલં દિવ્યં પરત્રેહાપિ સર્વથા ॥ ૧૨॥

ધૂપં દીપં ચ નૈવેદ્યમર્ઘં ચારાર્તિકં તથા ।
પ્રદક્ષિણાં નમસ્કારં ક્ષમાપનવિસર્જને ॥ ૧૩॥

કૃત્વા સાઙ્ગં તથા ભોજ્યં કૃતં યેન ભવેદિહ ।
તસ્ય વૈ સર્વથા રાજ્યં શઙ્કરઃ પ્રદદાતિ ચ ॥ ૧૪॥

પ્રધાન્યકામુકો યો વૈ તદર્ધેનાર્ચયેત્પુમાન્ ।
કારાગૃહગતો યો વૈ લક્ષેનૈવાર્ચયેદ્ધરમ્ ॥ ૧૫॥

રોગગ્રસ્તો યદા સ્યાદ્વૈ તદર્ધેનાર્ચયેચ્છિવમ્ ।
કન્યાકામો ભવેદ્યો વૈ તદર્ધેન શિવં પુનઃ ॥ ૧૬॥

વિદ્યાકામસ્તથા યઃ સ્યાત્તદર્ધેનાર્ચયેચ્છિવમ્ ।
વાણીકામો ભવેદ્યો વૈ ધૃતેનૈવાર્ચયેચ્છિવમ્ ॥ ૧૭॥

ઉચ્ચાટનાર્થં શત્રૂણાં તન્મિતેનૈવ પૂજનમ્ ।
મારણે વૈ તુ લક્ષેણ મોહને તુ તદર્ધતઃ ॥ ૧૮॥

સામન્તાનાં જયે ચૈવ કોટિપૂજા પ્રશસ્યતે ।
રાજ્ઞામયુતસઙ્ખ્યં ચ વશીકરણકર્મણિ ॥ ૧૯॥

યશસે ચ તથા સઙ્ખ્યા વાહનાદ્યૈઃ સહસ્રિકા ।
મુક્તિકામોऽર્ચયેચ્છમ્ભું પઞ્ચકોટ્યા સુભક્તિતઃ ॥ ૨૦॥

જ્ઞાનાર્થી પૂજયેત્કોટ્યા શઙ્કરં લોક શઙ્કરમ્ ।
શિવદર્શનકામો વૈ તદર્ધેન પ્રપૂજયેત્ ॥ ૨૧॥

તથા મૃત્યુઞ્જયો જાપ્યઃ કામનાફલરૂપતઃ ।
પઞ્ચલક્ષા જપા યર્હિ પ્રત્યક્ષં તુ ભવેચ્છિવઃ ॥ ૨૨॥

લક્ષેણ ભજતે કશ્ચિદ્ દ્વિતીયે જાતિસમ્ભવઃ ।
તૃતીયે કામનાલાભશ્ચતુર્થે તં પ્રપશ્યતિ ॥ ૨૩॥

પઞ્ચમં ચ યદા લક્ષં ફલં યચ્છત્યસંશયમ્ ।
અનેનૈવ તુ મન્ત્રેણ દશલક્ષે ફલં ભવેત્ ॥ ૨૪॥

મુક્તિકામો ભવેદ્યો વૈ દર્ભૈશ્ચ પૂજનં ચરેત્ ।
લક્ષસઙ્ખ્યા તુ સર્વત્ર જ્ઞાતવ્યા ઋષિસત્તમ ॥ ૨૫॥

આયુઃકામો ભવેદ્યો વૈ દૂર્વાભિઃ પૂજનં ચરેત્ ।
પુત્રકામો ભવેદ્યો વૈ ધત્તૂરકુસુમૈશ્ચરેત્ ॥ ૨૬॥

રક્તદણ્ડશ્ચ ધત્તૂરઃ પૂજને શુભદઃ સ્મૃતઃ ।
અગસ્ત્યકુસુમૈશ્ચૈવ પૂજકસ્ય મહદ્યશઃ ॥ ૨૭॥

ભુક્તિમુક્તિફલં તસ્ય તુલસ્યા પૂજયેદ્યદિ ।
અર્કપુષ્પૈઃ પ્રતાપશ્ચ કુબ્જકહ્લારકૈસ્તથા ॥ ૨૮॥

જપાકુસુમપૂજા તુ શત્રૂણાં મૃત્યુદા સ્મૃતા ।
રોગોચ્ચાટનકાનીહ કરવીરાણિ વૈ ક્રમાત્ ॥ ૨૯॥

બન્ધુકૈર્ભૂષણાવાપ્તિર્જાત્યા વાહાન્ન સંશયઃ ।
અતસીપુષ્પકૈર્દેવં વિષ્ણુવલ્લભતામિયાત્ .. .. ૩૦॥

શમીપત્રૈસ્તથા મુક્તિઃ પ્રાપ્યતે પુરુષેણ ચ ।
મલ્લિકાકુસુમૈર્દત્તૈઃ સ્ત્રિયં શુભતરાં શિવઃ ॥ ૩૧॥

યૂથિકાકુસુમૈઃ શસ્તૈર્ગૃહં નૈવ વિમુચ્યતે ।
કર્ણિકારૈસ્તથા વસ્ત્રસમ્પત્તિર્જાયતે નૃણામ્ ॥ ૩૨॥

નિર્ગુણ્ડીકુસુમૈર્લોકે મનો નિર્મલતાં વ્રજેત્ ।
વિલ્વપત્રૈસ્તથા લક્ષૈઃ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૩૩॥

શૃઙ્ગારહારપુષ્પૈસ્તુ વર્ધતે સુખસમ્પદા ।
ઋતુજાતાનિ પુષ્પાણિ મુક્તિદાનિ ન સંશયઃ ॥ ૩૪॥

રાજિકાકુસુમાનીહ શત્રૂણાં મૃત્યુદાનિ ચ ।
એષાં લક્ષં શિવે દદ્યાદ્દદ્યાચ્ચ વિપુલં ફલમ્ ॥ ૩૫॥

વિદ્યતે કુસુમં તન્ન યન્નૈવ શિવવલ્લભમ્ ।
ચમ્પકં કેતકં હિત્વા ત્વન્યત્સર્વં સમર્પયેત્ ॥ ૩૬॥

અતઃ પરં ચ ધાન્યાનાં પૂજને શઙ્કરસ્ય ચ ।
પ્રમાણં ચ ફલં સર્વં પ્રીત્યા શૃણુ ચ સત્તમ ॥ ૩૭॥

તન્દુલારોપણે નૃણાં લક્ષ્મી વૃદ્ધિઃ પ્રજાયતે ।
અખણ્ડિતવિધૌ વિપ્ર સમ્યગ્ભક્ત્યા શિવોપરિ ॥ ૩૮॥

ષટ્કેનૈવ તુ પ્રસ્થાનાં તદર્ધેન તથા પુનઃ ।
પલદ્વયં તથા લક્ષમાનેન સમુદાહૃતમ્ ॥ ૩૯॥

પૂજાં રુદ્રપ્રધાનેન કૃત્વા વસ્ત્રં સુસુન્દરમ્ ।
શિવોપરિ ન્યસેત્તત્ર તન્દુલાર્પણમુત્તમમ્ ॥ ૪૦॥

ઉપરિ શ્રીફલં ત્વેકં ગન્ધપુષ્પાદિભિસ્તથા ।
રોપયિત્વા ચ ધૂપાદિ કૃત્વા પૂજાફલં ભવેત્ .. .. ૪૧॥

પ્રજાપત્યદ્વયં રૌપ્યમાષસઙ્ખ્યા ચ દક્ષિણા ।
દેયા તદુપદેષ્ટ્રે હિ શક્ત્યા વા દક્ષિણા મતા ॥ ૪૨॥

આદિત્યસઙ્ખ્યયા તત્ર બ્રાહ્મણાન્ભોજયેત્તતઃ ।
લક્ષપૂજા તથા જાતા સાઙ્ગઞ્ચ મન્ત્રપૂર્વકમ્ ॥ ૪૩॥

શતમષ્ટોત્તરં તત્ર મન્ત્રે વિધિરુદાહૃતઃ ।
તિલાનાં ચ પલં લક્ષં મહાપાતકનાશનમ્ ॥ ૪૪॥

એકાદશપલૈરેવ લક્ષમાનમુદાહૃતમ્ ।
પૂર્વવત્પૂજનં તત્ર કર્તવ્યં હિતકામ્યયા ॥ ૪૫॥

ભોજ્યા વૈ બ્રાહ્મણાસ્તસ્માદત્ર કાર્યા નરેણ હિ ।
મહાપાતકજં દુઃખં તત્ક્ષણાન્નશ્યતિ ધ્રુવમ્ ॥ ૪૬॥

યવપૂજા તથા પ્રોક્તા લક્ષેણ પરમા શિવે ।

પ્રસ્થાનામષ્ટકં ચૈવ તથા પ્રસ્થાર્ધકં પુનઃ ॥ ૪૭॥

પલદ્વયયુતં તત્ર માનમેતત્પુરાતનમ્ ।
યવપૂજા ચ મુનિભિઃ સ્વર્ગસૌખ્યવિવર્ધિની ॥ ૪૮॥

પ્રાજાપત્યં બ્રાહ્મણાનાં કર્તવ્યં ચ ફલેપ્સુભિઃ ।
ગોધૂમાન્નૈસ્તથા પૂજા પ્રશસ્તા શઙ્કરસ્ય વૈ ॥ ૪૯॥

સન્તતિર્વર્ધતે તસ્ય યદિ લક્ષાવધિઃ કૃતા ।
દ્રોણાર્ધેન ભવેલ્લક્ષં વિધાનં વિધિપૂર્વકમ્ ॥ ૫૦॥

મુદ્ગાનાં પૂજને દેવઃ શિવો યચ્છતિ વૈ સુખમ્ ।
પ્રસ્થાનાં સપ્તકેનૈવ પ્રસ્થાર્ધેનાથવા પુનઃ ॥ ૫૧॥

પલદ્વયયુતેનૈવ લક્ષમુક્તં પુરાતનૈઃ ।
બ્રાહ્મણાશ્ચ તથા ભોજ્યા રુદ્રસઙ્ખ્યાપ્રમાણતઃ ॥ ૫૨॥

પ્રિયઙ્ગુપૂજનાદેવ ધર્માધ્યક્ષે પરાત્મનિ ।
ધર્માર્થકામા વર્ધન્તે પૂજા સર્વસુખાવહા ॥ ૫૩॥

પ્રસ્થૈકેન ચ તસ્યોક્તં લક્ષમેકં પુરાતનૈઃ ।
બ્રહ્મભોજં તથા પ્રોક્તમર્કસઙ્ખ્યાપ્રમાણતઃ ॥ ૫૪॥

રાજિકાપૂજનં શમ્ભોઃ શત્રોર્મૃત્યુકરં સ્મૃતમ્ ।
સર્ષપાનાં તથા લક્ષં પલૈર્વિંશતિસઙ્ખ્યયા ॥ ૫૫॥

તેષાં ચ પૂજનાદેવ શત્રોર્મૃત્યુરુદાહૃતઃ ।
આઢકીનાં દલૈશ્ચૈવ શોભયિત્વાર્ચયેચ્છિવમ્ ॥ ૫૬॥

વૃતા ગૌશ્ચ પ્રદાતવ્યા બલીવર્દસ્તથૈવ ચ ।
મરીચિસમ્ભવા પૂજા શત્રોર્નાશકરી સ્મૃતા ॥ ૫૭॥

આઢકીનાં દલૈશ્ચૈવ રઞ્જયિત્વાર્ચયેચ્છિવમ્ ।
નાનાસુખકરી હ્યેષા પૂજા સર્વફલપ્રદા ॥ ૫૮॥

ધાન્યમાનમિતિ પ્રોક્તં મયા તે મુનિસત્તમ ।
લક્ષમાનં તુ પુષ્પાણાં શ઼ૃણુ પ્રીત્યા મુનીશ્વર ॥ ૫૯॥

પ્રસ્થાનાં ચ તથા ચૈકં શઙ્ખપુષ્પસમુદ્ભવમ્ ।
પ્રોક્તં વ્યાસેન લક્ષં હિ સૂક્ષ્મમાનપ્રદર્શિના ॥ ૬૦॥

પ્રસ્થૈરેકાદશૈર્જાતિલક્ષમાનં પ્રકીર્તિતમ્ ।
યૂથિકાયાસ્તથા માનં રાજિકાયાસ્તદર્ધકમ્ ॥ ૬૧॥

પ્રસ્થૈર્વિંશતિકૈશ્ચૈવ મલ્લિકામાનમુત્તમમ્ ।
તિલપુષ્પૈસ્તથા માનં પ્રસ્થાન્ન્યૂનં તથૈવ ચ ॥ ૬૨॥

તતશ્ચ ત્રિગુણં માનં કરવીરભવે સ્મૃતમ્ ।
નિર્ગુણ્ડીકુસુમે માનં તથૈવ કથિતં બુધૈઃ ॥ ૬૩॥

કર્ણિકારે તથા માનં શિરીષકુસુમે પુનઃ ।
બન્ધુજીવે તથા માનં પ્રસ્થાનં દશકેન ચ ॥ ૬૪॥

ઇત્યાદ્યૈર્વિવિધૈર્માનં દૃષ્ટ્વા કુર્યાચ્છિવાર્ચનમ્ ।
સર્વકામસમૃદ્ધ્યર્થં મુક્ત્યર્થં કામનોજ્ઝિતઃ ॥ ૬૫॥

અતઃ પરં પ્રવક્ષ્યામિ ધારાપૂજાફલં મહત્ ।
યસ્ય શ્રવણમાત્રેણ કલ્યાણં જાયતે નૃણામ્ ॥ ૬૬॥

વિધાનપૂર્વકં પૂજાં કૃત્વા ભક્ત્યા શિવસ્ય વૈ ।
પશ્ચાચ્ચ જલધારા હિ કર્તવ્યા ભક્તિતત્પરૈઃ ॥ ૬૭॥

જ્વરપ્રલાપશાન્ત્યર્થં જલધારા શુભાવહા ।
શતરુદ્રિયમન્ત્રેણ રુદ્રસ્યૈકાદશેન તુ ॥ ૬૮॥

રુદ્રજાપ્યેન વા તત્ર સૂક્તેન પૌરુષેણ વા ।
ષડઙ્ગેનાથ વા તત્ર મહામૃત્યુઞ્જયેન ચ ॥ ૬૯॥

ગાયત્ર્યા વા નમોઽન્તૈશ્ચ નામભિઃ પ્રણવાદિભિઃ ।
મન્ત્રૈર્વાથાગમોક્તૈશ્ચ જલધારાદિકં તથા ॥ ૭૦॥

સુખસન્તાનવૃદ્ધ્યર્થં ધારાપૂજનમુત્તમમ્ ।
નાનાદ્રવ્યૈઃ શુભૈર્દિવ્યૈઃ પ્રીત્યા સદ્ભસ્મધારિણા ॥ ૭૧॥

ઘૃતધારા શિવે કાર્યા યાવન્મન્ત્રસહસ્રકમ્ ।
તદા વંશસ્ય વિસ્તારો જાયતે નાત્ર સંશયઃ ॥ ૭૨॥

એવમયુતમન્ત્રેણ કાર્યં વૈ શિવપૂજનમ્ ।
પ્રમેહરોગશાન્ત્યર્થં પ્રાપ્નુયાચ્ચ મનેપ્સિતમ્ ।
ષણ્ઢત્વં યદાદાતસ્તદા ઘૃતસુપૂજનમ્ ।
બ્રહ્મભોજ્યં તથા પ્રોક્તં પ્રાજાપત્યં મુનીશ્વરૈઃ ॥ ૭૩॥

કેવલં દુગ્ધધારા ચ તદા કાર્યા વિશેષતઃ ।
શર્કરામિશ્રિતા તત્ર યદા બુદ્ધિજડો ભવેત્ ॥ ૭૪॥

તસ્યા સઞ્જાયતે જીવસદૃશી બુદ્ધિરુત્તમા ।
યાવન્મન્ત્રાયુતં ન સ્યાત્તાવદ્ધારાપ્રપૂજનમ્ ॥ ૭૫॥

યદા ચોચ્ચાટનં દેહે જાયતે કારણં વિના ।
યત્ર કુત્રાપિ વા પ્રેમ દુઃખં ચ પરિવર્ધિતમ્ ॥ ૭૬॥

સ્વગૃહે કલહો નિત્યં યદા ચૈવ પ્રજાયતે ।
તદ્ધારાયાં કૃતાયાં વૈ સર્વં દુઃખં વિલીયતે ॥ ૭૭॥

શત્રૂણાં તાપનાર્થં વૈ તૈલધારા શિવોપરિ ।
કર્તવ્યા સુપ્રયત્નેન કાર્યસિદ્ધિર્ધ્રુવં ભવેત્ ॥ ૭૮॥

વાસિતેનૈવ તૈલેન ભોગવૃદ્ધિઃ પ્રજાયતે ।
સાર્ષપેણૈવ તૈલેન શત્રુનાશો ભવેદ્ ધ્રુવમ્ ॥ ૭૯॥

મધુના યક્ષરાજો વૈ ગચ્છેચ્ચ શિવપૂજનાત્ ।
ધારા ચેક્ષુરસસ્યાપિ સર્વાનન્દકરી શિવે ॥ ૮૦॥

ધારા ગઙ્ગાજલસ્યૈવ ભુક્તિમુક્તિફલપ્રદા ।
એતાઃ સર્વાશ્ચ યાઃ પ્રોક્તા મૃત્યઞ્જયસમુદ્ભવાઃ ॥ ૮૧॥

તત્રાયુતપ્રમાણં હિ કર્તવ્યં તદ્વિધાનતઃ ।
કર્તવ્યં બ્રાહ્મણાનાં ચ ભોજ્યં વૈ રુદ્રસઙ્ખ્યયા ॥ ૮૨॥

એતત્તે સર્વમાખ્યાતં યત્પૃષ્ટોઽહં મુનીશ્વર ।
એતદ્વૈ સફલં લોકે સર્વકામહિતાવહમ્ ॥ ૮૩॥

સ્કન્દોમાસહિતં શમ્ભું સમ્પૂજ્ય વિધિના સહ ।
યત્ફલં લભતે ભક્ત્યા તદ્વદામિ યથાશ્રુતમ્ ॥ ૮૪॥

અત્ર ભુક્ત્વાખિલં સૌખ્યં પુત્રપૌત્રાદિભિઃ શુભમ્ ।
તતો યાતિ મહેશસ્ય લોકં સર્વસુખાવહમ્ ॥ ૮૫॥

સૂર્યકોટિપ્રતીકાશૈર્વિમાનૈઃ સર્વકામગૈઃ ।
રુદ્રકન્યાસમાકીર્ણૈર્ગેયવાદ્યસમન્વિતૈઃ ॥ ૮૬॥

ક્રીડતે શિવભૂતશ્ચ યાવદાભૂતસમ્પ્લવમ્ ।
તતો મોક્ષમવાપ્નોતિ વિજ્ઞાનં પ્રાપ્ય ચાવ્યયમ્ ॥ ૮૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને શિવપૂજાવિધાનવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૨.૧.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૧૫. પઞ્ચદશોઽધ્યાયઃ । રુદ્રાવતારાવિર્ભાવવર્ણનમ્ ।

નારદ ઉવાચ ।
વિધે વિધે મહાભાગ ધન્યસ્ત્વં સુરસત્તમ ।
શ્રાવિતાદ્યાદ્ભુતા શૈવકથા પરમપાવની ॥ ૧॥

તત્રાદ્ભુતા મહાદિવ્યા લિઙ્ગોત્પત્તિઃ શ્રુતા શુભા ।
શ્રુત્વા યસ્યાઃ પ્રભાવં ચ દુઃખનાશો ભવેદિહ ॥ ૨॥

અનન્તરં ચ યજ્જાતં માહાત્મ્યં ચરિતં તથા ।
સૃષ્ટેશ્ચૈવ પ્રકારં ચ કથય ત્વં વિશેષતઃ ॥ ૩॥

બ્રહ્મોવાચ ।
સમ્યક્ પૃષ્ટં ચ ભવતા યજ્જાતં તદનન્તરમ્ ।
કથયિષ્યામિ સઙ્ક્ષેપાદ્યથા પૂર્વં શ્રુતં મયા ॥ ૪॥

અન્તર્હિતે તદા દેવે શિવરૂપે સનાતને ।
અહં વિષ્ણુશ્ચ વિપ્રેન્દ્ર અધિકં સુખમાપ્તવાન્ ॥ ૫॥

મયા ચ વિષ્ણુના રૂપં હંસવારાહયોસ્તદા ।
સંવૃતં તુ તતસ્તાભ્યાં લોકસર્ગાવનેચ્છયા ॥ ૬॥

નારદ ઉવાચ ।
વિધે બ્રહ્મન્ મહાપ્રાજ્ઞ સંશયો હૃદિ મે મહાન્ ।
કૃપાં કૃત્વાતુલાં શીઘ્રં તં નાશયિતુમર્હસિ ॥ ૭॥

હંસવારાહયો રૂપં યુવાભ્યાં ચ ધૃતં કથમ્ ।
અન્યદ્રૂપં વિહાયૈવ કિમત્ર વદ કારણમ્ ॥ ૮॥

સૂત ઉવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા નારદસ્ય મહાત્મનઃ ।
સ્મૃત્વા શિવપદામ્ભોજં બ્રહ્મા સાદરમબ્રવીત્ ॥ ૯॥

બ્રહ્મોવાચ ।
હંસસ્ય ચોર્ધ્વગમને ગતિર્ભવતિ નિશ્ચલા ।
તત્ત્વાતત્ત્વવિવેકોઽસ્તિ જલદુગ્ધવિભાગવત્ ॥ ૧૦॥

અજ્ઞાનજ્ઞાનયોસ્તત્ત્વં વિવેચયતિ હંસકઃ ।
હંસરૂપં ધૃતં તેન બ્રહ્મણા સૃષ્ટિકારિણા ॥ ૧૧॥

વિવેકો નૈવ લબ્ધશ્ચ યતો હંસો વ્યલીયત ।
શિવસ્વરૂપતત્ત્વસ્ય જ્યોતિરૂપસ્ય નારદ ॥ ૧૨॥

સૃષ્ટિપ્રવૃત્તિકામસ્ય કથં જ્ઞાનં પ્રજાયતે ।
યતો લબ્ધો વિવેકોઽપિ ન મયા હંસરૂપિણા ॥ ૧૩॥

ગમનેઽધો વરાહસ્ય ગતિર્ભવતિ નિશ્ચલા ।
ધૃતં વારાહરૂપં હિ વિષ્ણુના વનચારિણા ॥ ૧૪॥

અથવા ભવકલ્પાર્થં તદ્રૂપં હિ પ્રકલ્પિતમ્ ।
વિષ્ણુના ચ વરાહસ્ય ભુવનાવનકારિણા ॥ ૧૫॥

યદ્દિનં હિ સમારભ્ય તદ્રૂપં ધૃતવાન્હરિઃ ।
તદ્દિનં પ્રતિકલ્પોઽસૌ કલ્પો વારાહસંજ્ઞકઃ ॥ ૧૬॥

તદિચ્છા વા યદા જાતા તસ્ય રૂપસ્ય ધારણે ।
તદ્દિનં પ્રતિકલ્પોઽસૌ કલ્પો વારાહસંજ્ઞકઃ ॥ ૧૭॥

ઇતિ પ્રશ્નોત્તરં દત્તં પ્રસ્તુતં શ઼ૃણુ નારદ ।
સ્મૃત્વા શિવપદામ્ભોજં વક્ષ્યે સૃષ્ટિવિધિં મુને ॥ ૧૮॥

અન્તર્હિતે મહાદેવે ત્વહં લોકપિતામહઃ ।
તદીયં વચનં કર્તુમધ્યાયન્ધ્યાનતત્પરઃ ॥ ૧૯॥

નમસ્કૃત્ય તદા શમ્ભું જ્ઞાનં પ્રાપ્ય હરેસ્તદા ।
આનન્દં પરમં ગત્વા સૃષ્ટિં કર્તું મનો દધે ॥ ૨૦॥

વિષ્ણુશ્ચાપિ તદા તત્ર પ્રણિપત્ય સદાશિવમ્ ।
ઉપદિશ્ય ચ માં તાત હ્યન્તર્ધાનમુપાગતઃ ॥ ૨૧॥

બ્રહ્માણ્ડાચ્ચ બહિર્ગત્વા પ્રાપ્ય શમ્ભોરનુગ્રહમ્ ।
વૈકુણ્ઠનગરં ગત્વા તત્રોવાસ હરિઃ સદા ॥ ૨૨॥

અહં સ્મૃત્વા શિવં તત્ર વિષ્ણું વૈ સૃષ્ટિકામ્યયા ।
પૂર્વં સૃષ્ટં જલં યચ્ચ તત્રાઞ્જલિમુદાક્ષિપમ્ ॥ ૨૩॥

અતોઽણ્ડમભવત્તત્ર ચતુર્વિંશતિસંજ્ઞકમ્ ।
વિરાડ્રૂપમભૂદ્વિપ્ર જલરૂપમપશ્યતઃ ॥ ૨૪॥

તતઃ સંશયમાપન્નસ્તપસ્તેપે સુદારુણમ્ ।
દ્વાદશાબ્દમહં તત્ર વિષ્ણુધ્યાનપરાયણઃ ॥ ૨૫॥

તસ્મિંશ્ચ સમયે તાત પ્રાદુર્ભૂતો હરિઃ સ્વયમ્ ।
મામુવાચ મહાપ્રીત્યા મદઙ્ગં સંસ્પૃશન્મુદા ॥ ૨૬॥

વિષ્ણુરુવાચ ।
વરં બ્રૂહિ પ્રસન્નોઽસ્મિ નાદેયો વિદ્યતે તવ ।
બ્રહ્મન્ શમ્ભુપ્રસાદેન સર્વં દાતું સમર્થકઃ ॥ ૨૭॥

બ્રહ્મોવાચ ।
યુક્તમેતન્મહાભાગ દત્તોઽહં શમ્ભુના ચ તે ।
તદુક્તં યાચતે મેઽદ્ય દેહિ વિષ્ણો નમોઽસ્તુ તે ॥ ૨૮॥

વિરાડ્રૂપમિદં હ્યણ્ડં ચતુર્વિંશતિસંજ્ઞકમ્ ।
ન ચૈતન્યં ભવત્યાદૌ જડીભૂતં પ્રદૃશ્યતે ॥ ૨૯॥

પ્રાદુર્ભૂતો ભવાનદ્ય શિવાનુગ્રહતો હરે ।
પ્રાપ્તં શઙ્કરસમ્ભૂત્યા હ્યણ્ડં ચૈતન્યમાવહ ॥ ૩૦॥

ઇત્યુક્તે ચ મહાવિષ્ણુઃ શમ્ભોરાજ્ઞાપરાયણઃ ।
અનન્તરૂપમાસ્થાય પ્રવિવેશ તદણ્ડકમ્ ॥ ૩૧॥

સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં સર્વતઃ સ્પૃત્ત્વા તદણ્ડં વ્યાપ્તવાનિતિ ॥ ૩૨॥

પ્રવિષ્ટે વિષ્ણુના તસ્મિન્નણ્ડે સમ્યક્સ્તુતેન મે ।
સચેતનમભૂદણ્ડં ચતુર્વિંશતિસંજ્ઞકમ્ ॥ ૩૩॥

પાતાલાદિસમારભ્ય સત્યલોકાધિપઃ સ્વયમ્ ।
રાજતે સ્મ હરિસ્તત્ર વૈરાજઃ પુરુષઃ પ્રભુઃ ॥ ૩૪॥

કૈલાસનગરં રમ્યં સર્વોપરિવિરાજિતમ્ ।
નિવાસાર્થં નિજસ્યૈવ પઞ્ચવક્ત્રશ્ચકાર હ ॥ ૩૫॥

બ્રહ્માણ્ડસ્ય તથા નાશે વૈકુણ્ઠસ્ય ચ તસ્ય ચ ।
કદાચિદેવ દેવર્ષે નાશો નાસ્તિ તયોરિહ ॥ ૩૬॥

સત્યં પદમુપાશ્રિત્ય સ્થિતોઽહં મુનિસત્તમ ।
સૃષ્ટિકામોઽભવં તાત મહાદેવાજ્ઞયા હ્યહમ્ ॥ ૩૭॥

સિસૃક્ષોરથ મે પ્રાદુરભવત્પાપસર્ગકઃ ।
અવિદ્યાપઞ્ચકસ્તાત બુદ્ધિપૂર્વસ્તમોપમઃ । ૩૮॥

તતઃ પ્રસન્નચિત્તોઽહમસૃજં સ્થાવરાભિધમ્ ।
મુખ્યસર્ગં ચ નિઃસઙ્ગમધ્યાયં શમ્ભુશાસનાત્ ॥ ૩૯॥

તં દૃષ્ટ્વા મે સિસૃક્ષોશ્ચ જ્ઞાત્વા સાધકમાત્મનઃ ।
સર્ગોઽવર્તત દુઃખાઢ્યસ્તિર્યક્સ્રોતા ન સાધકઃ ॥ ૪૦॥

તં ચાસાધકમાજ્ઞાય પુનશ્ચિન્તયતશ્ચ મે ।
અભવત્સાત્ત્વિકઃ સર્ગ ઊર્ધ્વસ્રોતા ઇતિ દ્રુતમ્ ॥ ૪૧॥

દેવસર્ગઃ પ્રતિખ્યાતઃ સત્યોઽતીવ સુખાવહઃ ।
તમપ્યસાધકં મત્વાઽચિન્તયં પ્રભુમાત્મનઃ ॥ ૪૨॥

પ્રાદુરાસીત્તતઃ સર્ગો રાજસઃ શઙ્કરાજ્ઞયા ।
અર્વાક્સ્રોતા ઇતિ ખ્યાતો માનુષઃ પરસાધકઃ ॥ ૪૩॥

મહાદેવાજ્ઞયા સર્ગસ્તતો ભૂતાદિકોઽભવત્ ।
ઇતિ પઞ્ચવિધા સૃષ્ટિઃ પ્રવૃત્તા વૈ કૃતા મયા ॥ ૪૪॥

ત્રયઃ સર્ગાઃ પ્રકૃત્યાશ્ચ બ્રહ્મણઃ પરિકીર્તિતાઃ ।
તત્રાદ્યો મહતઃ સર્ગો દ્વિતીયઃ સૂક્ષ્મભૌતિકઃ ॥ ૪૫॥

વૈકારિકસ્તૃતીયશ્ચ ઇત્યેતે પ્રાકૃતાસ્ત્રયઃ ।
એવં ચાષ્ટવિધાઃ સર્ગાઃ પ્રાકૃતૈર્વૈકૃતૈઃ સહ ॥ ૪૬॥

કૌમારો નવમઃ પ્રોક્તઃ પ્રાકૃતો વૈકૃતશ્ચ સઃ ।
એષામવાન્તરો ભેદો મયા વક્તું ન શક્યતે ॥ ૪૭॥

અલ્પત્વાદુપયોગસ્ય વચ્મિ સર્ગં દ્વિજાત્મકમ્ ।
કૌમારઃ સનકાદીનાં યત્ર સર્ગો મહાનભૂત્ ॥ ૪૮॥

સનકાદ્યાઃ સુતા મે હિ માનસા બ્રહ્મસમ્મિતાઃ ।
મહાવૈરાગ્યસમ્પન્ના અભવન્પઞ્ચ સુવ્રતાઃ ॥ ૪૯॥

મયાજ્ઞપ્તા અપિ ચ તે સંસારવિમુખા બુધાઃ ।
શિવધ્યાનૈકમનસો ન સૃષ્ટૌ ચક્રિરે મતિમ્ ॥ ૫૦॥

પ્રત્યુત્તરં ચ તૈર્દત્તં શ્રુત્વાહં મુનિસત્તમ ।
અકાર્ષં ક્રોધમત્યુગ્રં મોહમાપ્તશ્ચ નારદ ॥ ૫૧॥

ક્રુદ્ધસ્ય મોહિતસ્યાથ વિહ્વલસ્ય મુને મમ ।
ક્રોધેન ખલુ નેત્રાભ્યાં પ્રાપતન્નશ્રુબિન્દવઃ .. .. ૫૨॥

તસ્મિન્નવસરે તત્ર સ્મૃતેન મનસા મયા ।
પ્રબોધિતોઽહં ત્વરિતમાગતેન હિ વિષ્ણુના ॥ ૫૩॥

તપઃ કુરુ શિવસ્યેતિ હરિણા શિક્ષિતોઽપ્યહમ્ ।
તપોઽકારી મહદ્ ઘોરં પરમં મુનિસત્તમ ॥ ૫૪॥

તપસ્યતશ્ચ સૃષ્ટ્યર્થં ભ્રુવોર્ઘ્રાણસ્ય મધ્યતઃ ।
અવિમુક્તાભિધાદ્દેશાત્સ્વકીયાન્મે વિશેષતઃ ॥ ૫૫॥

ત્રિમૂર્તીનાં મહેશસ્ય પ્રાદુરાસીદ્ ઘૃણાનિધિઃ ।
અર્દ્ધનારીશ્વરો ભૂત્વા પૂર્ણાંશઃ સકલેશ્વરઃ ॥ ૫૬॥

તમજં શઙ્કરં સાક્ષાત્તેજોરાશિમુમાપતિમ્ ।
સર્વજ્ઞં સર્વકર્તારં નીલલોહિતસંજ્ઞકમ્ ॥ ૫૭॥

દૃષ્ટ્વા નત્વા મહાભક્ત્યા સ્તુત્વાહં તુ પ્રહર્ષિતઃ ।
અવોચં દેવદેવેશં સૃજ ત્વં વિવિધાઃ પ્રજાઃ ॥ ૫૮॥

શ્રુત્વા મમ વચઃ સોઽથ દેવદેવો મહેશ્વરઃ ।
સસર્જ સ્વાત્મનસ્તુલ્યાન્ રુદ્રો રુદ્રગણાન્બહૂન ॥ ૫૯॥

અવોચં પુનરેવેશં મહારુદ્રં મહેશ્વરમ્ ।
જન્મમૃત્યુભયાવિષ્ટાઃ સૃજ દેવ પ્રજા ઇતિ ॥ ૬૦॥

એવં શ્રુત્વા મહાદેવો મદ્વચઃ કરુણાનિધિઃ ।
પ્રહસ્યોવાચ માં સદ્યઃ પ્રહસ્ય મુનિસત્તમ ॥ ૬૧॥

મહાદેવ ઉવાચ ।

જન્મમૃત્યુભયાવિષ્ટા નાહં સ્રક્ષ્યે પ્રજા વિધે ।
અશોભનાઃ કર્મવશા નિમગ્ના દુઃખવારિધૌ ॥ ૬૨॥

અહં દુઃખોદધૌ મગ્ના ઉદ્ધરિષ્યામિ ચ પ્રજાઃ ।
સમ્યગ્ જ્ઞાનપ્રદાનેન ગુરુમૂર્તિપરિગ્રહઃ ॥ ૬૩॥

ત્વમેવ સૃજ દુઃખાઢ્યાઃ પ્રજાઃ સર્વાઃ પ્રજાપતે ।
મદાજ્ઞયા ન બદ્ધસ્ત્વં માયયા સમ્ભવિષ્યસિ ॥ ૬૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા માં સ ભગવાન્સુશ્રીમાન્નીલલોહિતઃ ।
સગણઃ પશ્યતો મે હિ દ્રુતમન્તર્દધે હરઃ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખાણ્ડે સૃષ્ટ્યુપક્રમે રુદ્રાવતારાવિર્ભાવવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૨.૧.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૧૬. ષોડશોઽધ્યાયઃ । બ્રહ્મનારદસંવાદે સૃષ્ટિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
શબ્દાદીનિ ચ ભૂતાનિ પઞ્ચીકૃત્વાહમાત્મના ।
તેભ્યઃ સ્થૂલં નભો વાયું વહ્નિં ચૈવ જલં મહીમ્ ॥ ૧॥

પર્વતાંશ્ચ સમુદ્રાંશ્ચ વૃક્ષાદીનપિ નારદ ।
કલાદિયુગપર્યન્તાન્કાલાનન્યાનવાસૃજમ્ ॥ ૨॥

સૃષ્ટ્યન્તાનપરાંશ્ચાપિ નાહં તુષ્ટોઽભવં મુને ।
તતો ધ્યાત્વા શિવં સામ્બં સાધકાનસૃજં મુને ॥ ૩॥

મરીચિં ચ સ્વનેત્રાભ્યાં હૃદયાદ્ ભૃગુમેવ ચ ।
શિરસોઽઙ્ગિરસં વ્યાનાત્પુલહં મુનિસત્તમમ્ ॥ ૪॥

ઉદાનાચ્ચ પુલસ્ત્યં હિ વસિષ્ઠં ચ સમાનતઃ ।
ક્રતું ત્વપાનાચ્છ્રોત્રાભ્યામત્રિં દક્ષં ચ પ્રાણતઃ ॥ ૫॥

અસૃજં ત્વાં તદોત્સઙ્ગાચ્છાયાયાઃ કર્દમં મુનિમ્ ।
સઙ્કલ્પાદસૃજં ધર્મં સર્વસાધનસાધનમ્ ॥ ૬॥

એવમેતાનહં સૃષ્ટ્વા કૃતાર્થઃ સાધકોત્તમાન્ ।
અભવં મુનિશાર્દૂલ મહાદેવપ્રસાદતઃ ॥ ૭॥

તતો મદાજ્ઞયા તાત ધર્મઃ સઙ્કલ્પસમ્ભવઃ ।
માનવં રૂપમાપન્નઃ સાધકૈસ્તુ પ્રવર્તિતઃ ॥ ૮॥

તતોઽસૃજં સ્વગાત્રેભ્યો વિવિધેભ્યોઽમિતાન્સુતાન્ ।
સુરાસુરાદિકાંસ્તેભ્યો દત્ત્વા તાં તાં તનું મુને ॥ ૯॥

તતોઽહં શઙ્કરેણાથ પ્રેરિતોઽન્તર્ગતેન હ ।
દ્વિધા કૃત્વાત્મનો દેહં દ્વિરૂપશ્ચાભવં મુને ॥ ૧૦॥

અર્ધેન નારી પુરુષશ્ચાર્ધેન સન્તતો મુને ।
સ તસ્યામસૃજદ્ દ્વન્દ્વં સર્વસાધનમુત્તમમ્ । ૧૧॥

સ્વાયમ્ભુવો મનુસ્તત્ર પુરુષઃ પરસાધનમ્ ।
શતરૂપાભિધા નારી યોગિની સા તપસ્વિની ॥ ૧૨॥

સા પુનર્મનુના તેન ગૃહીતાતીવ શોભના ।
વિવાહવિધિના તાતાસૃજત્સર્ગં સમૈથુનમ્ ॥ ૧૩॥

તસ્યાં તેન સમુત્પન્નસ્તનયશ્ચ પ્રિયવ્રતઃ ।
તથૈવોત્તાનપાદશ્ચ તથા કન્યાત્રયં પુનઃ ॥ ૧૪॥

આકૂતિર્દેવહૂતિશ્ચ પ્રસૂતિરિતિ વિશ્રુતાઃ ।
આકૂતિં રુચયે પ્રાદાત્કર્દમાય તુ મધ્યમામ્ ॥ ૧૫॥

દદૌ પ્રસૂતિં દક્ષાયોત્તાનપાદાનુજાં સુતામ્ ।
તાસાં પ્રસૂતિપ્રસવૈઃ સર્વં વ્યાપ્તં ચરાચરમ્ ॥ ૧૬॥

આકૂત્યાં ચ રુચેશ્ચાભૂદ્ દ્વન્દ્વં યજ્ઞશ્ચ દક્ષિણા ।
યજ્ઞસ્ય જજ્ઞિરે પુત્રા દક્ષિણાયાં ચ દ્વાદશ ॥ ૧૭॥

દેવહૂત્યાં કર્દમાચ્ચ બહ્વ્યો જાતાઃ સુતા મુને ।
દક્ષાજ્જાતાશ્ચતસ્રશ્ચ તથા પુત્ર્યશ્ચ વિંશતિઃ ॥ ૧૮॥

ધર્માય દત્તા દક્ષેણ શ્રદ્ધાદ્યાસ્તુ ત્રયોદશ ।
શ ૃણુ તાસાં ચ નામાનિ ધર્મસ્ત્રીણાં મુનીશ્વર ॥ ૧૯॥

શ્રદ્ધા લક્ષ્મીર્ધૃતિસ્તુષ્ટિઃ પુષ્ટિર્મેધા તથા ક્રિયા ।
બુદ્ધિર્લજ્જા વસુઃ શાન્તિઃ સિદ્ધિઃ કીર્તિસ્ત્રયોદશ ॥ ૨૦॥

તાભ્યાં શિષ્ટા યવીયસ્ય એકાદશ સુલોચનાઃ ।
ખ્યાતિઃ સત્પથસમ્ભૂતિઃ સ્મૃતિઃ પ્રીતિઃ ક્ષમા તથા ॥ ૨૧॥

સન્નતિશ્ચાનુરૂપા ચ ઊર્જા સ્વાહા સ્વધા તથા ।
ભૃગુર્ભવો મરીચિશ્ચ તથા ચૈવાઙ્ગિરા મુનિઃ ॥ ૨૨॥

પુલસ્ત્યઃ પુલહશ્ચૈવ ક્રતુશ્ચર્ષિવરસ્તથા ।
અત્રિર્વસિષ્ઠો વહ્નિશ્ચ પિતરશ્ચ યથાક્રમમ્ ॥ ૨૩॥

ખ્યાતાસ્તા જગૃહુઃ કન્યા ભૃગ્વાદ્યાઃ સાધકા વરાઃ ।
તતઃસમ્પૂરિતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ॥ ૨૪॥

એવં કર્માનુરૂપેણ પ્રાણિનામમ્બિકાપતેઃ ।
આજ્ઞયા બહવો જાતા અસઙ્ખ્યાતા દ્વિજર્ષભાઃ ॥ ૨૫॥

કલ્પભેદેન દક્ષસ્ય ષષ્ટિઃ કન્યાઃ પ્રકીર્તિતાઃ ।
તાસાં દશ ચ ધર્માય શશિને સપ્તવિંશતિમ્ ॥ ૨૬॥

વિધિના દત્તવાન્દક્ષઃ કશ્યપાય ત્રયોદશ ।
ચતસ્રઃ પરરૂપાય દદૌ તાર્ક્ષ્યાય નારદ ॥ ૨૭॥

ભૃગ્વઙ્ગિરઃ કૃશાશ્વેભ્યો દ્વે દ્વે કન્યે ચ દત્તવાન્ ।
તાભ્યસ્તેભ્યસ્તુ સઞ્જાતા બહ્વી સૃષ્ટિશ્ચરાચરા ॥ ૨૮॥

ત્રયોદશમિતાસ્તસ્મૈ કશ્યપાય મહાત્મને ।
દત્તા દક્ષેણ યાઃ કન્યા વિધિવન્મુનિસત્તમ ॥ ૨૯॥

તાસાં પ્રસૂતિભિર્વ્યાપ્તં ત્રૈલોક્યં સચરાચરમ્ ।
સ્થાવરં જઙ્ગમં ચૈવ શૂન્યં નૈવ તુ કિઞ્ચન ॥ ૩૦॥

દેવાશ્ચ ઋષયશ્ચૈવ દૈત્યાશ્ચૈવ પ્રજજ્ઞિરે ।
વૃક્ષાશ્ચ પક્ષિણશ્ચૈવ સર્વે પર્વતવીરુધઃ ॥ ૩૧॥

દક્ષકન્યાપ્રસૂતૈશ્ચ વ્યાપ્તમેવં ચરાચરમ્ ।
પાતાલતલમારભ્ય સત્યલોકાવધિ ધ્રુવમ્ ॥ ૩૨॥

બ્રહ્માણ્ડં સકલં વ્યાપ્તં શૂન્યં નૈવ કદાચન ।

એવં સૃષ્ટિઃ કૃતા સમ્યગ્બ્રહ્મણા શમ્ભુશાસનાત્ ॥ ૩૩॥

સતી નામ ત્રિશૂલાગ્રે સદા રુદ્રેણ રક્ષિતા ।
તપોઽર્થં નિર્મિતા પૂર્વં શમ્ભુના સર્વવિષ્ણુના ॥ ૩૪॥

સૈવ દક્ષાત્સમુદ્ભૂતા લોકકાર્યાર્થમેવ ચ ।
લીલાં ચકાર બહુશો ભક્તોદ્ધરણહેતવે ॥ ૩૫॥

વામાઙ્ગો યસ્ય વૈકુણ્ઠો દક્ષિણાઙ્ગોઽહમેવ ચ ।
રુદ્રો હૃદયજો યસ્ય ત્રિવિધસ્તુ શિવઃ સ્મૃતઃ ॥ ૩૬॥

અહં વિષ્ણુશ્ચ રુદ્રશ્ચ ગુણાસ્ત્રય ઉદાહૃતાઃ ।
સ્વયં સદા નિર્ગુણશ્ચ પરબ્રહ્માવ્યયઃ શિવઃ ॥ ૩૭॥

વિષ્ણુઃ સત્ત્વં રજોઽહં ચ તમો રુદ્ર ઉદાહૃતઃ ।
લોકાચારત ઇત્યેવં નામતો વસ્તુતોઽન્યથા ॥ ૩૮॥

અન્તસ્તમો બહિઃ સત્ત્વો વિષ્ણૂ રુદ્રસ્તથા મતઃ ।
અન્તઃ સત્ત્વસ્તમો બાહ્યો રજોઽહં સર્વથા મુને ॥ ૩૯॥

રાજસી ચ સુરા દેવી સત્ત્વરૂપા તુ સા સતી ।
લક્ષ્મીસ્તમોમયી જ્ઞેયા ત્રિરૂપા ચ શિવા પરા ॥ ૪૦॥

એવં શિવા સતી ભૂત્વા શઙ્કરેણ વિવાહિતા ।
પિતુર્યજ્ઞે તનું ત્યક્ત્વા નાદરાત્ સ્વપદં યયૌ ॥ ૪૧॥

પુનશ્ચ પાર્વતી જાતા દેવપ્રાર્થનયા શિવા ।
તપઃ કૃત્વા સુવિપુલં પુનઃ શિવમુપાગતા ॥ ૪૨॥

તસ્ય નામાન્યનેકાનિ જાતાનિ ચ મુનીશ્વર ।
કાલિકા ચણ્ડિકા ભદ્રા ચામુણ્ડા વિજયા જયા ॥ ૪૩॥

જયન્તી ભદ્રકાલી ચ દુર્ગા ભગવતીતિ ચ ।
કામાખ્યા કામદા હ્યમ્બા મૃડાની સર્વમઙ્ગલા ॥ ૪૪॥

નામધેયાન્યનેકાનિ ભુક્તિમુક્તિપ્રદાનિ ચ ।
ગુણકર્માનુરૂપાણિ પ્રાયશસ્તત્ર પાર્વતી ॥ ૪૫॥

ગુણમય્યસ્તથા દેવ્યો દેવા ગુણમયાસ્ત્રયઃ ।
મિલિત્વા વિવિધં સૃષ્ટેશ્ચક્રુસ્તે કાર્યમુત્તમમ્ ॥ ૪૬॥

એવં સૃષ્ટિપ્રકારસ્તે વર્ણિતો મુનિસત્તમ ।
શિવાજ્ઞયા વિરચિતો બ્રહ્માણ્ડસ્ય મયાખિલઃ ॥ ૪૭॥

પરં બ્રહ્મ શિવઃ પ્રોક્તસ્તસ્ય રૂપાસ્ત્રયઃ સુરાઃ ।
અહં વિષ્ણુશ્ચ રુદ્રશ્ચ ગુણભેદાનુરૂપતઃ ॥ ૪૮॥

શિવયા રમતે સ્વૈરં શિવલોકે મનોરમે ।
સ્વતન્ત્રઃ પરમાત્મા હિ નિર્ગુણઃ સગુણોઽપિ વૈ ॥ ૪૯॥

તસ્ય પૂર્ણાવતારો હિ રુદ્રઃ સાક્ષાચ્છિવઃ સ્મૃતઃ ।
કૈલાસે ભવનં રમ્યં પઞ્ચવક્ત્રશ્ચકાર હ ।
બ્રહ્માણ્ડસ્ય તથા નાશે તસ્ય નાશોઽસ્તિ વૈ ન હિ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપક્રમે બ્રહ્મનારદસંવાદે સૃષ્ટિવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૨.૧.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૧૭. સપ્તદશોઽધ્યાયઃ । ગુણનિધિચરિત્રવર્ણનમ્ ।

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય બ્રહ્મણઃ સ તુ નારદઃ ।
પુનઃ પપ્રચ્છ તં નત્વા વિનયેન મુનીશ્વરાઃ ॥ ૧॥

નારદ ઉવાચ ।
કદા ગતો હિ કૈલાસં શઙ્કરો ભક્તવત્સલઃ ।
ક્વ વા સખિત્વં તસ્યાસીત્ કુબેરેણ મહાત્મના ॥ ૨॥

કિં ચકાર હરસ્તત્ર પરિપૂર્ણઃ શિવાકૃતિઃ ।
એતત્સર્વં સમાચક્ષ્વ પરં કૌતૂહલં મમ ॥ ૩॥

બ્રહ્મોવાચ ।
શ઼ૃણુ નારદ વક્ષ્યામિ ચરિતં શશિમૌલિનઃ ।
યથા જગામ કૈલાસં સખિત્વં ધનદસ્ય ચ ॥ ૪॥

અસીત્ કામ્પિલ્યનગરે સોમયાજિકુલોદ્ભવઃ ।
દીક્ષિતો યજ્ઞદત્તાખ્યો યજ્ઞવિદ્યાવિશારદઃ ॥ ૫॥

વેદવેદાઙ્ગવિત્પ્રાજ્ઞો વેદાન્તાદિષુ દક્ષિણઃ ।
રાજમાન્યોઽથ બહુધા વદાન્યઃ કીર્તિભાજનઃ ॥ ૬॥

અગ્નિશુશ્રૂષણરતો વેદાધ્યયનતત્પરઃ ।
સુન્દરો રમણીયાઙ્ગશ્ચન્દ્રબિમ્બસમાકૃતિઃ ॥ ૭॥

આસીદ્ ગુણનિધિર્નામ દીક્ષિતસ્યાસ્ય વૈ સુતઃ ।
કૃતોપનયનઃ સોઽષ્ટૌ વિદ્યાં જગ્રાહ ભૂરિશઃ ॥

અથ પિત્રાનભિજ્ઞાતો દ્યૂતકર્મરતોઽભવત્ । ૮॥

આદાયાદાય બહુશો ધનં માતુઃ સકાશતઃ ।
સમદાદ્ દ્યૂતકારેભ્યો મૈત્રીં તૈશ્ચ ચકાર સઃ ॥ ૯॥

સન્ત્યક્તબ્રાહ્મણાચારઃ સન્ધ્યાસ્નાનપરાઙ્મુખઃ ।
નિન્દકો વેદશાસ્ત્રાણાં દેવબ્રાહ્મણનિન્દકઃ ॥ ૧૦॥

સ્મૃત્યાચારવિહીનસ્તુ ગીતવાદ્યવિનોદભાક્ ।
નટપાખણ્ડભાણ્ડૈસ્તુ બદ્ધપ્રેમપરમ્પરઃ ॥ ૧૧॥

પ્રેરિતોઽપિ જનન્યા સ ન યયૌ પિતુરન્તિકમ્ ।
ગૃહકાર્યાન્તરવ્યાપ્તો દીક્ષિતો દીક્ષિતાયિનીમ્ ॥ ૧૨॥

યદા યદૈવ તાં પૃચ્છેદયે ગુણનિધિઃ સુતઃ ।
ન દૃશ્યતે મયા ગેહે કલ્યાણિ વિદધાતિ કિમ્ ॥ ૧૩॥

તદા તદેતિ સા બ્રૂયાદિદાનીં સ બહિર્ગતઃ ।
સ્નાત્વા સમર્ચ્ય વૈ દેવાનેતાવન્તમનેહસમ્ ॥ ૧૪॥

અધીત્યાધ્યયનાર્થં સ દ્વિત્રૈર્મિત્રૈઃ સમં યયૌ ।
એકપુત્રેતિ તન્માતા પ્રતારયતિ દીક્ષિતમ્ ॥ ૧૫॥

ન તત્કર્મ ચ તદ્વૃત્તં કિઞ્ચિદ્વેત્તિ સ દીક્ષિતઃ ।
સર્વં કેશાન્તકર્માસ્ય ચક્રે વર્ષેઽથ ષોડશે ॥ ૧૬॥

અથો સ દીક્ષિતો યજ્ઞદત્તઃ પુત્રસ્ય તસ્ય ચ ।
ગૃહ્યોક્તેન વિધાનેન પાણિગ્રાહમકારયમ્ ॥ ૧૭॥

પ્રત્યહં તસ્ય જનની સુતં ગુણનિધિં મૃદુ ।
શાસ્તિ સ્નેહાર્દ્રહૃદયા હ્યુપવેશ્ય સ્મ નારદ ॥ ૧૮॥

ક્રોધનસ્તેઽસ્તિ તનય સ મહાત્મા પિતેત્યલમ્ ।
યદિ જ્ઞાસ્યતિ તે વૃત્તં ત્વાં ચ માં તાડયિષ્યતિ ॥ ૧૯॥

આચ્છાદયામિ તે નિત્યં પિતુરગ્રે કુચેષ્ટિતમ્ ।
લોકમાન્યોઽસ્તિ તે તાતઃ સદાચારૈર્ન વૈ ધનૈઃ ॥ ૨૦॥

બ્રાહ્મણાનાં ધનં તાત સદ્વિદ્યા સાધુસઙ્ગમઃ ।
કિમર્થં ન કરોષિ ત્વં સ્વરુચિં પ્રીતમાનસઃ ॥ ૨૧॥

સચ્છ્રોત્રિયાસ્તેઽનૂચાના દીક્ષિતાઃસોમયાજિનઃ ।
ઇતિ રૂઢિમિહ પ્રાપ્તાસ્તવ પૂર્વપિતામહાઃ ॥ ૨૨॥

ત્યક્ત્વા દુર્વૃત્તસંસર્ગં સાધુસઙ્ગરતો ભવ ।
સદ્વિદ્યાસુ મનો ધેહિ બ્રાહ્મણાચારમાચર ॥ ૨૩॥

તાતાનુરૂપો રૂપેણ યશસા કુલશીલતઃ ।
તતો ન ત્રપસે કિં નઃ ત્યજ દુર્વૃત્તતાં સ્વકામ્ ॥ ૨૪॥

ઊનવિંશતિકોઽસિ ત્વમેષા ષોડશવાર્ષિકી ।
એતાં સંવૃણુ સદ્વૃત્તાં પિતૃભક્તિયુતો ભવ ॥ ૨૫॥

શ્વશુરોઽપિ હિ તે માન્યઃ સર્વત્ર ગુણશીલતઃ ।
તતો ન ત્રપસે કિં નઃ ત્યજ દુર્વૃત્તતાં સુત ॥ ૨૬॥

માતુલાસ્તેઽતુલાઃ પુત્ર વિદ્યાશીલકુલાદિભિઃ ।
તેભ્યોઽપિ ન બિભેષિ ત્વં શુદ્ધોઽસ્યુભયવંશતઃ ॥ ૨૭॥

પશ્યૈતાન્પ્રતિવેશ્મસ્થાન્બ્રાહ્મણાનાં કુમારકાન્ ।
ગૃહેઽપિ શિષ્યાન્પશ્યૈતાન્પિતુસ્તે વિનયોચિતાન્ ॥ ૨૮॥

રાજાપિ શ્રોષ્યતિ યદા તવ દુશ્ચેષ્ટિતં સુત ।
શ્રદ્ધાં વિહાય તે તાતે વૃત્તિલોપં કરિષ્યતિ ॥ ૨૯॥

બાલચેષ્ટિતમેવૈતદ્ વદન્ત્યદ્યાપિ તે જનાઃ ।
અનન્તરં હરિષ્યન્તિ યુક્તાં દીક્ષિતતામિહ ॥ ૩૦॥

સર્વેઽપ્યાક્ષારયિષ્યન્તિ તવ તાતં ચ મામપિ ।
માતુશ્ચરિત્રં તનયો ધત્તે દુર્ભાષણૈરિતિ ॥ ૩૧॥

પિતાપિ તે ન પાપીયાઞ્છ્રુતિસ્મૃતિપથાનુગઃ ।
તદઙ્ઘ્રિલીનમનસો મમ સાક્ષી મહેશ્વરઃ ॥ ૩૨॥

ન ચર્તુસ્નાતયાપીહ મુખં દુષ્ટસ્ય વીક્ષિતમ્ ।
અહો બલીયાન્સ વિધિર્યેન જાતો ભવાનિતિ ॥ ૩૩॥

પ્રતિક્ષણં જનન્યેતિ શિક્ષ્યમાણોઽતિદુર્મતિઃ ।
ન તત્યાજ ચ તદ્ધર્મં દુર્બોધો વ્યસની યતઃ ॥ ૩૪॥

મૃગયામદ્યપૈશુન્યાનૃતચૌર્યદુરોદરૈઃ ।
સ વારદારૈર્વ્યસનૈરેભિઃ કોઽત્ર ન ખણ્ડિતઃ ॥ ૩૫॥

યદ્યન્મધ્યગૃહે પશ્યેત્તત્તન્નીત્વા સુદુર્મતિઃ ।
અર્પયેદ્ દ્યૂતકારાણાં સકુપ્યં વસનાદિકમ્ ॥ ૩૬॥

ન્યસ્તાં રત્નમયીં ગેહે કરસ્ય પિતુરૂર્મિકામ્ ।
ચોરયિત્વૈકદાદાય દુરોદરકરેઽર્પયત્ ॥ ૩૭॥

દીક્ષિતેન પરિજ્ઞાતો દૈવાદ્ દ્યૂતકૃતઃ કરે ।
ઉવાચ દીક્ષિતસ્તં ચ કુતો લબ્ધા ત્વયોર્મિકા ॥ ૩૮॥

પૃષ્ટસ્તેનાથ નિર્બન્ધાદસકૃત્તમુવાચ સઃ ।
મામાક્ષિપસિ વિપ્રોચ્ચૈઃ કિં મયા ચૌર્યકર્મણા ॥ ૩૯॥

લબ્ધા મુદ્રા ત્વદીયેન પુત્રેણૈવ સમર્પિતા ।
મમ માતુર્હિ પૂર્વેદ્યુર્જિત્વા નીતો હિ શાટકઃ ॥ ૪૦॥

ન કેવલં મમૈવૈતદઙ્ગુલીયં સમર્પિતમ્ ।
અન્યેષાં દ્યૂતકર્તૄણાં ભૂરિ તેનાર્પિતં વસુ ॥ ૪૧॥

રત્નકુપ્યદુકૂલાનિ ભૃઙ્ગારપ્રભૃતીનિ ચ ।
ભાજનાનિ વિચિત્રાણિ કાંસ્યતામ્રમયાનિ ચ ॥ ૪૨॥

નગ્નીકૃત્ય પ્રતિદિનં બધ્યતે દ્યૂતકારિભિઃ ।
ન તેન સદૃશઃ કશ્ચિદાક્ષિકો ભૂમિમણ્ડલે ॥ ૪૩॥

અદ્યાવધિ ત્વયા વિપ્ર દુરોદરશિરોમણિઃ ।
કથં નાજ્ઞાયિ તનયોઽવિનયાનયકોવિદઃ ॥ ૪૪॥

ઇતિ શ્રુત્વા ત્રપાભારવિનમ્રતરકન્ધરઃ ।

પ્રાવૃત્ય વાસસા મૌલિં પ્રાવિશન્નિજમન્દિરમ્ ॥ ૪૫॥

મહાપતિવ્રતામસ્ય પત્નીં પ્રોવાચ તામથ ।
સ દીક્ષિતો યજ્ઞદત્તઃ શ્રૌતકર્મપરાયણઃ ॥ ૪૬॥

યજ્ઞદત્ત ઉવાચ ।
દીક્ષિતાયનિ કુત્રાસ્તિ ધૂર્તો ગુણનિધિઃ સુતઃ ।
અથ તિષ્ઠતુ કિં તેન ક્વ સા મમ શુભોર્મિકા .. .. ૪૭॥

અઙ્ગોદ્વર્તનકાલે યા ત્વયા મેઽઙ્ગુલિતો હૃતા ।
સા ત્વં રત્નમયીં શીઘ્રં તામાનીય પ્રયચ્છ મે ॥ ૪૮॥

ઇતિ શ્રુત્વાથ તદ્વાક્યં ભીતા સા દીક્ષિતાયની ।
પ્રોવાચ સ્નાનમધ્યાહ્નીં ક્રિયાં નિષ્પાદયન્ત્યથ ॥ ૪૯॥

વ્યગ્રાસ્મિ દેવપૂજાર્થમુપહારાદિકર્મણિ ।
સમયોઽયમતિક્રામેદતિથીનાં પ્રિયાતિથે ॥ ૫૦॥

ઇદાનીમેવ પક્વાન્નકરણવ્યગ્રયા મયા ।
સ્થાપિતા ભાજને ક્વાપિ વિસ્મૃતેતિ ન વેદ્મ્યહમ્ ॥ ૫૧॥

દીક્ષિત ઉવાચ ।
હં હેઽસત્પુત્રજનનિ નિત્યં સત્યપ્રભાષિણિ ।
યદા યદા ત્વાં સમ્પૃચ્છે તનયઃ ક્વ ગતસ્ત્વિતિ ॥ ૫૨॥

તદા તદેતિ ત્વં બ્રૂયાન્નાથેદાનીં સ નિર્ગતઃ ।
અધીત્યાધ્યયનાર્થં ચ દ્વિત્રૈર્મિત્રૈઃ સયુગ્બહિઃ ॥ ૫૩॥

કુતસ્તે શાટકઃ પત્નિ માઞ્જિષ્ઠો યો મયાર્પિતઃ ।
લમ્બતે યોઽનિશં ધામ્નિ તથ્યં બ્રૂહિ ભયં ત્યજ ॥ ૫૪॥

સામ્પ્રતં નેક્ષ્યતે સોઽપિ ભૃઙ્ગારો મણિમણ્ડિતઃ ।
પટ્ટસૂત્રમયી સાપિ ત્રિપટી યા મયાર્પિતા ॥ ૫૫॥

ક્વ દાક્ષિણાત્યં તત્કાંસ્યં ગૌડી તામ્રઘટી ક્વ સા ।
નાગદન્તમયી સા ક્વ સુખકૌતુકમઞ્ચિકા ॥ ૫૬॥

ક્વ સા પર્વતદેશીયા ચન્દ્રકાન્તિરિવાદ્ભુતા ।
દીપકવ્યગ્રહસ્તાગ્રાલઙ્કૃતા શાલભઞ્જિકા ॥ ૫૭॥

કિં બહૂક્તેન કુલજે તુભ્યં કુપ્યામ્યહં વૃથા ।

તદાભ્યવહરિષ્યેઽહમુપયંસ્યામ્યહં યદા ॥ ૫૮॥

અનપત્યોઽસ્મિ તેનાહં દુષ્ટેન કુલદૂષિણા ।
ઉત્તિષ્ઠાનય પાથસ્ત્વં તસ્મૈ દદ્યાં તિલાઞ્જલિમ્ ॥ ૫૯॥

અપુત્રત્વં વરં નૃણાં કુપુત્રાત્કુલપાંસનાત્ ।
ત્યજેદેકં કુલસ્યાર્થે નીતિરેષા સનાતની ॥ ૬૦॥

સ્નાત્વા નિત્યવિધિં કૃત્વા તસ્મિન્નેવાહ્નિ કસ્યચિત્ ।
શ્રોત્રિયસ્ય સુતાં પ્રાપ્ય પાણિં જગ્રાહ દીક્ષિતઃ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને ગુણનિધિચરિત્રવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૨.૧.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૧૮. અષ્ટાદશોઽધ્યાયઃ । કૈલાશગમનોપાખ્યાને ગુણનિધિસદ્ગતિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
શ્રુત્વા તથા સ વૃત્તાન્તં પ્રાક્તનં સ્વં વિનિન્દ્ય ચ ।
કાઞ્ચિદ્દિશં સમાલોક્ય નિર્યયૌ દીક્ષિતાઙ્ગજઃ ॥ ૧॥

કિયચ્ચિરં તતો ગત્વા યજ્ઞદત્તાત્મજઃ સ હિ ।
દુષ્ટો ગુણનિધિસ્તસ્થૌ ગતોત્સાહો વિસર્જિતઃ ॥ ૨॥

ચિન્તામવાપ મહતીં ક્વ યામિ કરવાણિ કિમ્ ।
નાહમભ્યસ્તવિદ્યોઽસ્મિ ન ચૈવાતિધનોઽસ્મ્યહમ્ ॥ ૩॥

દેશાન્તરે યસ્ય ધનં સ સદ્યઃ સુખમેધતે ।
ભયમસ્તિ ધને ચૌરાત્સ વિઘ્નઃ સર્વતો ભવઃ ॥ ૪॥

યાજકસ્ય કુલે જન્મ કથં મે વ્યસનં મહત્ ।
અહો બલીયાન્હિ વિધિર્ભાવિ કર્માનુસન્ધયેત્ ॥ ૫॥

ભિક્ષિતું નાધિગચ્છામિ ન મે પરિચિતઃ ક્વચિત્ ।
ન ચ પાર્શ્વે ધનં કિઞ્ચિત્કિમત્ર શરણં ભવેત્ ॥ ૬॥

સદાનભ્યુદિતે ભાનૌ પ્રસૂર્મે મિષ્ટભોજનમ્ ।
દદ્યાદદ્યાત્ર કં યાચે ન ચેહ જનની મમ ॥ ૭॥

બ્રહ્મોવાચ ।
ઇતિ ચિન્તયતસ્તસ્ય બહુશસ્તત્ર નારદ ।
અતિદીનં તરોર્મૂલે ભાનુરસ્તાચલં ગતઃ ॥ ૮॥

એતસ્મિન્નેવ સમયે કશ્ચિન્માહેશ્વરો નરઃ ।
સહોપહારાનાદાય નગરાદ્ બહિરભ્યગાત્ ॥ ૯॥

નાનાવિધાન્મહાદિવ્યાન્સ્વજનૈઃ પરિવારિતઃ ।
સમભ્યર્ચિતુમીશાનં શિવરાત્રાવુપોષિતઃ ॥ ૧૦॥

શિવાલયં પ્રવિશ્યાથ સ ભક્તઃ શિવસક્તધીઃ ।
યથોચિતં સુચિત્તેન પૂજયામાસ શઙ્કરમ્ ॥ ૧૧॥

પક્વાન્નગન્ધમાઘ્રાય યજ્ઞદત્તાત્મજો દ્વિજઃ ।
પિતૃત્યક્તો માતૃહીનઃ ક્ષુધિતઃ સ તમન્વગાત્ ॥ ૧૨॥

ઇદમન્નં મયા ગ્રાહ્યં શિવાયોપકૃતં નિશિ ।
સુપ્તે શૈવજને દૈવાત્સર્વસ્મિન્વિવિધં મહત્ ॥ ૧૩॥

ઇત્યાશામવલમ્બ્યાથ દ્વારિ શમ્ભોરુપાવિશત્ ।
દદર્શ ચ મહાપૂજાં તેન ભક્તેન નિર્મિતામ્ ॥ ૧૪॥

વિધાય નૃત્યગીતાદિ ભક્તાઃ સુપ્તાઃ ક્ષણે યદા ।
નૈવેદ્યં સ તદાદાતું ભર્ગાગારં વિવેશ હ ॥ ૧૫॥

દીપં મન્દપ્રભં દૃષ્ટ્વા પક્વાન્નવીક્ષણાય સઃ ।
નિજચૈલાઞ્ચલાદ્વર્તિં કૃત્વા દીપં પ્રકાશ્ય ચ ॥ ૧૬॥

યજ્ઞદત્તાત્મજઃ સોઽથ શિવનૈવેદ્યમાદરાત્ ।
જગ્રાહ સહસા પ્રીત્યા પક્વાન્નં બહુશસ્તતઃ ॥ ૧૭॥

તતઃ પક્વાન્નમાદાય ત્વરિતં ગચ્છતો બહિઃ ।
તસ્ય પાદતલાઘાતાત્પ્રસુપ્તઃ કોઽપ્યબુધ્યત ॥ ૧૮॥

કોઽયં કોઽયં ત્વરાપન્નો ગૃહ્યતાં ગૃહ્યતામસૌ ।
ઇતિ ચુક્રોશ સ જનો ગિરા ભયમહોચ્ચયા ॥ ૧૯॥

યાવદ્ભયાત્સમાગત્ય તાવત્સ પુરરક્ષકૈઃ ।

પલાયમાનો નિહતઃ ક્ષણાદન્ધત્વમાગતઃ ॥ ૨૦॥

અભક્ષયચ્ચ નૈવેદ્યં યજ્ઞદત્તાત્મજો મુને ।
શિવાનુગ્રહતો નૂનં ભાવિપુણ્યબલાન્ન સઃ ॥ ૨૧॥

મૃતો બદ્ધઃ સમાગત્ય પાશમુદ્ગરપાણિભિઃ ।
નિનીષુભિઃ સંયમનીં યામ્યૈઃ સ વિકટૈર્ભટૈઃ ॥ ૨૨॥

તાવત્પારિષદાઃ પ્રાપ્તાઃ કિઙ્કિણીજાલમાલિનઃ ।
દિવ્યં વિમાનમાદાય તં નેતું શૂલપાણયઃ ॥ ૨૩॥

શિવગણા ઊચુઃ ।
મુઞ્ચતૈનં દ્વિજં યામ્યા ગણાઃ પરમધાર્મિકમ્ ।
દણ્ડયોગ્યો ન વિપ્રોઽસૌ દગ્ધઃ સર્વાઘસઞ્ચયઃ ॥ ૨૪॥

ઇત્યાકર્ણ્યવચસ્તે હિ યમરાજગણાસ્તતઃ ।
મહાદેવગણાનાહુર્બભૂવુશ્ચકિતા ભૃશમ્ ॥ ૨૫॥

શમ્ભોર્ગણાનથાલોક્ય ભીતૈસ્તૈર્યમકિઙ્કરૈઃ ।
અવાદિ પ્રણતૈરિત્થં દુર્વૃત્તોઽયં ગણા દ્વિજઃ ॥ ૨૬॥

યમગણા ઊચુઃ ।
કુલાચારં પ્રતીર્ય્યૈષ પિત્રોર્વાક્યપરાઙ્મુખઃ ।
સત્યશૌચપરિભ્રષ્ટઃ સન્ધ્યાસ્નાનવિવર્જિતઃ ॥ ૨૭॥

આસ્તાં દૂરેઽસ્ય કર્માણિ શિવનિર્માલ્યલઙ્ઘકઃ ।
પ્રત્યક્ષતોઽત્ર વીક્ષધ્વમસ્પૃશ્યોઽયં ભવાદૃશામ્ ॥ ૨૮॥

શિવનિર્માલ્યભોક્તારઃ શિવનિર્માલ્યલઙ્ઘકાઃ ।
શિવનિર્માલ્યદાતારઃ સ્પર્શસ્તેષાં હ્યપુણ્યકૃત્ ॥ ૨૯॥

વિષમાલોક્ય વા પેયં શ્રેયો વા સ્પર્શનં પરમ્ ।
સેવિતવ્યં શિવસ્વં ન પ્રાણૈઃ કણ્ઠગતૈરપિ ॥ ૩૦॥

યૂયં પ્રમાણં ધર્મેષુ યથા ન ચ તથા વયમ્ ।
અસ્તિ ચેદ્ધર્મલેશોઽસ્ય ગણાસ્તં શ ૃણુમો વયમ્ ॥ ૩૧॥

ઇત્થં તદ્વાક્યમાકર્ણ્ય યામ્યાનાં શિવકિઙ્કરાઃ ।
સ્મૃત્વા શિવપદામ્ભોજં પ્રોચુઃ પારિષદાસ્તુ તાન્ ॥ ૩૨॥

શિવકિઙ્કરા ઊચુઃ ।

કિઙ્કરાઃ શિવધર્મા યે સૂક્ષ્માસ્તે તુ ભવાદૃશૈઃ ।
સ્થૂલલક્ષ્યૈઃ કથં લક્ષ્યા લક્ષ્યા યે સૂક્ષ્મદૃષ્ટિભિઃ ॥ ૩૩॥

અનેનાનેનસા કર્મ યત્કૃતં શ‍ૃણુતેહ તત્ ।
યજ્ઞદત્તાત્મજેનાથ સાવધાનતયા ગણાઃ ॥ ૩૪॥

પતન્તી લિઙ્ગશિરસિ દીપચ્છાયા નિવારિતા ।
સ્વચૈલાઞ્ચલતોઽનેન દત્ત્વા દીપદશાં નિશિ ॥ ૩૫॥

અપરોઽપિ પરો ધર્મો જાતસ્તત્રાસ્ય કિઙ્કરાઃ ।
શ‍ૃણ્વતઃ શિવનામાનિ પ્રસઙ્ગાદપિ ગૃહ્યતામ્ ॥ ૩૬॥

ભક્તેન વિધિના પૂજા ક્રિયમાણા નિરીક્ષિતા ।
ઉપોષિતેન ભૂતાયામનેન સ્થિરચેતસા ॥ ૩૭॥

શિવલોકમયં હ્યદ્ય ગન્તાસ્માભિઃ સહૈવ તુ ।
કઞ્ચિત્કાલં મહાભોગાન્કરિષ્યતિ શિવાનુગઃ ॥ ૩૮॥

કલિઙ્ગરાજો ભવિતા તતો નિર્ધૂતકલ્મષઃ ।
એષ દ્વિજવરો નૂનં શિવપ્રિયતરો યતઃ ॥ ૩૯॥

અન્યત્કિઞ્ચિન્ન વક્તવ્યં યૂયં યાત યથાગતમ્ ।
યમદૂતાઃ સ્વલોકં તુ સુપ્રસન્નેન ચેતસા ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં યમદૂતા મુનીશ્વર ।
યથાગતં યયુઃ સર્વે યમલોકં પરાઙ્મુખાઃ ॥ ૪૧॥

સર્વં નિવેદયામાસુઃ શમનાય ગણા મુને ।
તદ્વૃત્તમાદિતઃ પ્રોક્તં શમ્ભુદૂતૈશ્ચ ધર્મતઃ ॥ ૪૨॥

ધર્મરાજ ઉવાચ ।
સર્વે શ‍ૃણુત મદ્વાક્યં સાવધાનતયા ગણાઃ ।
તદેવ પ્રીત્યા કુરુત મચ્છાસનપુરઃસરમ્ ॥ ૪૩॥

યે ત્રિપુણ્ડ્રધરા લોકે વિભૂત્યા સિતયા ગણાઃ ।
તે સર્વે પરિહર્તવ્યા નાનેતવ્યાઃ કદાચન ॥ ૪૪॥

ઉદ્ધૂલનકરા યે હિ વિભૂત્યા સિતયા ગણાઃ ।
તે સર્વે પરિહર્તવ્યા નાનેતવ્યાઃ કદાચન ॥ ૪૫॥

શિવવેશતયા લોકે યેન કેનાપિ હેતુના ।
તે સર્વે પરિહર્તવ્યા નાનેતવ્યાઃ કદાચન ॥ ૪૬॥

યે રુદ્રાક્ષધરા લોકે જટાધારિણ એવ યે ।
તે સર્વે પરિહર્તવ્યા નાનેતવ્યાઃ કદાચન ॥ ૪૭॥

ઉપજીવનહેતોશ્ચ શિવવેશધરા હિ યે ।
તે સર્વે પરિહર્તવ્યા નાનેતવ્યાઃ કદાચન .. .. ૪૮॥

દમ્ભેનાપિ છલેનાપિ શિવવેશધરા હિ યે ।
તે સર્વે પરિહર્તવ્યા નાનેતવ્યાઃ કદાચન ॥ ૪૯॥

એવમાજ્ઞાપયામાસ સ યમો નિજકિઙ્કરાન્ ।
મત્વા તથેતિ તે સર્વે તૂષ્ણીમાસઞ્છુચિસ્મિતાઃ ॥ ૫૦॥

બ્રહ્મોવાચ ।
પાર્ષદૈર્યમદૂતેભ્યો મોચિતસ્ત્વિતિ સ દ્વિજઃ ।
શિવલોકં જગામાશુ તૈર્ગણૈઃ શુચિમાનસઃ ॥ ૫૧॥

તત્ર ભુક્ત્વાખિલાન્ભોગાન્સંસેવ્ય ચ શિવાશિવૌ ।
અરિન્દમસ્ય તનયઃ કલિઙ્ગાધિપતેરભૂત્ ॥ ૫૨॥

દમ ઇત્યભિધાનોઽભૂચ્છિવસેવાપરાયણઃ ।
બાલોઽપિ શિશુભિઃ સાકં શિવભક્તિં ચકાર સઃ ॥ ૫૩॥

ક્રમાદ્રાજ્યમવાપાથ પિતર્યુપરતે યુવા ।
પ્રીત્યા પ્રવર્તયામાસ શિવધર્માંશ્ચ સર્વશઃ ॥ ૫૪॥

નાન્યં ધર્મં સ જાનાતિ દુર્દમો ભૂપતિર્દમઃ ।
શિવાલયેષુ સર્વેષુ દીપદાનાદૃતે દ્વિજ ॥ ૫૫॥

ગ્રામાધીશાન્સમાહૂય સર્વાન્સ વિષયસ્થિતાન્ ।
ઇત્થમાજ્ઞાપયામાસ દીપા દેયાઃ શિવાલયે ॥ ૫૬॥

અન્યથા સત્યમેવેદં સ મે દણ્ડ્યો ભવિષ્યતિ ।
દીપદાનાચ્છિવસ્તુષ્ટો ભવતીતિ શ્રુતીરિતમ્ ॥ ૫૭॥

યસ્ય યસ્યાભિતો ગ્રામં યાવન્તશ્ચ શિવાલયાઃ ।
તત્ર તત્ર સદા દીપો દ્યોતનીયોઽવિચારિતમ્ ॥ ૫૮॥

મમાજ્ઞાભઙ્ગદોષેણ શિરશ્છેત્સ્યામ્યસંશયમ્ ।

ઇતિ તદ્ભયતો દીપા દીપ્તાઃ પ્રતિશિવાલયમ્ ॥ ૫૯॥

અનેનૈવ સ ધર્મેણ યાવજ્જીવં દમો નૃપઃ ।
ધર્મર્દ્ધિં મહતીં પ્રાપ્ય કાલધર્મવશં ગતઃ ॥ ૬૦॥

સ દીપવાસનાયોગાદ્ બહૂન્દીપાન્પ્રદીપ્ય વૈ ।
અલકાયાઃ પતિરભૂદ્રત્નદીપશિખાશ્રયઃ ॥ ૬૧॥

એવં ફલતિ કાલેન શિવેઽલ્પમપિ યત્કૃતમ્ ।
ઇતિ જ્ઞાત્વા શિવે કાર્યં ભજનં સુસુખાર્થિભિઃ ॥ ૬૨॥

ક્વ સ દીક્ષિતદાયાદઃ સર્વધર્મારતિઃ સદા ।
શિવાલયે દૈવયોગાદ્યાતશ્ચોરયિતું વસુ ॥

સ્વાર્થદીપદશોદ્યોતલિઙ્ગમૌલિતમોહરઃ । ૬૩॥

કલિઙ્ગવિષયે રાજ્યં પ્રાપ્તો ધર્મરતિં સદા ।
શિવાલયે સમુદ્દીપ્ય દીપાન્પ્રાગ્વાસનોદયાત્ ॥ ૬૪॥

ક્વૈષા દિક્પાલપદવી મુનીશ્વર વિલોકય ।
મનુષ્યધર્મિણાનેન સામ્પ્રતં યેહ ભુજ્યતે ॥ ૬૫॥

ઇતિ પ્રોક્તં ગુણનિધેર્યજ્ઞદત્તાત્મજસ્ય હિ ।
ચરિતં શિવસન્તોષં શ‍ૃણ્વતાં સર્વકામદમ્ ॥ ૬૬॥

સર્વદેવશિવેનાસૌ સખિત્વં ચ યથેયિવાન્ ।
તદપ્યેકમના ભૂત્વા શ‍ૃણુ તાત બ્રવીમિ તે ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને કૈલાસગમનોપાખ્યાને ગુણનિધિસદ્ગતિવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૨.૧.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૧૯. એકોનવિંશોઽધ્યાયઃ । કૈલાસગમનોપાખ્યાને કુબેરસ્ય શિવમિત્રત્વવર્ણનમ્ ।

બ્રહ્મોવાચ ।
પાદ્મે કલ્પે મમ પુરા બ્રહ્મણો માનસાત્સુતાત્ ।

પુલસ્ત્યાદ્વિશ્રવા જજ્ઞે તસ્ય વૈશ્રવણઃ સુતઃ ॥ ૧॥

તેનેયમલકા ભુક્તા પુરી વિશ્વકૃતા કૃતા ।
આરાધ્ય ત્ર્યમ્બકં દેવમત્યુગ્રતપસા પુરા ॥ ૨॥

વ્યતીતે તત્ર કલ્પે વૈ પ્રવૃત્તે મેઘવાહને ।
યાજ્ઞદત્તિરસૌ શ્રીમાન્ તપસ્તેપે સુદુઃસહમ્ ॥ ૩॥

ભક્તિપ્રભાવં વિજ્ઞાય શમ્ભોસ્તદ્દીપમાત્રતઃ ।
પુરા પુરારેઃ સમ્પ્રાપ્ય કાશિકાં ચિત્પ્રકાશિકામ્ ॥ ૪॥

શિવૈકાદશમુદ્બોધ્ય ચિત્તરત્નપ્રદીપકૈઃ ।
અનન્યભક્તિસ્નેહાઢ્યસ્તન્મયો ધ્યાનનિશ્ચલઃ ॥ ૫॥

શિવૈક્યં સુમહાપાત્રં તપોઽગ્નિપરિબૃંહિતમ્ ।
કામક્રોધમહાવિઘ્નપતઙ્ગાઘાતવર્જિતમ્ ॥ ૬॥

પ્રાણસંરોધનિર્વાતં નિર્મલં નિર્મલેક્ષણાત્ ।
સંસ્થાપ્ય શામ્ભવં લિઙ્ગં સદ્ભાવકુસુમાર્ચિતમ્ ॥ ૭॥

તાવત્તતાપ સ તપસ્ત્વગસ્થિપરિશેષિતમ્ ।
યાવદ્ બભૂવ તદ્વર્ષ્મ વર્ષાણામયુતં શતમ્ ॥ ૮॥

તતઃ સહ વિશાલાક્ષ્યા દેવો વિશ્વેશ્વરઃ સ્વયમ્ ।
અલકાપતિમાલોક્ય પ્રસન્નેનાન્તરાત્મના ॥ ૯॥

લિઙ્ગે મનઃસમાધાય સ્થિતં સ્થાણુસ્વરૂપિણમ્ ।
ઉવાચ વરદોઽસ્મીતિ તદાચક્ષ્વાલકાપતે ॥ ૧૦॥

ઉન્મીલ્ય નયને યાવત્સ પશ્યતિ તપોધનઃ ।
તાવદુદ્યત્સહસ્રાંશુસહસ્રાધિકતેજસમ્ ॥ ૧૧॥

પુરો દદર્શ શ્રીકણ્ઠં ચન્દ્રચૂડમુમાધવમ્ ।
તત્તેજઃ પરિભૂતાક્ષિતેજાઃ સમ્મીલ્ય લોચને ॥ ૧૨॥

ઉવાચ દેવદેવેશં મનોરથપદાતિગમ્ ।
નિજાઙ્ઘ્રિદર્શને નાથ દૃક્સામર્થ્યં પ્રયચ્છ મે ॥ ૧૩॥

અયમેવ વરો નાથ યત્ત્વં સાક્ષાન્નિરીક્ષ્યસે ।
કિમન્યેન વરેણેશ નમસ્તે શશિશેખર ॥ ૧૪॥

ઇતિ તદ્વચનં શ્રુત્વા દેવદેવ ઉમાપતિઃ ।
દદૌ દર્શનસામર્થ્યં સ્પૃષ્ટ્વા પાણિતલેન તમ્ ॥ ૧૫॥

પ્રસાર્ય નયને પૂર્વમુમામેવ વ્યલોકયત્ ।
તતોઽસૌ યાજ્ઞદત્તિસ્તુ તત્સામર્થ્યમવાપ્ય ચ ॥ ૧૬॥

શમ્ભોઃ સમીપે કા યોષિદેષા સર્વાઙ્ગસુન્દરી ।
અનયા કિં તપસ્તપ્તં મમાપિ તપસોઽધિકમ્ ॥ ૧૭॥

અહો રૂપમહો પ્રેમ સૌભાગ્યં શ્રીરહો ભૃશમ્ ।
ઇત્યવાદીદસૌ પુત્રો મુહુર્મુહુરતીવ હિ ॥ ૧૮॥

ક્રૂરદૃગ્વીક્ષતે યાવત્પુનઃ પુનરિદં વદન્ ।
તાવત્પુસ્ફોટ તન્નેત્રં વામં વામાવિલોકનાત્ ॥ ૧૯॥

અથ દેવ્યબ્રવીદ્દેવં કિમસૌ દુષ્ટતાપસઃ ।
અસકૃદ્વીક્ષ્ય માં વક્તિ વદ ત્વં મે તપઃપ્રભામ્ ॥ ૨૦॥

અસકૃદ્દક્ષિણેનાક્ષ્ણા પુનર્મામેવ પશ્યતિ ।
અસૂયમાનો મે રૂપપ્રેમસૌભાગ્યસમ્પદઃ ॥ ૨૧॥

ઇતિ દેવીગિરં શ્રુત્વા પ્રહસ્ય પ્રાહ તાં પ્રભુઃ ।
ઉમે ત્વદીયઃ પુત્રોઽયં ન ચ ક્રૂરેણ ચક્ષુષા ॥ ૨૨॥

સમ્પશ્યતિ તપોલક્ષ્મીં તવ કિં ત્વધિવર્ણયેત્ ।
ઇતિ દેવીં સમાભાષ્ય તમીશઃ પુનરબ્રવીત્ ॥ ૨૩॥

વરાન્દદામિ તે વત્સ તપસાનેન તોષિતઃ ।
નિધીનામથ નાથસ્ત્વં ગુહ્યકાનાં ભવેશ્વરઃ ॥ ૨૪॥

યક્ષાણાં કિન્નરાણાં ચ રાજ્ઞાં રાજા ચ સુવ્રત ।
પતિઃ પુણ્યજનાનાં ચ સર્વેષાં ધનદો ભવ ॥ ૨૫॥

મયા સખ્યં ચ તે નિત્યં વત્સ્યામિ ચ તવાન્તિકે ।
અલકાં નિકષા મિત્ર તવ પ્રીતિવિવૃદ્ધયે ॥ ૨૬॥

આગચ્છ પાદયોરસ્યાઃ પત તે જનની ત્વિયમ્ ।
યાજ્ઞદત્તે મહાભક્ત સુપ્રસન્નેન ચેતસા ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇતિ દત્ત્વા વરાન્દેવઃ પુનરાહ શિવાં શિવઃ ।

પ્રસાદં કુરુ દેવેશિ તપસ્વિન્યઙ્ગજેઽત્ર વૈ ॥ ૨૮॥

ઇત્યાકર્ણ્ય વચઃ શમ્ભોઃ પાર્વતી જગદમ્બિકા ।
અબ્રવીદ્ધાઙ્ગદત્તિં તં સુપ્રસન્નેન ચેતસા ॥ ૨૯॥

દેવ્યુવાચ ।
વત્સ તે નિર્મલા ભક્તિર્ભવે ભવતુ સર્વદા ।
ભવૈકપિઙ્ગો નેત્રેણ વામેન સ્ફુટિતેન હ ॥ ૩૦॥

દેવેન દત્તા યે તુભ્યં વરાઃ સન્તુ તથૈવ તે ।
કુબેરો ભવ નામ્ના ત્વં મમ રૂપેર્ષ્યયા સુત ॥ ૩૧॥

ઇતિ દત્ત્વા વરાન્દેવો દેવ્યા સહ મહેશ્વરઃ ।
ધનદાયાવિવેશાથ ધામ વૈશ્વેશ્વરાભિધમ્ ॥ ૩૨॥

ઇત્થં સખિત્વં શ્રીશમ્ભોઃ પ્રાપૈષ ધનદઃ પુરમ્ ।
અલકાન્નિકષા ચાસીત્કૈલાસઃ શઙ્કરાલયઃ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે કૈલાસગમનોપાખ્યાને કુબેરસ્ય શિવમિત્રત્વવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૨.૧.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડેઃ

## ૨.૧.૨૦. વિંશોઽધ્યાયઃ । કૈલાસોપાખ્યાને શિવસ્ય કૈલાસગમનમ્ ।

બ્રહ્મોવાચ ।
નારદ ત્વં શ ૃણુ મુને શિવાગમનમુત્તમમ્ ।
કૈલાસે પર્વતશ્રેષ્ઠે કુબેરસ્ય તપોબલાત્ ॥ ૧॥

નિધિપત્વવરં દત્ત્વા ગત્વા સ્વસ્થાનમુત્તમમ્ ।
વિચિન્ત્ય હૃદિ વિશ્વેશઃ કુબેરવરદાયકઃ ॥ ૨॥

વિધ્યઙ્ગજસ્સ્વરૂપો મે પૂર્ણઃ પ્રલયકાર્યકૃત્ ।
તદ્રૂપેણ ગમિષ્યામિ કૈલાસં ગુહ્યકાલયમ્ ॥ ૩॥

રુદ્રો હૃદયજો મે હિ પૂર્ણાંશો બ્રહ્મ નિષ્કલઃ ।

હરિબ્રહ્માદિભિઃ સેવ્યો મદભિન્નો નિરઞ્જનઃ ॥ ૪॥

તત્સ્વરૂપેણ તત્રૈવ સુહૃદ્ભૂત્વા વિલાસ્યહમ્ ।
કુબેરસ્ય ચ વત્સ્યામિ કરિષ્યામિ તપો મહત્ ॥ ૫॥

ઇતિ સઞ્ચિન્ત્ય રુદ્રોઽસૌ શિવેચ્છાં ગન્તુમુત્સુકઃ ।
નનાદ તત્ર ઢક્કાં સ્વાં સુગતિં નાદરૂપિણીમ્ ॥ ૬॥

ત્રૈલોક્યામાનશે તસ્યા ધ્વનિરુત્સાહકારકઃ ।
આહ્વાનગતિસંયુક્તો વિચિત્રઃ સાન્દ્રશબ્દકઃ ॥ ૭॥

તચ્છ્રુત્વા વિષ્ણુબ્રહ્માદ્યાઃ સુરાશ્ચ મુનયસ્તથા ।
આગમા નિગમા મૂર્તાઃ સિદ્ધા જગ્મુશ્ચ તત્ર વૈ ॥ ૮॥

સુરાસુરાદ્યાઃ સકલાસ્તત્ર જગ્મુશ્ચ સોત્સવાઃ ।
સર્વેઽપિ પ્રમથા જગ્મુર્યત્ર કુત્રાપિ સંસ્થિતાઃ ॥ ૯॥

ગણપાશ્ચ મહાભાગાઃ સર્વલોકનમસ્કૃતાઃ ।
તેષાં સઙ્ખ્યામહં વચ્મિ સાવધાનતયા શ઼ૃણુ ॥ ૧૦॥

અભ્યયાચ્છઙ્ખકર્ણશ્ચ ગણકોટ્યા ગણેશ્વરઃ ।
દશભિઃ કેકરાક્ષશ્ચ વિકૃતોઽષ્ટાભિરેવ ચ ॥ ૧૧॥

ચતુઃ ષષ્ટ્યા વિશાખશ્ચ નવભિઃ પારિયાત્રકઃ ।
ષડ્ભિઃ સર્વાન્તકઃ શ્રીમાન્દુન્દુભોઽષ્ટાભિરેવ ચ ॥ ૧૨॥

જાલઙ્કો હિ દ્વાદશભિઃ કોટિભિર્ગણપુઙ્ગવઃ ।
સપ્તભિઃ સમદઃ શ્રીમાઁસ્તથૈવ વિકૃતાનનઃ ॥ ૧૩॥

પઞ્ચભિશ્ચ કપાલી હિ ષડ્ભિઃ સન્દારકઃ શુભઃ ।
કોટિકોટિભિરેવેહ કણ્ડુકઃ કુણ્ડકસ્તથા ॥ ૧૪॥

વિષ્ટમ્ભોઽષ્ટાભિરગમદષ્ટભિશ્ચન્દ્રતાપનઃ । ૧૫॥

મહાકેશઃ સહસ્રેણ કોટીનાં ગણપો વૃતઃ । ૧૬॥

કુણ્ડી દ્વાદશભિર્વાહસ્તથા પર્વતકઃ શુભઃ ।
કાલશ્ચ કાલકશ્ચૈવ મહાકાલઃ શતેન વૈ ॥ ૧૭॥

અગ્નિકઃ શતકોટ્યા વૈ કોટ્યાભિમુખ એવ ચ ।
આદિત્યમૂર્ધા કોટ્યા ચ તથા ચૈવ ધનાવહઃ ॥ ૧૮॥

સન્નાહશ્ચ શતેનૈવ કુમુદઃ કોટિભિસ્તથા ।
અમોઘઃ કોકિલશ્ચૈવ કોટિકોટ્યા સુમન્ત્રકઃ ॥ ૧૯॥

કાકપાદોઽપરઃ ષષ્ટ્યા ષષ્ટ્યા સન્તાનકઃ પ્રભુઃ ।
મહાબલશ્ચ નવભિર્મધુપિઙ્ગશ્ચ પિઙ્ગલઃ ॥ ૨૦॥

નીલો નવત્યા દેવેશં પૂર્ણભદ્રસ્તથૈવ ચ ।
કોટીનાં ચૈવ સપ્તાનાં ચતુર્વક્ત્રો મહાબલઃ ॥ ૨૧॥

કોટિકોટિસહસ્રાણાં શતૈર્વિંશતિભિર્વૃતઃ ।
તત્રાજગામ સર્વેશઃ કૈલાસગમનાય વૈ ॥ । ૨૨॥

કાષ્ઠાગૂઢશ્ચતુઃષષ્ટ્યા સુકેશો વૃષભસ્તથા ।
કોટિભિઃ સપ્તભિશ્ચૈત્રો નકુલીશસ્સ્વયં પ્રભુઃ ॥ ૨૩॥

લોકાન્તકશ્ચ દીપ્તાત્મા તથા દૈત્યાન્તકઃ પ્રભુઃ ।
દેવો ભૃઙ્ગી રિટિઃ શ્રીમાન્દેવદેવપ્રિયસ્તથા ॥ ૨૪॥

અશનિર્ભાનુકશ્ચૈવ ચતુઃષષ્ટ્યા સનાતનઃ ।
નન્દીશ્વરો ગણાધીશઃ શતકોટ્યા મહાબલઃ ॥ ૨૫॥

એતે ચાન્યે ચ ગણપા અસઙ્ખ્યાતા મહાબલાઃ ।
સર્વે સહસ્રહસ્તાશ્ચ જટામુકુટધારિણઃ ॥ ૨૬॥

સર્વે ચન્દ્રાવતંસાશ્ચ નીલકણ્ઠાસ્ત્રિલોચનાઃ ।
હારકુણ્ડલકેયૂરમુકુટાદ્યૈરલઙ્કૃતાઃ ॥ ૨૭॥

બ્રહ્મેન્દ્રવિષ્ણુસઙ્કાશા અણિમાદિગણૈર્વૃતાઃ ।
સૂર્યકોટિપ્રતીકાશાસ્તત્રાજગ્મુર્ગણેશ્વરાઃ ॥ ૨૮॥

એતે ગણાધિપાશ્ચાન્યે મહાત્માનોઽમલપ્રભાઃ ।
જગ્મુસ્તત્ર મહાપ્રીત્યા શિવદર્શનલાલસાઃ ॥ ૨૯॥

ગત્વા તત્ર શિવં દૃષ્ટ્વા નત્વા ચક્રુઃ પરાં નુતિમ્ ।
સર્વે સાઞ્જલયો વિષ્ણુપ્રમુખા નતમસ્તકાઃ ॥ ૩૦॥

ઇતિ વિષ્ણ્વાદિભિઃ સાર્ધં મહેશઃ પરમેશ્વરઃ ।
કૈલાસમગમત્પ્રીત્યા કુબેરસ્ય મહાત્મનઃ ॥ ૩૧॥

કુબેરોઽપ્યાગતં શમ્ભું પૂજયામાસ સાદરમ્ ।
ભક્ત્યા નાનોપહારૈશ્ચ પરિવારસમન્વિતઃ ॥ ૩૨॥

તતો વિષ્ણ્વાદિકાન્દેવાન્ગણાંશ્ચાન્યાનપિ ધ્રુવમ્ ।
શિવાનુગાન્સમાનર્ચ શિવતોષણહેતવે ॥ ૩૩॥

અથ શમ્ભુઃ સમાલિઙ્ગ્ય કુબેરં પ્રીતમાનસઃ ।
મૂર્ધ્નિ ચાઘ્રાય સન્તસ્થાવલકાં નિકષાખિલૈઃ ॥ ૩૪॥

શશાસ વિશ્વકર્માણં નિર્માણાર્થં ગિરૌ પ્રભુઃ ।
નાનાભક્તનિવાસાય સ્વપરેષાં યથોચિતમ્ ॥ ૩૫॥

વિશ્વકર્મા તતો ગત્વા તત્ર નાનાવિધાં મુને ।
રચનાં રચયામાસ દ્રુતં શમ્ભોરનુજ્ઞયા ॥ ૩૬॥

અથ શમ્ભુઃ પ્રમુદિતો હરિપ્રાર્થનયા તદા ॥ ૩૭॥

કુબેરાનુગ્રહં કૃત્વા યયૌ કૈલાસપર્વતમ્ ।
સુમુહૂર્તે પ્રવિશ્યાસૌ સ્વસ્થાનં પરમેશ્વરઃ ॥ ૩૮॥

અકરોદખિલાન્પ્રીત્યા સનાથાન્ભક્તવત્સલઃ ।
અથ સર્વે પ્રમુદિતા વિષ્ણુપ્રભૃતયઃ સુરાઃ ।
મુનયશ્ચાપરે સિદ્ધા અભ્યષિઞ્ચન્મુદા શિવમ્ । ૩૯॥

સમાનર્ચુઃ ક્રમાત્સર્વે નાનોપાયનપાણયઃ ।
નીરાજનં સમાકાર્ષુર્મહોત્સવપુરઃસરમ્ ॥ ૪૦॥

તદાસીત્સુમનોવૃષ્ટિર્મઙ્ગલાયતના મુને ।
સુપ્રીતા નનૃતુસ્તત્રાપ્સરસો ગાનતત્પરાઃ ॥ ૪૧॥

જયશબ્દો નમઃ શબ્દસ્તત્રાસીત્સર્વસંસ્કૃતઃ ।
તદોત્સાહો મહાનાસીત્સર્વેષાં સુખવર્ધનઃ ॥ ૪૨॥

સ્થિત્વા સિંહાસને શમ્ભુર્વિરરાજાધિકં તદા ।
સર્વૈઃ સંસેવિતોઽભીક્ષ્ણં વિષ્ણ્વાદ્યૈશ્ચ યથોચિતમ્ ॥ ૪૩॥

અથ સર્વે સુરાદ્યાશ્ચ તુષ્ટુવુસ્તં પૃથક્પૃથક્ ।
અર્થ્યાભિર્વાગ્ભિરિષ્ટાભિઃ શકરં લોકશઙ્કરમ્ ॥ ૪૪॥

પ્રસન્નાત્મા સ્તુતિં શ્રુત્વા તેષાં કામાન્દદૌ શિવઃ ।
મનોભિલષિતાન્પ્રીત્યા વરાન્સર્વેશ્વરઃ પ્રભુઃ ॥ ૪૫॥

શિવાજ્ઞયાથ તે સર્વે સ્વં સ્વં ધામ યયુર્મુને ।

પ્રાપ્તકામાઃ પ્રમુદિતા અહં ચ વિષ્ણુના સહ ॥ ૪૬॥

ઉપવેશ્યાસને વિષ્ણું માં ચ શમ્ભુરુવાચ હ ।
બહુ સમ્બોધ્ય સુપ્રીત્યાનુગૃહ્ય પરમેશ્વરઃ ॥ ૪૭॥

શિવ ઉવાચ ।
હે હરે હે વિધે તાતૌ યુવાં પ્રિયતરૌ મમ ।
સુરોત્તમૌ ત્રિજગતોઽવનસર્ગકરૌ સદા ॥ ૪૮॥

ગચ્છતં નિર્ભયં નિત્યં સ્વસ્થાનં ચ મદાજ્ઞયા ।
સુખપ્રદાતાહં વૈ વાં વિશેષાત્પ્રેક્ષકઃ સદા ॥ ૪૯॥

ઇત્યાકર્ણ્ય વચઃ શમ્ભોઃ સુપ્રણમ્ય તદાજ્ઞયા ।
અહં હરિશ્ચ સ્વં ધામાગમાવ પ્રીતમાનસૌ ॥ ૫૦॥

તદાનીમેવ સુપ્રીતઃ શઙ્કરો નિધિપં મુદા ।
ઉપવેશ્ય ગૃહીત્વા તં કર આહ શુભં વચઃ ॥ ૫૧॥

તવ પ્રેમ્ણા વશીભૂતો મિત્રતામગમં સખે ।
સ્વસ્થાનં ગચ્છ વિભયઃ સહાયોઽહં સદાનઘ ॥ ૫૨॥

ઇત્યાકર્ણ્ય વચઃ શમ્ભોઃ કુબેરઃ પ્રીતમાનસઃ ।
તદાજ્ઞયા સ્વકં ધામ જગામ પ્રમુદાન્વિતઃ ॥ ૫૩॥

સ ઉવાસ ગિરૌ શમ્ભુઃ કૈલાસે પર્વતોત્તમે ।
સગણો યોગનિરતઃ સ્વચ્છન્દો ધ્યાનતત્પરઃ ॥ ૫૪॥

ક્વચિદ્ધ્યૌ સ્વમાત્માનં ક્વચિદ્યોગરતોઽભવત્ ।
ઇતિહાસં ગણાન્પ્રીત્યાવાદીત્સ્વચ્છન્દમાનસઃ ॥ ૫૫॥

ક્વચિત્કૈલાસકુધરસુસ્થાનેષુ મહેશ્વરઃ ।
વિજહાર ગણૈઃ પ્રીત્યા વિવિધેષુ વિહારવિત્ ॥ ૫૬॥

ઇત્થં રુદ્રસ્વરૂપોઽસૌ શઙ્કરઃ પરમેશ્વરઃ ।
અકાર્ષીત્સ્વગિરૌ લીલા નાના યોગિવરોઽપિ યઃ ॥ ૫૭॥

નીત્વા કાલં કિયન્તં સોઽપત્નીકઃ પરમેશ્વરઃ ।
પશ્ચાદવાપ સ્વાં પત્નીં દક્ષપત્નીસમુદ્ભવામ્ ॥ ૫૮॥

વિજહાર તયા સત્યા દક્ષપુત્ર્યા મહેશ્વરઃ ।
સુખી બભૂવ દેવર્ષે લોકાચારપરાયણઃ ॥ ૫૯॥

ઇત્થં રુદ્રાવતારસ્તે વર્ણિતોઽયં મુનીશ્વર ।
કૈલાસાગમનં ચાસ્ય સખિત્વં નિધિપસ્ય હિ ॥ ૬૦॥

તદન્તર્ગતલીલાપિ વર્ણિતા જ્ઞાનવર્ધિની ।
ઇહામુત્ર ચ યા નિત્યં સર્વકામફલપ્રદા ॥ ૬૧॥

ઇમાં કથાં પઠેદ્યસ્તુ શ‍ૃણુયાદ્વા સમાહિતઃ ।
ઇહ ભુક્તિં સમાસાદ્ય લભેન્મુક્તિં પરત્ર સઃ ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પ્રથમખણ્ડે સૃષ્ટ્યુપાખ્યાને કૈલાસોપાખ્યાને શિવસ્ય કૈલાસગમનં નામ વિંશોઽધ્યાયઃ ॥ ૨.૧.૨૦॥

॥ ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયરુદ્રસંહિતાયાં પ્રથમઃ સૃષ્ટિખણ્ડઃ સમાપ્તઃ ॥ ૨.૧॥

---

*Shri Shiva Mahapuranam 21 Rudra Samhita Srishtikhandah*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*